Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
C. NO-4048

वाराणसेय विद्यार्थीग्रन्थमालायाः
अष्टविंशतिकम् पुष्पम्
[२८]

सिन्धुवादवृत्तम् रहस्यम्

(प्रश्नोत्तरी)

Phone No. 63076
चौखम्बा विद्याभवन
POST BOX NO 1069
चौक, वाराणसी

015,3x1
NA

लेखक :
पं० [illegible]ास शुक्लः

प्रकाशकः
वाराणसेय संस्कृत संस्थान
सी २७/६४ जगतगंज, वाराणसी–२२१००२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015,3x1 4048
NA
Shukla, Vedavyas
Sindhavad brityam
rahashyam.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पादकः

पं० वेदव्यास शुक्लः

लेखकः

सौप्रभकौमारादीनाम्

[redacted]

प्रकाशकः

वाराणसेय संस्कृत संस्थान

सी २७/६४ जगतगंज, वाराणसी–२२१००२

सम्पूर्णानन्द संस्कृत विश्वविद्यालय के

पूर्वी गेट के सामने ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

© प्रकाशक:
वाराणसेय संस्कृत संस्थान
सी० २७/६४ जगतगंज, वाराणसी

015,3xL
NA

प्रथम संस्करण : ११००

मूल्य : १५·००

अन्य प्राप्ति स्थान :
संस्कृत साहित्य संस्थान
सी २७/१७० ए, जगतगंज
वाराणसी–२२१००२

[redacted]
[redacted]Y
[redacted] V:anasi
[redacted]......... 4048

मुद्रक
आनन्द प्रिंटिंग प्रेस
सी० २७/१७० ए, जगतगंज
वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरोवाक्

अयि देवगिरापरिचरणपरायणाः !

गतमेव कर्णकुहरं प्रातः स्मरणीयानां गुरुतुल्यानां बहुभाषाभणिति भूषितानां शास्त्रिप्रवराणामरवीभाषातो विहितानुवादं सिन्धुवादवृत्तम् । आधुनिकयुगप्रकाशितगद्यबन्धानामन्यतममिमवलोक्य प्रकाशितं मनः प्रसन्नं जातम् । किन्तु चरित्रचित्रणकथासमीक्षणादिपरीक्षाप्रश्नोत्तरसामग्र्याद्यभावे छात्राणां कष्टबहुलां कथां श्रुत्वाऽस्य ग्रन्थस्य परीक्षासामग्रीसमन्वितस्य प्रकाशनाय प्रयत्नशीलोऽभवम् । समयेन तदेव प्रकाश्यते । छात्राः सर्वां प्रश्नपत्रोचितां सामग्रीमवाप्यात्रस्यं प्रमुदिता भविष्यन्तीत्यलं कङ्कणकराय दर्पणप्रदर्शनेन ।

विद्वत्पदकमलचञ्चरीकः
वेदव्यास शुक्लः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रश्नोत्तरी प्रश्नानुक्रमणिका

क्रमाङ्कः	विषयाः	पृष्ठाः
१.	अधोलिखितयोः श्लोकयोः सप्रसङ्गं व्याख्याकार्या— (क) सिन्दूरचारुरुचिभिद् जनयन्नाकालिकीं सन्ध्याम् । दलयतु भवतां देवो गणेश्वरः सोन्तरायौघान् ॥ (ख) यत्पादपद्मयुगली रजः प्रसर मेदुराः । शुष्यन्ति विघ्नाम्बुधयः स गणेशोऽस्तु सिद्धिदः ॥ अथवा सिन्धुवादवृत्तमङ्गल श्लोकयोः व्याख्यानं कार्यम् ॥	१-३
	उपोद्घातः	
२.	अधोलिखितस्यगद्यखण्डस्य व्याख्या कार्या— यथोक्तं पृष्ठ ३ सोत्तरम्, तत्र द्रष्टव्यम् ।	३-४
३.	अधोलिखितोंशः व्याख्येयः (सम्पू० सं० वि० वि० ८४). सोत्तरा व्याख्या पृष्ठ ५ द्रष्टव्या ।	४-६
४.	गद्यखण्डस्याधोलिखितस्य व्याख्यानं कार्यम्— "भद्राः ! कस्य नाम सुकृतिनः सदनमेतत् ।"........ ....न जानासि इति तमुपजहसुः ।"	६-७
५.	व्याख्यायतामधोलिखितपंक्तिनिचयम्— "हितवादस्तु मनसि तदीयता भाग्यसम्पदा........उच्चैरघोषयत् ॥"	७-८
६.	अधोलिखितो गद्यखण्डः व्याख्येयः— "सपदि च हर्म्यान्तरात् समुपेत्यभृत्य........प्रवेष्टुमभिमुखीचकार ।"	८-९
७.	प्रसङ्गकोषादि निर्देश पुरःसरं व्याख्येयोऽयं गद्यभागः— "अथ तेन प्रदर्श्यमानमार्गो........भोजनाय भृशमनुरुरोध ।	९-१०
८.	अधोलिखित पंक्तीनां व्याख्यानं कार्यम्— "अथ विरते भोजनप्रसङ्गे सिन्धुवादो........ ....स्मर्यमाणा अपि तनुमुत्पुलकयन्ति ।" इति	११

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठ
९.	अधोलिखितोंऽशः सुरगिरा व्याख्येयः— "अथासौ समुपस्थित मतिथिगणं संबोध्यैव मवादीत……… ………सिन्धुयात्रां वर्णयितु मित्युपक्रामत ।"	११-१
	प्रथमासिन्धुयात्रा	
१.	अधोलिखितांशस्य व्याख्या कार्या— "एषोऽहं यौवनावतारे नाना व्यसन लम्पटतया……… ………व्यग्र मानसोऽभवम् ।"	१३-१
२.	अधोलिखितवाक्योः व्याख्या कार्या— "श्रेयो निधनं न निर्धनता । इति पितुरादेश……… ………विक्रीय किञ्चिद् धनमुपार्जयम् ।"	१४-१
३.	व्याख्यायतां गद्यांशोऽधोलिखितः— "एकस्मिन्नहनि सवेगं वहति पोते……… ………महाभयसम्भ्रमं जनयामास ।"	१६-१
४.	अधोलिखितोंऽशः व्याख्येयः— "पोतस्था जनाश्चतं भूमिकम्पमवलोक्य……… ………क्षिप्यमाणो दैवमाक्रोशन्ननन्य शरणोऽभवम् ।"	१७-१
५.	व्याख्यायताम् अधोलिखितोंऽशः— "अत्रान्तरे पोताध्यक्षः पवनमनुकूलमुपलभ्य……… ………वीरभूमावात्मानमपातयम् ।"	१८-१
६.	अधोलिखित गद्यांशस्य सप्रसङ्गं व्याख्या कार्या— "अथोदिते भगवति गभस्तिमालिनि परिश्रमातिशयेन……… ….तत्र तेषां संदर्शनेनाहमिव तेऽपि मां विलोक्य विस्मिता तस्थुः ।"	२०-२
७.	सप्रसङ्गम् व्याख्येयोऽयं गद्यभागः । "तदनु तैरुपहृतं किञ्चिदशनं भुक्त्वा मया तत्र निर्जनोद्देशे……… ………जीवन साधन उपरतोऽभवष्यि ।" इति	२१-२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठाः
८.	सप्रसङ्गं व्याख्येयोऽयं गद्यांशः— "तेषु चैवं वदत्सु सहसा तैरुपवर्णितः……… ………भूयो जलाभ्यन्तरेन्यमज्जत् !" अथवा "अन्येद्युर्गृहीतवडवैस्तैः सह तद्द्वीपाधिराजस्य……… ………विनोदयन् कञ्चन कालमयापयम् ।"	२३-२६
९.	सप्रसङ्गं व्याख्यातामधोऽङ्कितो गद्यभागः— "एवं वहत्यनेहसि सोहमेकस्मिन्……… ………निश्चित्य प्रत्यभिज्ञाय च तं पोताध्यक्षमहमपृच्छम् ।"	२६-२७
१०.	अधोलिखितांशाः व्याख्येयाः— "आर्य कस्यैते समुद्गकाः ? स प्रत्युवाच……… ………विगतचिन्तो भवितुमिच्छामि इति ।"	२७-२९
११.	प्रसङ्ग निर्देश पुरः सरम् व्याख्येयोऽयं गद्यांशः— "अह तमवदम्—आर्य ! सोऽहं सिन्धुवादो……… ………किमपि पारितोषिकम् सविनयमसौ प्रत्याचख्यौ ।"	२९-३१
१२.	अधोलिखितस्य व्याख्या कार्या— "तेषु च पण्यद्रव्येषु कानिचिन्महार्घाणिमिहिर महोपतये-……… ………विपदः मुखोपभोगैक प्रवहणोऽवसम् ।"	३१-३२
१३.	व्याख्येयोऽय मंशोऽधोलिखितः— "इत्येवमुक्त्वा स सिन्धुवादो भूयः …… …… ……गतरतेन स्निग्धया दृशा स्वागतीकृतः कृतकृत्य मात्मान ममन्यत !"	३३-३४
१४.	अधोलिखितोंऽशः व्याख्येयः— "अथ समुपस्थितेषु अन्येषु सभ्यजनेषु……… ………चमत्कारिणी मुपवर्णयिष्यामि श्रूयताम् ।"	३४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठाः
	द्वितीयासिन्धुयात्रा	
१.	अधोलिखितांशस्य व्याख्या कार्या— "प्रथमयात्रोत्तरमिह विदामपुरे········ ········प्रवहण मारुह्ययात्रायै निरगमम् ।"	३५
२.	अधोलिखित पंक्तीनां व्याख्या कार्या— "द्वीपाद् द्वीपं परिभ्रमन्तः सलाभं········ ········क्रमशश्चैतद् दृश्यतां गतमभिवीक्ष्य निराशतामगच्छम् ।"	३६
३.	अधोलिखितगद्यांशस्य व्याख्यानं स समास कोष व्याकरणम् कार्यम्— "ईदृशीं विषमां दशामनुप्रपन्नोऽवसितजीविताशः········ ········दुरारोहं किमपि वस्तु समालोकयम् ।"	३७-३८
४.	व्याख्येयोऽधोलिखितांशः "अथास्तभिमुखे भगवति मास्वति दुर्दिन इव········ ········चञ्चुपटेनाद्वहन् अदृश्यतामयासीत् ।"	३९-४०
५.	अधोलिखितस्य व्याख्या कार्या प्रसङ्गपूर्वकम्— "अहं तु क्वचिदुपत्यकायामभितो········स्तम्भितमतिरतिष्ठम् ।" इति	४१
६.	अधोलिखितो व्याख्येयः गद्यभागः— "अथोत्थितोऽहमितस्ततः परिक्रामस्तं········ ········मांस खण्डानि पश्यन् विस्मितो आसम् ।"	४२-४३
७.	अधोलिखितस्य व्याख्यानं कार्यं प्रसङ्गपूर्वकम्— "पूर्वं नाविकगणै वर्णितायां हारकोपत्य········ ········गृध्रपातं प्रतीक्षनिश्चेष्टोऽपतम् ।"	४४-४५
८.	लेख्या व्याख्या अधोलिखितस्य— "अथापतिते तत्र गृध्रगण एकतेषु········ ········मद्धैर्य्य साहसाध्यवसायांश्चिरं प्रशंसुः ।"	४६-४७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठाः
९.	व्याख्येयोऽयमंशः सुरगिरा— "अथ तै र्वणिग्जनैः स्वशिविर……… ………स्वनिवासभुवं विदामपुरं प्रत्यासदम् ।"	४७-४९
१०.	अधोलिखितस्य व्याख्या कार्या— "एवं सिन्धुवादः स्वां द्वितीयां सिन्धुयात्रा………वर्णयितु मारेभे ।"	४९-५०
	तृतीयासिन्धुयात्रा	
१.	अधोलिखितांशस्य व्याख्या कार्या— "तदनु सुखेन कालं यापयन् विस्मृतयात्रा…………द्वीपेषु सलाभं पण्यजातं विक्रीणानो दिवसगणसमाप्त्यां यात्रामुद्दिश्याऽवहम् ।"	५०-५१
२.	व्याख्येयोऽधोलिखितो गद्यभागः— "एकस्मिन् दिवसे सिन्धुमध्ये प्रवहतोऽस्मान्……… ………पोताध्यक्षोऽस्मानवादीत् ।" "इदमासन्नानि………………राधिष्ठेतानि इति ।"	५१-५२
३.	अधोलिखित गद्यभागस्य व्याख्या कार्या— "तदेतत्तस्य वचनं निशम्य………अनिच्छतोऽपि रोधस्यवतारयन् ।"	५३-५४
४.	अधोलिखितस्य व्याख्या कार्या— "एवं सिन्धुयात्राकुशलैः कैवर्तैः ईरतः……… ………वयं निश्चेतना भूमावपताम् ।"	५४-५५
५.	व्याख्येयोऽधोलिखितोंऽशः— "अस्त मुपगते च भगवति चण्डदीधितौ……… ………गतप्राणा इव वयं निश्चेतनाश्चिर मतिष्ठाम ।"	५६-५७
६.	अधोलिखितस्य व्याख्या कार्या— "अथास्मासु लब्धचेतनेषु साकूतं ……… समुत्सृज्य क्वचिदयासीत् ।"	५७-५८
७.	व्याख्येयोऽधोलिखितो गद्यभागः— "तस्मिंश्च कियद्दूरं गते तत् प्रबोधनभयेन……… ………प्रासादं प्रत्यावर्तामहि ।"	५८-५९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठाः

८. अधोलिखितोंशः व्याख्येयः— ५९-६०
"स तु नरपिशाचः पूर्ववत्..............आत्मघातान्निवारयत् ।"

९. व्याख्येयोऽधोलिखितो गद्यभागः— ६०-६२
"अथाहं तान् मत्सहचरानेवमब्रवम्........
........नरत्रय वहनपर्याप्तावकाशानि पर्यकल्पयाम ।"

१०. अधोलिखितस्य व्याख्या कार्या— ६२-६३
"सायं च स्ववसतिं भूयः प्रत्यगच्छाम । ....तमन्धतामनयाम ।"

अथवा

"सोऽप्य विषह्यवेदनया भृशं तुद्यमान..........कुत्रापि प्रययौ ।"

११. अधोलिखितस्य व्याख्या कार्या— ६४
"तस्मिश्चापगत मात्रे वयं सिन्धुरोधो ....सत्वरमापतन्तमद्राक्ष्म ।"

१२. अधोलिखितस्य व्याख्या कार्या— ६५
"तांश्चावलोक्य ससम्भ्रमं फलकान्यधिरुह्य........
....विपदोऽभिरक्षितः सिन्धुमध्यमगच्छन् ।"

१३. व्याख्येयोऽधोलिखतोंऽशः सप्रसङ्गम्— ६६-६७
"तत्र च महोर्मिषु क्वचिन्निमज्जन्तः........
........मुक्तये कृतवृथाप्रयत्नं न्यगिलत् ।"

१४. व्याख्या कार्याऽधोलिखितस्य— ६७-६८
"उर्वरितक सहचरोऽहम् हन्त ! ....
........मदीय मेकाकिनं सहचरं निगीर्य कुत्रापि न्यलीयत ।"

१५. अधोलिखितस्य व्याख्यां कार्या— ६८-६९
"एव मेकावशेषम् आत्मनोऽपि तामेव..........पोतं सम्प्राप्नवम् ।
विदितमद्भुतवृत्तान्ताः..........मामन्वगृह्णन् । तैश्च सहितः........
........पोताध्यक्षेणैवमुक्तः ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः | विषयाः | पृष्ठाः

१६. अधोलिखितस्य व्याख्या कार्या— ७०-७३

"आर्य ! एतानि पण्यवस्तूनि मत्पोतमारूढ........

........तद्दायादेभ्यो दीयमानमभ्यर्थये ।"

अथवा

"इत्युक्त्वा स तत्पण्यजातमदर्शयत् ।........प्रत्यभिज्ञायापृच्छम्....

........किन्नामधेयोऽसौ यस्यैतद्वस्तु जातम् ?" इति

अथवा

"सोऽब्रवीत्-भद्र एतानि तानि विदामपुरवासिनो........

........सहसाऽदृश्यतां गत इति ।"

"आर्य ! सोऽहं सिन्धुवादोऽयं भवान् तस्मिन् द्वीपे........

........तत्पण्यजातं मदधीनमकरोत् ।"

१७. अधोलिखितस्य व्याख्या कार्या— ७३-७४

"ततश्च प्रस्थितोऽहं मार्गे द्वीप भ्रमाद्यायिनो........समयमयापयम् ।

इत्येवं तृतीयसिन्धुयात्रावर्णनं........चानुरुध्य तं विससर्ज ।

अन्येद्युश्च स यथासमयं........चतुर्थीसिन्धुयात्रां वर्णयामास ।

चतुर्थीसिन्धुयात्रा

१. व्याख्येयोऽधोलिखितोंऽशः— ७५-७७

"एवं सुखान्यनन्य सुलभानि भुञ्जानोऽपिभूयो........

........सपदि प्राणांस्तत्यजुः ।"

अथवा

"कतिपयावशिष्ट वणिग्जन सहायो........

........गणशश्चास्मान् विभज्य स्वगृहाभिमुखमभिजग्मुः ।"

२. अधोलिखितांशस्य व्याख्या कार्या— ७७-७८

"अहं पञ्चभिरपरैः सहचरै सहैकः........किञ्चिदभ्यवाहरम् ।'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठा

३. कार्या व्याख्या अधोलिखितस्य— ७९-८

"ते हि कालपुरुषादापसदा अस्मान् ....

........समयं चिन्ता सन्तत मनैषम् ।"

अथवा

एवं लब्धावसर एकस्मिन् वासरे........त्रिलोक्य निर्भयं तानुपासरम् ।

४. व्याख्येया अधोलिखितांशाः— ८१-८

"कुतो भवानिति मद्देशभाषायां पृच्छतस्तानुदित प्रहर्षोऽहं........

........सानन्दं मामभ्यनन्दन् ।

अथ तैः सह कांनिचिदहानि........सहोपचितस्नेहः सुखेनावात्सम् ।"

५. व्याख्येयः गद्यभागोऽयं सप्रसङ्गः— ८३-८

"एकदा तत्रत्यान् निखिलान् जनान्........विस्मतो राजनमपृच्छम्—

देव समृद्धेऽत्र भवद्राज्ये कथं........तेषां नामाप्यजानन् व्यस्मयत् ।"

"अथाहं, लोहचर्मकारानुपेत्य........सर्वेषां च स्नेहपात्रमभवम् ।"

६. लेख्या अधोलिखितस्य व्याख्या— ८५-८

"प्रत्यहं राजसभामुपासीनं मामेकस्मिन्........

........न तदार्येण प्रत्याख्येयम् ।" इति

"अहं तं प्रत्यवोचम्—सर्वथा....गृह्यतामयज्ञन इति ।

आर्य ! भवन्तमिह...........कालं कञ्चनाक्षपयम् ॥"

७. अधोलिखितस्य व्याख्या कार्या— ८७-८

"एवं मयि ततः पलायनो........चिरंजीव इति वदन्नहं

तेनोक्तः—भद्र ! किमिद मसम्बद्धं....नृशंसः समुदाचारः ।" इति

८. व्याख्येयः गद्यभागः अधोलिखितः— ८८-९

"ईदृश नृशंसाचारश्रवणसञ्जात साध्वसे....राजानं च तमवोचम्-

९. अधोलिखितस्य व्याख्या कार्या— ९०-९

"देव ! जीवित जन निखननाचार मिमं........

........अमानुषः सोऽयं समुदाचारः"इति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठाः

सोऽब्रवीत्—आर्य ! किमत्र·········मनुगन्तव्या" इति ।
अहं पुनरवदम्—देव !·········केनाप्युलङ्घनीय" इति ।
एतदाकर्ण्य चिन्ताक्रान्तोऽहं·········कालमत्यवाहयम् ।"

१०. व्याख्येयोऽधोलिखितोंऽशः— ९२-९३
"अथैकदा मद्दुर्दैव महिम्ना वस्तुतः सा मदीयादयिता·········
·········सर्वेततः प्रतिष्ठन्त ।"

११. अधोलिखितस्य व्याख्या कार्या— ९३-९५
"अहं चाधस्तलं सम्प्राप्तो गृहमेकां·········तत् पाथेयकं भुक्त्वा····
·········जीविताः कालमक्षपयम् ।"

१२. व्याख्येयः गद्यभागोऽयं सप्रसङ्गः— ९६-९७
"एकस्मिन् दिने सद्योहतैक·········प्रतिनिवर्तमानं निरधारयम् ।"

१३. अधोलिखितस्य व्याख्या कार्या— ९७-९९
"अथाहं भूयस्तां गुहां प्रविश्य संगृहीतं·········आमोदप्रमोदमात्र
व्यवसायोऽवसम् । एव मुक्त्वा सिन्धुवादः·········
····यात्रां शंसितुमुपचक्रमे ।"

पञ्चमीसिन्धुयात्रा

१. अधोलिखितस्य व्याख्या कार्या— ९९-१०१
"एवं मया प्रत्यहमुपभुज्यमानैः·········विशीर्ण शुष्कपर्ण समेधिते-
ऽनले शूलाकृत्य जघसुः ।"

२. व्याख्येयोऽधोलिखितोंऽशः— १०१-१०२
"अवसिताभ्यवहारेषु तेषु नभसि·········सर्वानन्ववाघ्नात् ।"····
····"अथतौ पक्षिणौ क्रेंकारै·········कथमपि तटमारुह्य समस्थली-
मुपागमम् ।"

३. व्याख्येयोऽधोलिखितोंऽशः— १०३-१०४
"तत्र च नवहरित शाव्दले क्षणं·········उदिते भगवति गभस्ति-
मालिनि·········इतस्तोव्यचरम् । विचरंश्च·········समकेतयत् ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठाः

४. अधोलिखितस्य व्याख्या कार्या— १०५-१०७
"अहं तु तं स्थविरम् गमनाक्षमतया········मूर्च्छितप्रायोऽभवम् ।
एवमप्य विचलासनः सः·········अत्यर्थमदुनोत् ॥"

५. अधोलिखितस्य व्याख्या कार्या— १०७-१०९
"एकस्मिन्नहनि भूमौ पतिताः·········विगतासुरपतत् । इत्थं
तस्मात् स्थविर·······सर्वं हि पोतवाहाः वणिजश्चेहागमनं
परिहरन्ति ।" इति

६. अधोलिखितस्य व्याख्या कार्या— १०९-११
"एवमुक्त्वा ते मां स्वपोत मर्तंपुः·········सम्प्राप्नवम् । पोतस्थि-
तेषु···नो जातु सङ्गमेषां त्यज अन्यथा विरदि पतिष्यसि ।" इति

७. अधोलिखितस्य व्याख्या कार्या— १११-११
"अथ वयमभ्रङ्कषैरति·······सङ्गृह्य समक्षिपम् । ते तु कपयः
किलकिला शब्दै·······बहुधनमुपार्गयम् ।"

८. अधोलिखितस्य व्याख्या कार्या— ११२-११
"सङ्गृह्णीत बहुनारिकेलैः तैः·········ससुखं समयमयापयम् । एव
मुक्त्वा सिन्धुवादो·······गृहं प्रास्थापयत् । परस्मिंच दिने········
····वर्णयितुमित्थमारभत् ।"

षष्ठीसिन्धुयात्रा

१. व्याख्येयोऽधोलिखितो गद्यभागः— ११४-११
"वर्ष मात्रं सुखोपभोगे प्रयाप्य·········हन्त ! हताः स्मः ।"

२. अधोलिखितस्य व्याख्या कार्या— ११५-११
"तीव्रेण रयेणोह्यमाना वयं·········खण्डशोऽभवत् । एवमपि········
····निरीक्ष्य विस्मयं प्रप्नुम ।"

३. अधोलिखितस्य व्याख्या कार्या— ११८-११
"तत्र च द्वीपे भग्नहृदयेषु,·········ता सम्भावयन् फलक········
····प्रवाहानुरोधेनावहम् ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठाः

"कांश्चित् दिवसान् तिमिर............क्वचित् स्वपन् क्वचिज्जागृत् सन्ततमवहम् ।"

४. अधोलिखितस्य व्याख्या कार्या— ११९-१२१

"एकदा चैवम् वहन् सुप्तप्रबुद्ध........परमेश्वरं प्राशंसम् । तेषु च कृष्ण पुरुषेषु........अहं च भुक्तदद्वितीर्ण किञ्चिद् भोजनः, स्वं वृत्तान्तमकथयम् ।"

५. अधोलिखितस्य व्याख्याकार्या— १२१-१२२

"तेऽपि तदाकर्णनेनाति विस्मिता........कैश्चित् स्कन्धाधिरोपिता-स्मत्सरत्न निचय फलकैः अनुस्त्रियमाणोऽगच्छम् !"

६. व्याख्येयोऽधोलिखितोंऽशः— १२२-१२४

"नैश्च राजसदनं नीतः सिंहासनारूढं.....वीक्ष्य भृशं परितुतोष ।"

"तं तथा प्रहृष्टं मया........सर्वतो भाविनीं समीहे ।"

७. अधोलिखितस्य व्याख्या कार्या— १२४-१२५

"अथ तेन मदर्थं प्रकल्पिते सपरिकरे........

........समयं कञ्चिद् व्यत्यापयम् ।"

"स द्वीपः किल विषुवरेखा............भृशं व्यनोदयत् ।"

८. अधोलिखितस्य व्याख्या कार्या— १२५-१२७

"अथैकदा सम्प्रार्थितेन भूपेनानुमत............स्नेहेन व्यसृजत् । आगत्य च विदामपुरं........स्वं गृहं प्रायाम् । एव मुक्त्वा........ ....सह गृहं ययौ । परेद्युश्च........यात्रां समवर्णयेत् ।"

सप्तमीसिन्धुयात्रा

१. व्याख्येयोऽधोलिखितो गद्यभागः । १२८-१२९

"गृहं प्रति निवृत्तः परिवारस्य............एव वस्तु निरचिनवम् । एकस्मिश्च दिने........सम्प्रापणीया इति ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठाः
२.	अधोलिखितस्य व्याख्या कार्या— "अहं त्वशनिपातेनेव तेन तद्वचसाऽभिहित........ ....भूयो यात्रार्थं सन्नद्धोऽभवम् ।"	१२९-१३०
३.	अधोलिखितस्य व्याख्या कार्या— "अथ गृहीत्वा तानि प्रदेयोपहारवस्तूनि......सादरमङ्गीचकार ।" "ततोऽहं तामामन्त्र्य अविलम्बितं........दासी भूतान् व्यक्रीणत ।"	१३१-१३२
४.	अधोलिखितस्य व्याख्या कार्या— "अहं त्वेकेनाढ्येन वणिजा क्रीत्वा........ ....अहं निखिलां रात्रिं वृक्षारूढोऽतिष्ठम् ।"	१३३-१३४
५.	अधोलिखितस्य व्याख्या कार्या— "अथ प्रभाते उदित मात्रे भगवति........ ....स्वामिन आदेशानुसारं न्यखनम् ।" "एवं मासद्वयं वनं गत्वा प्रत्यहं नवं........ ....मम हस्ताभ्यां सशरं धनुरधोऽपतत् ।"	१३४-१३६
६.	अधोलिखितस्य व्याख्या कार्या— "अथ तेषु बहिष्ठः करीन्द्रः........क्षिप्त्वाक्वचिदयासीत् । सर्व मेतत् स्वप्नविलसितमिव........एकया च निशया मत्स्वामिनोऽन्तिकं प्रत्यागमम् ।"	१३६-१३७
७.	व्याख्येयोऽधोलिखितोंऽशः— "स तु मद्दर्शनेनोद्विग्नो मदन्वेषणेच्छया........नगरं प्रत्याजगाम ।" "अथासौ मामब्रवीत—भद्र ! संशये आत्मानं........तदहं त्वां दास्यादविमोचयामि । गृहाणैतत्पारितोषिकमिति ।"	१३८-१३९
८.	कार्या व्याख्याऽधोलिखितस्य— "तस्यैतां कृपां कृतज्ञतया........सानन्दमत्यवाहयम् । अथागतेषु पोतेष्वेकं........विदामपुरं पुनः समासदम् ।"	१३९-१४२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः विषयाः पृष्ठाः

९. अधोलिखितस्य व्याख्या कार्या— १४१-१४२

"महाराजहारीतनृपतिं च सद्यः·······

·······सम्भाव्य महतादरेण व्यसृजत् ।"

उपसंहारः

१. अधोलिखितस्य व्याख्या कार्या—

इत्येवं सिन्धुवादः सप्तसिन्धुयात्रा वर्णन·······

·······सुखोपभोग मान्यान्यं मनुते ? इति ।

अथवा

"सतु आर्यं सिन्धुवाद ! तथा विधान्·······श्रियं इत्यवदत् ।"

"सिन्धुवादस्तस्मै प्रत्यहमिव दीनारशतं·······

·······दौवारिक पदेन्ययोजयत् ।"

२. अनुवाद कर्त्तुः निवेदनम्— १४४-१४६

"एतत् सहस्ररजनो चरिताम्भोधिमन्थनात् ।
लब्धमत्यद्भुतं सिन्धुवादवृत्तं कथामृतम् ॥
आन्ध्रेण कविना नाम्ना श्रीमल्लक्ष्मणशास्त्रिणा ।
अर्थतः संस्कृतं गद्येऽनूद्य सस्नेह मर्प्यते ॥
दोषान् मनुष्य सुलभान् समुपेक्ष्य क्वचित् सतः ।
आस्वादयन्तु रसिका एतद् रस ममत्सराः ॥

३. सिन्धुवादवृत्तकारस्य संक्षिप्तपरिचयोदेयः । १४५-१४६

अथवा

म० म० लक्ष्मणशास्त्रिणो जीवनकथा लेख्या ।

४. सिन्धुवादवृत्ततस्य काऽपि एकायात्रा समीक्ष्यताम् । १४६

अथवा

सिन्धुवादवृत्तस्य परिचयो देयः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमाङ्कः	विषयाः	पृष्ठाः
	अथवा	
	कस्य अपि यात्रायाः कथा स्वशब्देषु लेख्या—	
	(क) कथासारः—प्रथमासिन्धुयात्रा—समीक्षणञ्च	१४६-१४७
	द्वितीयासिन्धुयात्रा ,,	१४७-१५०
	तृतीयासिन्धुयात्रा ,,	१५०-१५१
	चतुर्थीसिन्धुयात्रा ,,	१५२-१५३
	पञ्चमीसिन्धुयात्रा ,,	१५४-१५५
	षष्ठसिन्धुयात्रा ,,	१५५-१५६
	(ख) उपसंहार कथा.........समीक्षा.........	१५६-१५७
५.	(क) सिन्धुवादमृत्तकृतः कथा शैली	१५७
	(ख) मूल लेखकस्य न्यूनता समीक्षा	१५७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीः ॥

श्री पं० वेदव्यास शुक्लविरचितः

सिन्धुवादवृत्तदर्पणः

(श्री म० म० लक्ष्मणशास्त्रिविरचित सिन्धुवादवृत्तस्य प्रश्नोत्तररूपः)

वुण्ढिराजं नमस्कृत्य अन्नपूर्णां च भैरवम् ।
जननीं जनकं स्वीयं गुरून् शास्त्रार्थपारगान् ॥ १ ॥
वेदव्यासो हि कुरुते शुक्लः सम्पादनं नवम् ।
तैलङ्गकृतकाव्यस्य 'खिस्ते'–सम्पादितस्य च ॥ २ ॥
छात्रवुद्धिविकासाय परीक्षाभूतभर्जनम् ।
सरलं सरसं सुष्ठु भवेदीशानुकम्पया ॥ ३ ॥
कौमारसौप्रभादीनि गद्यवन्धादिकानि च ।
तापसीयादिकाव्यानि कृत्वाऽत्र रमते जनः ॥ ४ ॥
व्याख्यानं प्रथमे भागे द्वितीये प्रश्नविस्तरः ।
लिख्यतेऽत्र वुधापेक्षी सिन्धुवादस्य दर्पणः ॥ ५ ॥

(क) व्याख्याभागः

१. प्रश्नः—अधोलिखितयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या—

(क) सिन्दूरचारुरुचिभिद् जनयन्नाकालिकीं सन्ध्याम् ।
दलयतु भवतां देवो गणेश्वरः सोऽन्तरायौधान् ॥

(ख) यत्पादपद्मयुगलीरजःप्रसरमेदुराः ।
शुष्यन्ति विघ्नाम्वुधयः स गणेशोऽस्तु सिद्धिदः ॥

अथवा

सिन्धुवादवृत्तमङ्गलश्लोकयोः व्याख्यानं कार्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—श्लोकोऽयमस्ति मङ्गलाचरणभूतः सिन्धुवादवृत्तनामके गद्य-काव्ये कथाशिल्पैकरत्नभूते श्री म० म० लक्ष्मणशास्त्रिविरचिते। किमस्ति परिभाषा मङ्गलस्येति जिज्ञासायामुच्यते—शिष्टाचारानुमितश्रुतिबोधित-कर्तव्यताकमिष्टदेवनमस्कारलक्षणम् मङ्गलमिति। को लाभ इत्याकांक्षायाम् मङ्गलादीनि मङ्गलमध्यानि मङ्लान्तानि च शास्त्राणि प्रथन्ते। निर्विघ्न-परिसमाप्तिकामनया चिकीर्षितग्रन्थे सफलताऽवाप्तये च स्वेष्टदेवं प्रत्यूहव्यूह-विनाशनदक्षं गणपतिं स्मरति—सिन्दूर इति।

(क) अन्वयः—सिन्दूरचारुरुचिभिराकालिकीं सन्ध्यां जनयन् देवो गणेश्वरः सः भवतामन्तरायौघान् दलयतु।

व्याख्या—सिन्दूरचारुरुचिभिः = नागसम्भवसुन्दरकान्तिभिः। आका-लिकीम् = असामयिकीं। सन्ध्यां सूर्यास्तगमनवेलां जनयन् = घटयन्। देवो गणेश्वरः = गणपः सः = जगत्प्रसिद्धः भवतां = पाठकादीनाम्। अन्त-रायाणां = विघ्नानाम्। औघान् = समूहान्। दलयतु = दरिद्रीकरोतु।

कोषः—सिन्दूरं नागसम्भवमित्यमरः। दिनान्ते तु सायः सन्ध्या पितृप्रसूरिति च।

अलङ्कारः—उपमा सादृश्यमुपमा।

वृत्तम्—आर्या

समासः—सिन्दुरस्य चारुभिः रुचिभिः सिन्दूरचारुरुचिभिः। गणा-नाम् ईश्वरः = गणेश्वरः। अन्तरायाणाम् औघान् = अन्तरायौघान्।

व्याकरणम्—अकाले भवाम् आकालिकीम्

(ख) अन्वयः—विघ्नाम्बुधयः यत्पादपद्मयुगलीरजः प्रसरमेदुराः शुष्यन्ति स गणेशः सिद्धिदोऽस्तु।

व्याख्या—विघ्नाम्बुधयः = प्रत्यूहवार्धयः। यत्पादपद्मयुगलीरजः प्रसरमेदुराः = यच्चरणकमलयुगल किञ्जल्क प्रसर सान्द्रस्निग्धाः शुष्यन्ति = शुष्कतां यान्ति नश्यन्तीत्यर्थः। स = लोकत्रयप्रसिद्धः। गणेशः गणपः। सिद्धिदः = ऋद्धिसिद्ध्यादिदाताऽभीष्टदोवाऽस्तु = भवतु।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'विघ्नोऽन्तरायः प्रत्यूहः' सान्द्रस्निग्धस्तु मेदुरः। इत्यमरः। युग्मं तु युगलं युगम् इत्यपि

अलङ्कारः—रूपक् । पादपद्मयोरभेदकथनात् ।

वृत्तम्—आर्या

समासः—विघ्नाम्बुधयः = विघ्नानाम् अम्बुधयः। यत्पादपद्मयुगलीरजः प्रसरमेदुराः = यस्य पाद एव पद्मं यत्पादपद्मं तस्य युगली तस्या रजः तासां प्रसरणेन मेदुराः। गणानाम् ईशः गणेशः। सिद्धिं ददाति इति सिद्धिदः।

व्याकरणम्—सिद्धिं ददाति इति सिद्धिदः 'क' प्रत्ययः

उपोद्घातः

२. प्रश्नः—अधोलिखितगद्यखण्डस्य व्याख्या कार्या ? श्रीमद्विदामपुरपुरन्दरस्य महाराजाधिराजस्य श्रीहारीतमहीपतेराधिराज्ये वसन् हितवादो नाम कश्चन भारवहनवृत्तिरकिञ्चन एकस्मिन् निदाघदिवसे महान्तं भारं शिरसा वहन् मार्गान्मार्गान्तरं भ्रमन् परिश्रमातिशयक्लान्तघर्मसलिलार्द्रगात्रो विनिःश्वसन् मार्गमेकं सम्मार्जितं प्रस्तरनिबद्धं गन्धजलावसेकसम्भवामोदमेदुरीकृतासन्नवसुमतीपरिसरं समाससाद। तेन च परिमलोद्गारेण किञ्चिदपनीतश्रमो भारं स्वकीयं शिरसोऽवरोप्य सविधस्थितस्यातिरम्यस्यैकस्य हर्म्यस्याधस्तात् विशिश्रमिषुः क्षणं तस्थौ।

उत्तरम्—प्रसङ्गादिकम् गद्यखण्डोऽयं सिन्धुवादवृत्ताख्यगद्यकाव्यग्रन्थस्योपोद्घातखण्डाद् गृहीतः। श्रीम० म० लक्ष्मणशास्त्रिणो रचनेयम्। ग्रन्थारम्भे रचनाकारः स्वीयं प्रथमं पात्रं। हितवादनामानं समुपस्थापयति पाठकसमक्षम्। ग्रन्थनायकस्य सिन्धुवादस्य प्रासादं दृष्ट्वा विरमति क्षणाय। वातावरणं चित्रयन् कथयति लेखकः—

व्याख्या—हितवादः सभाससाद इत्यन्वयः। हितवादो नाम = हितवादसंज्ञकः, अकिञ्चनः = निर्धनः, एकस्मिन् = कस्मिंश्चिद्, निदाघदिवसे = ग्रीष्मदिवसे, एकम् = अन्यतमम्, मार्गं = पन्थानम्, समाससाद = सभवाप। श्रीमद् विदामपुरपुरन्दरस्य = वैभवसम्पन्नविदामपुरनामकनगरनृपतेः महा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राजाधिराजस्य = सार्वभौमनरेशस्य श्रीहारीतमहीपतेः श्रीसम्पन्नहारीत-नामकराजस्य, आधिराज्ये = सार्वभौमराज्ये, वसन् = निबसन्, भारवहन-वृत्ति = भारवहनजीविकः, मार्गात् = पथः मार्गान्तम्, अन्यं पन्थानं भ्रमन् = चलन् महान्तं = विशालं दुर्वहमित्यभिप्रायः भारं शिरसा = मस्तकेन धारयन् परिश्रमातिशयक्लान्तधर्मसलिलार्द्रगात्रः = श्रमातिरेकपीडितस्वेदार्द्रशरीरः, विनिःश्वसन् = स्थूलस्थूलं श्वसन्, सम्मार्जितम् = मार्जन्यादिना स्वच्छी-कृतम्, प्रस्तरनिवद्धं = पाषाणनिर्मितम्, गन्धजलावसेकसम्भवामोदमेदुरी-कृतासन्नवसुमतीपरिसरं = सुगन्धिजलसेकोत्पन्नसुगन्धव्याप्तसमीपभूभागम् । तेन च गन्धजलसेकसम्भूतेन च परिमलोद्गारेण = सुगन्धप्रसरणेन किञ्चित् = स्वल्पम् अपनीतश्रमोऽपहृतपीडः भारं स्वकीयं = निजं, शिरसो = मस्तकाद्, अवरोप्य = नीचैः = स्थापयित्वा सविधास्थितस्य = समीपस्थस्य अतिरम्यस्य = बहुसुन्दरस्य एकस्य हर्म्यस्य = धनिकावासस्य अधस्तात् = अधोभागं विशिश्रमिषुः श्रमापनोदनेच्छुः क्षणं पलमात्रं तस्थौ = विरराम ।

समासः—अकिञ्चनः = नास्ति किञ्चन यस्य सः । निदाघदिवसे = नितरां दह्यतेऽत्रेति निदाघः । निदाघश्चासौ दिवसश्च = निदाघदिवसः तत्र निदाघदिवसे । निदाघस्य दिवसे वा इत्यपि । भारवहनवृत्तिः = भाराणां वहनमेव वृत्तिर्यस्य सः । परिश्रमातिशयक्लान्तधर्मसलिलार्द्रगात्रो = परिश्रमस्यातिशयेन क्लान्तं घर्मसलिलैरार्द्रं गात्रं यस्य सः । गन्धजलाव-सेकसम्भवामोदमेदुरीकृतासन्नवसुमतीपरिसरं = गन्धजलानामवसेकात् सम्भवो यस्य एवम्भूतो य आमोदस्तेन मेदीरीकृतः आसन्नः वसुमत्याः परिसरो यस्य यत्र वा तम् ।

कोषः—ग्रीष्म ऊष्मक निदाघ उष्णोपगमः, पर्यन्तभूः परिसरः, हर्म्यादि धनिनां वासः इत्यमरकोषः ।

व्याकरणम्—महाराजः, अधिराजः, इत्युभयत्र समासान्तः टच् प्रत्ययः राजाहः सखिभ्यष्टच् इति सूत्रेण वि + श्रम + सन् + षु = विशिश्रमिषुः ।

अलङ्कार = रूपकः स्वभावोक्तिश्च ।

३. प्रश्नः—अधोलिखितोंशः व्याख्येयः । (सं. सं. वि. वि. ८४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्य च हर्म्योत्तमस्य गवाक्षजालादुदीर्णं श्रोत्रपीयूषायमाणं पिकशुकसारिकामुखखगगणविरुतं मृदङ्गनिनादमिश्रं च सङ्गीतध्वनिमाकर्ण्यान्तः परिपच्यमानानां भोज्यान्नानामभिनवामोदं चोपाघ्राय सोऽयं नूनमिह कश्चिन्महान् भोजनोत्सवः प्रचलतीति मनसाऽऽकलयन् गृहस्वामि जिज्ञासाकुतूहलपरिगृहीतचेता उपसृत्य द्वारदेशमशून्यतां नयतो महार्हवेषान् सेवकपुरुषानेवमप्राक्षीत्

उत्तरम्—प्रसङ्गनिर्देशः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवाद वृत्तनामकगद्यकाव्याद् गृहीतोऽयं व्याख्येयो गद्यभागः। हितवादोऽत्र दृष्ट्वा सम्भारान् गगनचुम्बिप्रासादं च सिन्धुवादसेवकान् कथयति।

व्याख्या—तस्य च = सविधस्थितस्य, हर्म्योत्तमस्थ = प्रासादवरस्य, गवाक्षजालाद् = वातायनछिद्राद्, उदीर्णम् = निर्गतम्, श्रोत्रपीयूषायमाणम् = कर्णामृतायमानम्, पिकशुकसारिकामुखखगगणविरुतं = कोकिलकीरसारिकाप्रधानपक्षिवर्गकलरवं, मृदङ्गनिनादमिश्रं = मृदङ्गनामकवाद्यविशेषध्वनिसंयुतम्, च सङ्गीतध्वनिम् = वाद्ययन्त्रकण्ठरवमिश्रस्वरम्, आकर्ण्य = श्रुत्वा, अन्तः परिपच्यमानानां = पाकशालाभ्यन्तरपच्यमानानां, भोज्यान्नानां = खाद्यपदार्थानाम्, अभिनवामोदं = नूतनगन्धं, चोपाघ्राय = घ्राणविषयतामानीय, सोऽयं = हर्म्याधः स्थितो भारवहनवृत्तिः हितवादः कश्चित् = अभूतपूर्वः, महान् = विशालः, भोजनोत्सवोऽशनोत्सवः प्रचलति = सम्पद्यत इति आकलयन् = अनुमानेनावगच्छन्, गृहस्वामि जिज्ञासाकुतूहलपरिगृहीतचेता = 'कोऽस्य गृहपति' रित्याकारकजिज्ञासाऽऽक्रान्तमानसः, उपसृत्य = आगत्याग्रे, द्वारदेश = द्वारभूमिमशून्यतां नयतस्तत्रस्थितान्, महार्हवेषान् = बहुमूल्यपरिधानलसितान्, सेवकपुरुषान् = द्वारपालादीन् एवं वक्ष्यमाणप्रकारेण, अप्राक्षीत् = अपृच्छत्।

समासः—हर्म्योत्तमस्य = हर्म्येषूत्तमस्य। गवाक्षजालात् = गवाक्षस्य जालात्। श्रोत्रपीयूषायमाणम् = श्रोत्रयोः पीयूषायमाणम्। पिकशुकसारिकामुखखगगणविरुतं = पिकाः शुकाः सारिकाः मुखानि यत्र तेषां खगगणानां विरुतं। मृदङ्गनिनादमिश्रं = मृदङ्गानां निनादैः मिश्रं। भोजनोत्सवः =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भोजनस्य भोजनाय वा उत्सवः । गृहस्वामिजिज्ञासाकुतूहलपरिगृहीत-चेता = गृहस्य स्वामी गृहस्वामी तस्य जिज्ञासायाः कुतुहलेन परिगृहीतं चेतो यस्य सः । महार्हवेषान् = महार्हाः वेषा येषां ते तान् । सेवकपुरुषान् = सेवाकाश्च ते पुरुषाश्च तान् ।

कोषः—'कोकिलः पिक इत्यपि' 'कीरशुकौ समौ' इत्युभयत्रापि अमरः ।

व्याकरणम्—च + उप + आ + घ्रा + क्त्वा + ल्यप् = चोपाघ्राय पीयूषमिवाचरति = पीयूषायते + शानच् = पीयूषायमाणः तं = पीयूषायमाणम् ।

४. प्रश्नः—गद्यखण्डस्याधोलिखितस्य व्याख्यानं कार्यम् । "भद्राः कस्य नाम सुकृतिनः सदनमेतत् ?" इति । ते तु साश्चर्यमेनमवलोक्य अये । पुरमिदधिवसन्नपि सकलमहासिन्धुयात्रा प्रथितयशसोऽमितवैभवभरस्यार्यसिन्धुवादस्यापि सदनं न जानासि इति तमुपजहसुः ।

उत्तरम्—प्रसङ्गनिर्देशः—सिन्धुवादवृत्तनामकात् श्री म०म० लक्ष्मण-शास्त्रिविरचितगद्यबंधात् गृहीतोऽयमंशः । अत्र हितवादनामकभारवहन-निरतस्य सिन्धुवाद नामकधनिकद्वारपालादिना सहवार्तालापो विलसति ।

व्याख्या—भद्राः = महाशयाः कस्य सुकृतिनः = पुण्यात्मनः एतत् = पुरोऽवलोक्यमानम् सदनं = वेश्म इति हितवादः पप्रच्छ पूर्वेणान्वयः ।

ते = सेवकाः द्वारपालादयस्तु, साश्चर्यम् = विस्मयपूर्वकम्, एनम् = पुरो वर्तमानं हितवादनामानं भारवहननिरतं जनं प्रश्नकर्तारम्, अवलोक्य विलोक्य, अये = इति विस्मयार्थकसम्बोधनम् इदम् = एतत् पुरम् = विदाम-पुरम् अधिवसत् = वासं कुर्वन् अपि सकलमहासिन्धुयात्राप्रथितयशसः = अपरिमितैश्वर्यसम्पन्नस्य, आर्यसिन्धुवादस्यापि = महाशयसिन्धुवादस्यापि, सदनं = गृहं न = नहि, जानासि = अवगच्छसि इति—अहो ते मूर्खतायाः प्रकारः इति तम् = हितवादम् उपजहसुः = उपहासं चक्रुः ।

समासः—सकलमहासिन्धुयात्राप्रथितयशसः = सकलाः महासिन्धूनां यात्राः ताभिः प्रथितं यशो यस्य तस्य । अभितवैभवभरस्य = अभितो वैभवस्य भरो यस्य तस्य ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—सुकृती पुण्यवान् धन्यः इत्यमरः

व्याकरणम्—पुरमधिवसन् इत्यत्र अधिशीङ्स्थासां कर्म (१।४।४६) इति कर्मणि द्वितीया।

५. प्रश्नः—व्याख्यायतामधोलिखितपङ्क्तिनिचयम्। हितवादस्तु मनसि तदीयया भाग्यसम्पदा स्वां शोचनीयतमां दशां तुलयन् खिन्नान्तरङ्ग ऊर्ध्वं विलोक्य स निःश्वसितं—'विधे! कीदृशी सेयं तव वैषम्य प्रवणता? आप्रभातादादिनान्तं कृतमहापरिश्रमोऽपि सोऽहं परिवारपोषणमात्रपर्याप्तमपि धनं सम्पादयितुमक्षमः, यावदयं सिन्धुवादोऽक्लेशलेशमेवमानन्दसम्पदोः परां काष्ठामारोपितः, किन्नाम महासुकृतमनेन समनुष्ठितम्? दुर्भगेन मया वा किमपराद्धम् इति नैराश्यनिगीर्णम् उच्चैरघोषयत्।

उत्तरम्—प्रसङ्गनिर्देशः—प्रस्तुतोयं गद्यांशः व्याख्यानाय सिन्धुवादवृत्तस्य उपोद्घातांशात्। रचनेयं श्री म० म० लक्ष्मणशास्त्रिणः अत्र धनहीनवर्गप्रतिनिधिभूतस्य हितवादनामकपात्रस्य धनिकवर्गं प्रति मनःस्थितिं चित्रयति लेखकः। हितवादः कथयति—

व्याख्या—हितवादस्तु = एतन्नामकभारवहनवृत्तिस्तु, मनसि = स्वान्ते, तदीयया = सिन्धुवादसम्बन्धिन्या भाग्यसम्पदा = सौभाग्यसम्पत्त्या, स्वां = निजां शोचनीयतमां = कष्टबहुलाम्, दशाम् = अवस्थां तुलयन् = तुलनां कुर्वन् तुलामधिरोहयन् वा खिन्नान्तरङ्गः = सपीडान्तः करणः सः = हितवादनामा भारवाहकः स निःश्वसितम् = निःश्वासपूर्वकम् दुःखाभिव्यञ्जनमिश्रम् अग्रे वक्ष्यमाणम् कथनजातमुच्चैरघोयदिति अन्वयः। विधेः = दैवः कीदृशी = किम्प्रकारा विवेकविरहिता तव = भवतः सेयं = पुरो वर्तमाना मयाऽनुभूयमाना च, वैषम्यप्रवणता = असमानवितरणप्रवीणता? आप्रभाताद् = आसूर्योदयाद्, आदिनान्तम् = आसायं, कृतमहापरिश्रमोऽपि = कृतभूरिश्रमोऽपि भारवहनादिरूपः सोऽहं = सश्रमोप्यहमकिञ्चन एव, परिवारपोषणमात्रपर्याप्तममि = कुटुम्बोदरभरणमात्रक्षममपि धनं = द्रव्यम् सम्पादयितुमक्षमः = अर्जयितुमसमर्थः, यावदयम् एषः सिन्धुवादः = एतन्नामश्रेष्ठी, अक्लेशलेशमेव = विनापरिश्रयममेव, आनन्दसम्पदोः =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हर्षवैभवयोः परां = चरमाम्, काष्ठाम् = अवस्थाम्, आरोपितः = प्रापितः। किन्नाम = अज्ञातमतर्क्यम्, महासुकृतं = महापुण्यम् अनेन = सिन्धुवादेनामुना, समनुष्ठितम् = समाचरितम् ? दुर्भगेन = दौर्भाग्यशीलेन मया = हितवादेन वा, किं किंप्रकारकम् अपराद्धम् = अपराधः कृतः इति = इतिप्रकारकम् नैराश्यनिगीर्णं = निराशापूर्णं वाक्यम् उच्चैः = तारस्वरेणं अघोषयत् = अकथयत्।

समासः—खिन्नम् अन्तरङ्गम् यस्य सः = खिन्नान्तरङ्गः। कृतमहापरिश्रमः = कृतः महान् परिश्रमः येन सः। परिवारपोषणमात्र पर्याप्तम् = परिवारस्य पोषणमात्राय पर्याप्तम्। आनन्दसम्पदोः = आनन्दश्च सम्पत् च आनन्दसम्पदौ तयोः।

कोषः—'भाग्यं स्त्री नियति विधिः' स्यादानन्दथुरानन्दः शर्म सातसुखानि च' इत्यमरः

व्याकरणम्—अघोषयत्—घुष् + णिच् + लङ् + तिप्

६. प्रश्नः—अधोलिखितो गद्यखण्डः व्याख्येयः।

सपदि च हर्म्यान्तरात् समुपेत्य भृत्य एकस्तमेवमब्रवीत्-'भद्र ! किमपि विवक्षुरस्मत्प्रभुरार्यः सिन्धुवादो भवन्तं द्रष्टुमिच्छति अनुयाहि माम् इति।

स तु नूनं मदविनयाय भर्त्सयितुमेष समाहूतोऽस्मि इति मनसि शङ्कमानो 'ननु भारोऽयं मदीयो रथ्यास्थो मय्यभ्यन्तरं गते केनाप्यपह्नियेत इत्यवदत् सोऽपि विज्ञाततदभिप्रायस्तस्य रक्षां कर्तुं प्रतिज्ञाय सानुरोधवचनैस्तमन्तः प्रवेष्टुमभिमुखीचकार।

उत्तरम्—प्रसङ्गः–श्रीम० म० लक्ष्मणशास्त्रिविरचितसिधुवादवृत्तस्योपोद्धातात् हितवादद्वारपालवार्तालापांशो व्याख्यानाय दत्तः।

व्याख्या—सपदि = शीघ्रं, च हर्म्यान्तरात् = प्रासादमध्यात्, समुपेत्य = समागत्य, भृत्यः = सेवकः, एकस्तम् = हितवादम् अब्रवीत् = अकथयत्।

भद्र ! = महानुभाव, किमपि विवक्षुः = वक्तुमिच्छुः अस्मत्प्रभुः = अस्माकं स्वामी, आर्यः = श्रेष्ठः सिन्धुवादो भवन्तं = श्रीमन्तम् (त्वामिति)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्रष्टुम् = अवलोकयितुमिच्छति = अभिलषति । (त्वं) माम् = सिन्धुवाद-सेवकम् = अनुगच्छ ।

सः = हितवादस्तु, नूनं = निश्चितम्, मदविनयाय = अस्मदौद्धत्याय, भर्त्सयितुं = तिरस्कर्तुम्, एषोऽहं, समाहूतः = समाकारितः (सिन्धुवादेन गृहपतिना) अस्मि इति शङ्कमानो = सन्देहं विदधानः—ननु = इतर्विवितर्के रथ्यास्थः = मार्गस्थः, मदीयः = अस्मदीयः, भारः मयि हितवादेऽभ्यन्तर = प्रासादमध्यं गते = प्रविष्टे केनापि = चौरादिना अपह्रियेत = अपहरणं क्रियेत् इति अवदत् = अकथयत् । सोऽपि = सिन्धुवादसेवकोऽपि, विज्ञाततद-भिप्रायः = ज्ञाताशयः प्रतिज्ञाय = प्रतिज्ञां कृत्वा = तस्य = हितवादवस्तुनः रक्षां = सुरक्षां कर्तुं = सम्पादयितु, सानुरोधवचनैः = सानुकम्पवाक्यैः, तम् = हितवादम् अन्तः = गृहाभ्यन्तरं प्रवेष्टुम् = प्रवेशार्थम, अभिमुखीच-कार = प्रेरयामास ।

समासः हर्म्यान्तरात् = हर्म्यस्य अन्तरात्, विज्ञाततदभिप्रायः = विज्ञातः तस्य अभिप्रायः येन सः, सानुरोधवचनैः = सानुरोधैः वचनैः ।

कोषः—'प्रागतीतार्थकं नूनमवश्यं निश्चयेद्वयम्', 'नूनं तर्केऽर्थनिश्चये' इत्यमरः ।

व्याकरणम्—सम + उप + आ + इज् (गतौ) + क्त्वा + ल्यप् = समुपेत्य । वच् (परिभाषणे) सन् + उ = विवक्षुः ।

७. प्रश्नः—प्रसङ्गकोषादिनिर्देशपुरःसरं व्याख्येयोऽयंगद्यभागः ।

अथ तेन प्रदर्श्यमानमार्गो महाभवनमेकं समृद्धभोजनोत्सवप्रवृत्तभद्रजनं मध्ये चावस्थितं गभीरमधुराकारभावक्षः स्थललम्बमानोच्चकूर्चसञ्चयं तद्गे-हाधिपतिं सिन्धुवादं परिवेषणसंरम्भव्यग्रपरःशतभृत्यवर्गं च साश्चर्यं विलो-क्य सम्भ्रमाक्रान्तःससाध्वसकम्पं सिन्धुवादं प्रणनाम । स तु सप्रणयस्मितम् स्वपार्श्वं उपवेश्य भोजनाय भृशमनुरुरोध ।

उत्तरम् = प्रसङ्गः—अस्ति सिन्धुवादवृत्तं नाम कथाग्रन्थः । श्री म म० लक्ष्मणशास्त्रिरस्य लेखकः । तत एव उपोद्घाताद् गृहीतोऽस्ति गद्यांशोऽयम् । हितवादस्य सिन्धुवाददर्शनक्षणं चित्रयत्यत्र ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्या—अथ = सिन्धुवादभृत्यस्य गृहप्रवेशानुरोधस्वीकारानन्तरं, तेन = सिन्धुवाद भृत्येन, प्रदर्श्यमानमार्गो = निर्दिश्यमानमार्गो, महाभवनम् = विशालगृहम् एकं समृद्धभोजनोत्सवप्रवृत्तभद्रजनं = वैभवयुक्ताशनोत्सवर-श्रेष्ठपुरुषं मध्ये = जनसमुदायाभ्यन्तरे च, अवस्थितं = विराजमानम्, गभी-रमधुराकारं = गाम्भीर्ययुक्तरम्याकारम्, आवक्षः स्थललम्बमानोच्चकूर्चसञ्चयं = वक्षः स्थलस्पर्शिदीर्घश्मश्रुराशिकम्, तद्गेहाधिपतिम् = तन्निकेतस्वामिनं सिन्धुवादम् = लोके सिन्धुवादनाम्ना विश्रुतम् परिवेषणसंरम्भव्यग्रपरः शतभृत्यवर्गं = भोजनवितरणव्याकुलं शताधिकसेवकगणं, च, साश्चर्यं = सविस्मयं, विलोक्य = समीक्ष्य सम्भ्रमाक्रान्तः = भयभीतः, ससाध्वसकम्पं = भयकम्पयुक्तं, सिन्धुवादं = गृहपतिं, प्रणनाम = ननाम। सः = गेहाधि-पतिः, तु, सप्रणयस्मितं = प्रेमपूर्णस्मितयुतं, स्वपार्श्वे = निजसमीपे, उपवेश्य भोजनाय अनुरुरोध = अनुरोधंचकार।

समासः—प्रदर्श्यमानमार्गः–प्रदर्श्यमानः मार्गःयस्य सः, समृद्धभोजनो-त्सव प्रवृत्तभद्रजनम् = समृद्धे भोजनोत्सवे प्रवृत्ता भद्रा जना यस्मिन् तत्, तस्य गेहस्य अधिपतिम् = तद्गेहाधिपतिम्, गभीरमधुराकारं = गभीरः मधुरः आकरः यस्य सः। आवक्षः स्थललम्बमानोच्चकूर्चसञ्चयम् = आवक्षः स्थलम् लम्बमान्। उच्चः कूर्चसञ्चयः यस्यतं परिवेषणसंरम्भव्यग्रपः शतभृत्य-वर्गं = परिवेषणस्य संरम्भे व्यग्रा ये परस्शताभृत्याः तेषां वर्गः तम्, सम्भ्र-माक्रान्तः = सन्तमेण आक्रान्तः, ससाध्वसकन्दम् = साध्वसस्य कम्पेन सहितम।

कोषः—भीतिभीः साध्वस भयम् 'कूर्चमस्त्री' इत्यमरः।

व्याकरणम् = प्र + नम् + लिट् तिप् = प्रणनाम

८. प्रश्न—:अधोलिखितपङ्क्तीनां व्याख्यानं कार्यम्।

अथ विरते भोजनप्रसङ्गे सिन्धुवादो हितवादमुद्दिश्यैवमावभाषे—"भद्र। सेयं परमेश्वरस्य परानुकम्पा यदहमिदमनन्यसुलभं सम्पत्सुखमनुभवामि। यत् पुनरुक्तवानसि तदेतदक्लेशलेशं मयाधिगतमिति तदेतदन्याय्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतस्या किलोपार्जनेऽशक्यकल्पनासंख्यातिगा विपदोऽनुभूता मया, याः स्मर्यमाणा अपि तनुमुत्पुलकयन्ति" इति।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तोपोद्घाते हितवादं कथयति सिन्धुवादः।

व्याख्या—अथ = भोजनानुरोधानन्तरम्, विरते = समाप्ते भोजनप्रसङ्गे भक्षणमहोत्सवे सिन्धुवादः = गृहस्वामी हितवादं = भारवहनशीलं द्वारप्रदेशाद् तत्समीपनानीतम् उद्दिश्य, एवम् = पुरो वक्ष्यमाणप्रकारम्, आवभाषे = उवाच—

"भद्रः—महानुभावः। सेयम् = त्वयावलोक्यमाना अस्माभिरनुभूयमाना च परमेश्वरस्य = भगवतः पराऽनुकम्पा = विशिष्टाकृपा (वर्तते) यत् = यस्मात् हेतोः, अहं = सिन्धुवादः, इदम् = सर्वजनावलोक्यमानम्, अनन्यसुलभम् = इतरैः 'जनसामान्यैरप्राप्यम्, सम्पत्सुखम् ऐश्वर्यानन्दम्, अनुभवाभि = भुनज्मि। यत् पुनः = भूयः उक्तवानसि = कथितवानसि = तदेतत् समस्तमैश्वर्यम्, अक्लेशलेशम् = आयासरहितम् मया = सिन्धुवादेन, अधिगतमिति = प्राप्तमिति तदेतत् = तवकथनम् अन्याय्यम् = न्यायविरहितमेवानुचितमेव 'एतस्याः त्वयाऽवलोक्यमानायाः सम्पदः, किल = वाक्यालङ्कारे, उपार्जने = प्राप्तकरणे, अशक्य कल्पनाः = कल्पनातीताः, संख्यातिगा = अगणिताः विपदः = आपत्तयः, मया = सिन्धुवादेन अनुभूताः = अनुभवविषयतामानीता याः = पुरोऽनुभूताः स्मर्यमाणा = स्मृतिपथमानीयमाना अपि तनुम् शरीरम् उत्पुलकयन्तिः रोमाञ्चयन्तीति।

समासः—भोजनप्रसङ्गे = भोजनस्य प्रसङ्गे, अनन्यसुलभम् = न अन्यः सोऽनन्यः तेन सुलभम्। सम्पत्सुखं = सम्पदां सुखम्, अशक्यकल्पनाः = अशक्याः कल्पनाः यासु ताः।

कोषः—शर्मसात सुखानि च', 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' 'विपत्त्यां विपदापदौ' इत्यमरः।

व्याकरणम्—स्मृ + शानच् + जस् = स्मर्यमाणाः (कर्मणियक्)

९. प्रश्नः—अधोलिखितोंऽशः सुरगिरा व्याख्येयः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथासौ समुपस्थितमतिथिगणं संबोध्यैवमवादीत् "आर्याः एषोऽहं साम्प्रतं युष्मन्मनोविनोदाय श्रमापनोदनाय च मदीया सप्तमहासिन्धुयात्रा असह्यदुःखसन्तानसम्पाता उपवर्णयिष्यामि, शृण्वन्तु भवन्तः' इत्येवमुक्त्वा स स्वां प्रथमा' सिन्धु- यात्रां वर्णयितुमित्युमुपाक्रमत—

उत्तरम्—प्रसङ्गः–कथाकारसिन्धुवादव्याहृता इमाः पङ्क्तयः श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तोपोद्घाताद् गृहीता व्याख्येयाशभूताः।

व्याख्या—अथ = क्लेशलेशसूचनानन्तरम्, असौ = सिन्धुवादः समुपस्थितम् = वर्तमानम्, अतिथिगणम् = अभ्यागतगणं, संबोध्य = सम्बोधनं कृत्वा, एवम्अग्रे वक्ष्यमाणम्, अवादीत् = अवदत्—

"आर्याः ! = सभ्याः, ! एषः = अयम्, अहं = सिन्धुवादः, साम्प्रतम् = अधुना, युष्मन्मनोविनोदाय = युष्मच्चित्तविलासाय, श्रमापनोदाय = परिश्रमापनयनाय च, मदीयाः = मत्सम्बन्धिन्याः, सप्तमहासिन्धुयात्राः = सप्तसंख्याकमहासागरयात्राः, असह्यदुःखसन्तानसम्पाता = सहनाक्षमकष्टपरम्परासम्पाताः, उपवर्णयिष्यामि = कथयिष्यामि, भवन्तः = श्रीमन्तः, शृण्वन्तु = आकर्णयन्तु" । इत्येवम् = अनया रीत्या, उक्त्वा = कथयित्वा, स = सिन्धुवादः, स्वां = निजां, प्रथमाम् = आद्यां, सिन्धुयात्रां = सागरगमनक्रियां, वर्णयितुं = कथयितुम्, इत्थं = वक्ष्यमाण प्रकारेण, उपाक्रमत् = उपक्रममकरोत्।

समासः—अतिथिगणम् = नास्ति तिथि र्यस्यासौ अतिथिः तेषां गणम्, युष्मन्मनोविनोदाय = युष्माकं मनसाम् विनोदाय, श्रमापनोदनाय = श्रमस्यापनोदनाय, सप्तमहासिन्धुयात्राः = सप्तमहासिन्धूनां यात्राः, असह्यदुःखसन्तानसम्पाताः = असह्यानां दुःखानां सन्तानानि तासां सम्पाताः।

कोषः—अधुना साम्प्रतं तथा इत्यमरः

व्याकरणम्—अपनोदना = अप् + नुद् + ल्युट् + ङे ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते।
सिन्धुवादस्यवृत्तेऽस्मिनुपोद्घातोत्यगाद्वरः ॥१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रथमासिन्धुयात्रा

८३ १. प्रश्नः—अधोलिखितांशस्य व्याख्या कार्या।

एषोऽहं यौवनावतारे नानाव्यसनलम्पटतया हापितात्मपित्र्यसम्पदधिकभागः सहसोन्मीलितलोचन ईदृशेष्वकार्येषु धनकालयो र्व्ययेनानुतप्यमानो वार्द्धके निर्धनतया संभाव्यमानानि तानि तानि दुःखान्यालोचयन् व्यग्रमानसोऽभवम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्ते सिन्धुवादः समुपस्थितान् अतिथिगणान् विशेषेण हितवादं प्रथमसिन्धुयात्राकारणम् श्रावयति अत्र ।

व्याख्या—एषः = सम्प्रति धनसम्पन्नश्रेष्ठिरूपेणावलोक्यमानः, अहं = सिन्धुवादः, यौवनावतारे = तारुण्यप्रारम्भे, नानाव्यसनलम्पटतया = बहुविधदोषा सक्ततया, हापितात्मपित्र्यसम्पदधिकभागः = व्ययीकृतस्वपैत्रिकधनाधिकांशः, सहसोन्मीलितलोचनः = अकस्मात् प्रवुद्धनेत्रः, ईदृशेषु = एतादृशेषु, अकार्येषु = दुष्कृत्येषु धनकालयोः = द्रव्यसमययोः, व्ययेन = नाशेन, अनुतप्यमानो = विहितपश्चात्तापः, वार्द्धके = वार्द्धक्ये, निर्धनतया = दरिद्रतया, सम्भाव्यमानानि = कल्प्यमानानि तानि तानि = नानाविधानि, दुःखानि = कष्टानि, आलोचयन् = सुविचारयन् व्यग्रमानसो = व्याकुलचित्तः, अभवम् = आसम् ।

समासः—यौवनावतारे = यौवनस्य अवतारे, नानाव्यसनलम्पटतया = नानाव्यसनेषु लम्पटतया, हापितात्मपित्र्यसम्पदधिकभागः = हापितः पित्र्यायाः सम्पदः अधिको भागः येन सः, सहसोन्मीलितलोचनः = सहसा उन्मीलिते लोचने यस्य सः, धनकालयोः = धनं च कालश्च तयोः, व्यग्रमानसः = व्यग्रं मानसं यस्य सः ।

कोषः—'स्वान्तं हृन्मानसं मनः' 'वृद्धसंघेऽपि वार्धकम्' इत्युभयत्राप्यमरः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याकरणम्—पितुरियं पित्र्या, अनु + तप + शानच् + सु = अनुतप्यमानः ।

२. प्रश्नः—अधोलिखितवाक्ययोः व्याख्या कार्या ।

"श्रेयो निधनं न निर्धनता" इति पितुरुपदेशमसकृत् स्मरन् तस्य च याथार्थ्यमन्तर्विभावयन्नवशिष्टं गृहतत्परिकरादि सर्वं वस्तुजातं विक्रीय सञ्चित् किञ्चिद् धननिचयस्तेन च क्रीतनानाविधपण्यगणः सांयात्रिकैः सह कृतपरिचयः समुद्रयात्राप्रवणमानसो वासरपुरं नाम सिन्धुरोधः स्थितं नगरवरं गत्वा वणिग्जनैः सम्भूय स्वधनव्ययेन सकलोपकरणैः सज्जीकृतं प्रवहणमेकं समधिरूढः सिन्धुयात्रायै प्राचलम् । प्रस्थितमात्र एव समुद्रयात्रापरायणजनसुलभास्वास्थ्यं गतः किञ्चित् सचिन्तोऽपि क्रियता कालेन स्वस्थतनुदनेकान्यन्तरीयाणि सम्प्राप्य वस्त्वन्तरविनिमयेन सहानीतं विक्रीय किञ्चिद् धनमुपार्जयम् ।

उत्तरम्—प्रसङ्गनिर्देशः—अयमंशः सिन्धुवादवृत्ताख्यगद्यग्रन्थात् गृहीतः । अस्य रचनाकारोऽस्ति श्री म० म० लक्ष्मण शास्त्री । अत्र सिन्धुवादः कथानायकः वक्ता च कथायाः स्वप्रथमयात्रायाः स्थानमाध्यमादिकं वर्णयति ।

व्याख्या—निधनं = मरणं, श्रेयः = हितकरः, न = नहि, निर्धनता = दारिद्रयम्, इति = एवम् पितुः = जनकस्य, उपदेशम् = प्रतिबोधनम् असकृत् = बारं बारं, स्मरन् = चिन्तयन् तस्य = तातोपदेशस्य, च, याथार्थ्यम् = वास्तविकताम्, अन्तः = मनसि, विभावयन् = विचारयन्, अवशिष्टं = शिष्टं, सर्वं = सकलं, गृहतत्परिकरादि = गेह तत्समूहादि, वस्तुजातं = पदार्थसमूहं समस्तभूवसनपात्रादिकम् इति भावः, विक्रीय, सञ्चितकिञ्चिद् धननिचयः = उपार्जितस्वल्पधनराशिः, तेन = उपार्जितधनेन. च,क्रीतनानाविधपण्यगणः = गृहीतबहुविधविक्रेयवस्तुनिचयः, सांयात्रिकैः = पोतवणिग्भिः, सह = साकं, कृतपरिचयः = विहितसंस्तवः, समुद्रयात्राप्रवणमानसो = सिन्धुगमनलग्नचेता, वासरपुरं नाम = एतत्संज्ञकम्, सिन्धुरोधः स्थितं = सागरतटगतं,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नगरवरं = पुरश्रेष्ठं, गत्वा = अवाप्य, वणिग्जनैः = व्यापारनिरतैः सम्भूय = समवेत्य, स्वधनव्ययेन = निजार्थव्ययपूर्वकम्, सकलोपकरणैः = सम्पूर्णपदार्थैः, सज्जीकृतं = सुसम्पन्नम् प्रवहणम् = पोतम्, समधिरूढ = आरूढः सिन्धुयात्रायै = सागरप्रवासाय, प्राचलस् = प्रस्थानमकरवम्। प्रस्थितमात्र एव = कृतप्रस्थानमात्र एव, समुद्रयात्रापरायणजनसुलभाऽस्वास्थ्यं = सिन्धुयात्रालीननरसुलभास्वस्थतां, गतः = प्राप्तः किञ्चित् = स्तोकम्,सचिन्तोऽपि = चिन्तायुतोऽपि कियता = स्वल्पेन, कालेन = समयेन स्वस्थतनुः = प्रकृतिस्थः, अनेकान्यन्तरीपाणि = बहुद्वीपान्, सम्प्राप्य = अवाप्य, वस्त्वन्तरविनिमयेन = स्वस्तुप्रदानपूर्वकपरवस्तुग्रहणेन, सहानीतं = साकमानीतम्, वस्तुजातं = पदार्थनिचयं विक्रीय, किञ्चित् = स्वल्पं, धनम् = अर्थम्, उपार्जयम् = समपादयम्। अहं सिन्धुवादः इति शेषः।

समासः—गृहतत्परिकरादि = गृहं तत्परिकरश्च आदौ यस्मिन् तत्, वस्तुजातं = वस्तूनां समूहम्, सञ्चितकिञ्चित्धननिचयः = सञ्चितः किञ्चिद् धनस्य निचयः येन सः, क्रीतनानाविधपण्यगणः = क्रीतः नानाविधान पण्यानां गणः, कृतपरिचयः = कृतः परिचयो येन सः, समुद्रयात्राप्रवणमानसो = समुद्रस्य यात्राणां प्रवणं मानसं यस्य सः, सिन्धुरोधःस्थितम् = सिन्धोः रोधसि स्थितं, नगरवरं = नगरेषुवरं, स्वधनव्ययेन = स्वस्य धनस्य व्ययेन, सकलोपकरणैः = सकलानि च तान्युपकरणानि च, तैः। समुद्रयात्रापरायणजनसुलभास्वास्थ्यम् = समुद्रस्य यात्रायां प्रवीणा ये जनाः तैः सुलभम् अस्वास्थ्यम्, स्वस्थतनुः = स्वस्था तनुः यस्य सः, वस्त्वन्तरविनिमयेन = अन्यं वस्तु = वस्त्वन्तरं तस्य विनिमयेन।

कोषः—'सांयात्रिकः पोतवणिग्' 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्' इत्युभयत्राप्यमरः।

व्याकरणम्—संयात्रा प्रयोजनं येषां ते सांयात्रिका। तदस्यप्रयोजनम् इति ठञ्।

३. प्रश्नः—व्याख्यायताम् गद्यांशोऽधोलिखितः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एकस्मिन्नहनि सवेगं वहति पोते तदधिरूढाः सर्वे वयं जलमध्यादुद्गतं हरितवर्णेन तुलितनवशाद्वलस्थलं नातिविशालं द्वीपमेकमद्राक्षम् । पोताध्यक्षे च पोतगतिं समवरुद्ध्य तं द्वीपमवरुरुक्षून् कांश्चित् प्रवहणाधिरूढांस्तथा कर्तुं कृतानुमतौ तैः सार्धमहमपि तत्रावतरम् । अथास्मासु भोजनपानादिभि र्विनोदैः सिन्धुयात्राक्लममपनयत्सु सहसा विचलन् सः द्वीपः कमप्यनुत्प्रेक्षणीयं महाभयसम्भ्रमं जनयामास ।

उत्तरम्—प्रसङ्गादिकम्—श्री म० म० लक्ष्मणशास्त्रिविरचितायां सिन्धुवादवृत्ताङ्गभूतप्रथमसिन्धुयात्रायांमहदद्भुतरसावतरणिकायां प्रथमानुच्छेदः । सिन्धुवादोऽत्र कथानायकः जीवितसंशयं क्षणनिचयं वर्णयति अक्लेशलेशमिति हितवादकथननिरासाय ।

व्याख्या—एकस्मिन् = अन्यतमे, अहनिः दिवसे, सवेगं = तीव्रं, वहति गच्छति, पोते = प्रवहणे, तदधिरूढाः = कृतपोतारोहणाः, सर्वे समस्ताः, वयं = सिन्धुगन्तारः, जलमध्याद् = सलिलाभ्यन्तरात्, उद्गतं = उपरि दृश्यमानं हरितवर्णेन = शुककान्तिनिभेन तुलितनवशाद्वलस्थलम् = नूतनतृणभूमिसमानं, द्वीपम् = अन्तरीपम् एकम् अद्राक्षम् = अपश्यम् ।

पोताध्यक्षे = यानपात्रस्वामिनि, च पोतगति = वहित्रगति, समवरुद्ध्य निरुद्ध्य, तं = पूर्वदृष्टं द्वीपम् = अन्तरीयम्, अवरुरुक्षून् = अवरोहणोत्सुकान्, कश्चित् = कतिपयान्, प्रवहणधिरूढान् = वहित्रस्थितान्, तथाकर्तुम् = अवरोहणाय कृतानुमतौ = प्राप्तादेशे सति तैः = समुद्रयात्रिभिः, सार्धं = सह अहमपि = सिन्धुवादोऽपि तत्र = दृष्टद्वीपे, अवातरम् = अवतरणमकरवम् । अथ = द्वीपावतरणानन्तरम्, अस्मासु = समुद्रयात्रारसिकेषुः, भोजनपाना- अशनपानादिभिः, विनोदैः = मनोरञ्जनैः, सिन्धुयात्राक्लमम् = सागरगमनक्लेशम् अपनयत्सु = दूरीकरणनिरतेषु सत्सु सहसा = अकस्मात् विचलन् = कम्पमानः, सः = पूर्ववर्णितः, द्वीपः कमपि = अनिर्वचनीयम्, अनुत्प्रेक्षणीयम् = अकल्पनीयं महाभयसम्भ्रमम् = प्रचुरभयोद्वेगम्, जनयामास = उत्पादयामास ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समासः—तदधिरुढाः = तम् अधिरुढाः, जलमध्यात् = जलस्य मध्यात्, हरितवर्णेन = हरितेन वर्णेन, तुलितनवशाद्वलस्थलम् = तुलितं नवं शाद्वल-स्थलं येन तत्, पोताध्यक्षे = पोतस्य अध्यक्षे, पोतगतिं = पोतस्यगतिं, प्रवहणाधिरुढान् = प्रवहणम् अधिरुढान् भोजनयानादिभिः = भोजनं च पानं च आदौ येषां तैः, सिन्धुयात्राक्लमम् = सिन्धोः यात्रायाः क्लमम्, महाभय-सम्भ्रमं = महता भयेन सम्भ्रमः तं ।

कोषः—'कर्णरिथः प्रवहणम्' 'यानपात्रे शिशौ पोतः' इत्युभयत्राप्यमरः ।

व्याकरणम्—अवरुरुक्षून = अव + रुह + सन् + उ + शस् । अद्राक्ष्म = दृश् + लुङ् ।

४. प्रश्न—अधोलिखितोंऽशः व्याख्येयः ।

पोतस्था जनाश्च तं भूमिकम्पमवलोक्य सपदि प्रवहणमारोढुमस्मानुच्चैराह्वयन् । स चास्माभिरन्तरीपतया गृहीतो वस्तुतोऽनेकगव्यूतिपरिणाहो महाग्राह आसीत्, तत्र च केचिच्चपलाः पोतसंप्राप्तये सपदि प्लावानारुरुहुः परेचात्मानं सिन्धौ निक्षिप्य बाहुभ्यां तरणे तत्परा बभूवुः । अहं तु तत्रैव द्वीपत्वेनाध्यवसिते महाग्राहे स्थितः क्षणात्तस्मिन् सिन्धुतलविमग्ने दैवा-दधिगतं काष्ठफलकमेकमवलम्ब्योत्तालकल्लोलमालाभिरूपर्यधश्च क्षिप्यमाणो दैवमाक्रोशन्ननन्यशरणोऽभवम् ।

उत्तरम्—प्रसङ्गः—गद्यांशोऽयं श्री० म० म० लक्ष्मणशास्त्रिविरचित-सिन्धुवादवृत्तप्रथमयात्रातो गृहीतः । सिन्धुवादस्य प्राणाश्चात्र संशयारूढा इव प्रदर्शिता । तस्य संघर्षशीलता प्रशस्या ।

व्याख्या—पोतस्था = यानगता, जनाः = लोकाः, च, तं = गतानुच्छेद-वर्णितम्, भूमिकम्पं = महाग्राहपार्श्वपरिवर्तनरूपाश्रयकम्पम्, अवलोक्य = विलोक्य, सपदि = शीघ्रं, प्रवहणम् = वहित्रम्, आरोढुम् = आरोहणाय, अस्मान् = महाग्राहरुपद्वीपावतरितान्, उच्चैः = तारस्वेरेण, आह्वयन् = आकारयन् । सः = द्वीपरूपेणभासमानः च, अस्माभिः वासरपुरात् प्रस्थितैः समुद्रयात्रारसिकैः कल्पितद्वीपावतरितैः त्यक्तप्रथमपोतैः, अन्तरीपतया = द्वीपरूपेण, गृहीतो = द्वीपोऽयमिति बुद्ध्या निर्धारितो, वस्तुतो = याथार्थ्येन

 CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनेकगव्यूतिपरिणाहो = बहुक्रोशयुगलविशालो, महाग्राहः = जलजन्तुविशेषः, आसीत्, तत्र = कल्पितद्वीपरूपमहाग्राहे, केचित = कल्पितद्वीपावतरिताः कतिपययात्रिणः, चपला = स्फूर्तिशीलाः, पोतसंप्राप्तये = प्रवहणावाप्तये, प्लावान् = लघुनौकाः, आरुरुहुः = आरोहणं चक्रुः, परे = अन्ये, च, आत्मनं = स्वं, सिन्धौ = महासागरे, निक्षिप्य = क्षिप्त्वा, बाहुभ्यां = भुजाभ्यां, तरणे = सन्तरणे, तत्पराः = लीनाः, बभूवुः = अभवन्, अहं = सिन्धुवादः कथानायकः, तु, तत्रैव = कल्पितद्वीपे, द्वीपत्वेन = अन्तरीपत्वेन, अध्यवसिते = कल्पिते, महाग्राहे = जलजन्तुविशेषे, स्थितः = वर्तमानः, क्षणात् = पलात्, तस्मिन् = कल्पितद्वीपे, सिन्धुतलविमग्ने = सागरजलमग्ने, दैवात् = सौभाग्यात्, अधिगतं = प्राप्तम्, काष्ठफलकम् = काष्ठपट्टिकाम्, एकम् = अन्यतम्, अवलम्ब्य = आश्रित्य, उत्तालकल्लोलमालाभिः = उत्तुङ्गतरङ्गजालैः, उपर्यधः = उपरिष्टादधस्तात् च, क्षिप्यमाणः = प्रक्षिप्यमाणः, दैवम् = भाग्यम्, आक्रोशन् = आक्रन्दन्, अनन्यशरणो = अनाथो, अभवम् = अभूवम् ।

समासः—भूमिकम्पं = भूमेः कम्पम्, अनेकगव्यूतिपरिणाहः = अनेकाः गव्यूतयः परिणाहो यस्य सः, पोतसम्प्राप्तये = पोतस्य सम्प्राप्तये, सिन्धुतलविमग्ने = सिन्धोः तले निमग्ने, काष्ठफलकम् = काष्ठस्यफलकम्, उत्तालकल्लोलमालाभिः = उत्तालानां कल्लोलानां मालाभिः, अनन्यशरणः = न विद्यते अन्यत्शरणं यस्य सः ।

कोषः = 'गव्यूतिः स्त्री क्रोशयुगम्' 'परिणाहो विशालता' इत्युभयत्राप्यमरः ।

व्याकरणम् = शिप्यमाणः = क्षिय + यक् + शानच्

आक्रोशन् = आ + क्रुश + शतृ

५. प्रश्नः—व्याख्यायताम् अधोलिखितोंऽशः ।

अत्रान्तरे पोताध्यक्षः पवनमनुकूलपलभ्य पोतोपास्थितैः कतिभिजनैः सह मां तस्यामवस्थायाम् अशरणं समुत्सृज्य प्रयाणमकरोत् । अहं च तं सकलं दिवसं निशीथिनी च फलकाश्रयेण प्लवमानो नैर्वल्यनैराश्याभ्याम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णवम् = आकर्णयम् । एकश्च, जनः = मनुष्यः, तत्क्षणं = अवाप्यभद्र = महाशय, कस्त्वम् को भवानिति ? कुतः = कस्मात् स्थानात्, समायातः = आगतः ? इति च अपृच्छत् = पृष्ठवान् । श्रुतमदुदन्तो = ज्ञातमत्समाचारो, असौ = सः, मा = सिन्धुवादं, हस्ते = करे, अवलम्ब्य = आदाय, कतिपयैः कैश्चन्, अपरैः = अन्यैः, पुरुषैः = जनैः, अधिष्ठितम् = सेवितम् गह्वरम् = गुहाम्, एकम् = अन्यतम्, अनयत् = नयति स्म । तत्र = गह्वरे तेषां = पुरुषाणां सन्दर्शनेन = अवलोकनेन, अहमिव, = सिन्धुवाद इव तेऽपि = गह्वरस्था अपि मां सिन्धुवादं विलोक्य = दृष्ट्वा, विस्मिताः = आश्चर्यान्विता,: तस्थुः = जाताः ।

समासः—गभस्तिमालिनि = गभस्तीनां माला अस्ति अस्य इति माली तस्मिन्, परिश्रमातिशयेन = परिश्रमस्य अतिशयेन, क्लान्तगात्रः = क्लान्तं गात्रं यस्य सः, क्षुत्क्षामकण्ठो = क्षुधया क्षामः कण्ठो यस्य सः, वृक्षावशीर्णानि = वृक्षेभ्यः अवशीर्णानि, स्रोतोजलम् = स्रोतसः जलम्, सभयकुतूचलं भयेन कुतूहलेन च सहितम्, भूमिगर्भात् = भूमेः गर्भात्, मनुजशब्दम् = मनुजस्य शब्दम् ।

कोषः—किरणोस्तमयूखांशुगभस्ति घृणिरश्मयः 'स्थूणास्तम्भेऽपि वेश्मनः' इत्युभयत्राप्यमरः ।

व्याकरणम् = माला अस्ति अस्य इति माली व्रीह्यादिभ्यश्च इति सूत्रेण इतीनप्रत्ययः ।

७. प्रश्न—सप्रसङ्गम् व्याख्येयोऽयं गद्यभागः । तदनु तैरुपहितं किञ्चिदशनं भुक्त्वा मया तत्र निर्जनोद्देशेऽवस्थितिकारणं पृष्टास्त एवमब्रुवन्—

"वयं खलु एतद्द्वीपाधिपस्य महाराजमिहिरस्याश्वपालास्तदीयायाः कश्चिदवडवा गृहीत्वा प्रतिहायनमेतस्मिन् ऋताविहागमनशीलेन सैन्धवेन वाजिना ताः संयोज्याद्भुतनवतुरङ्गोत्पादने नियोजिता इहागच्छामः । आहितगर्भाश्च ता गृहीत्वा भूयस्तं प्रापयामः । एवमुत्पन्ना अभिनवा वाजिनः सैन्धवा नाम कथ्यन्ते । केवलं राजवाह्यतां चोपयान्ति । श्वो वयमितः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रस्थास्यामहे । दिष्ट्याऽद्य सम्प्राप्तोऽसि । अन्यथा नूनमत्र विजनप्रदेशेऽलब्धजीवनसाधन उपरतोऽ भवष्यि" इति ।

उत्तरम्—प्रसङ्ग—श्री म० म० लक्ष्मण शास्त्रिविरचितसिन्धुवादवृत्तगद्यग्रन्थप्रथमसिन्धुयात्रातो गृहीतोऽयमंशः मिहिरनृपतेरश्वपालकैः सह सिन्धुवादपरिचयोऽत्र चित्रितः विजनप्रदेशे ।

व्याख्या—तदनु = तत्पश्चात्, तैः = मिहिरनृपतिघोटकपालैः, उपहृतं दत्तं, किञ्चिदशनम् = भोजनण् भुक्त्वा = आस्वाद्य, मया = सिन्धुवादेन, तत्र तस्मिन् निर्जनोद्देशे = मनुष्यरहितस्थाने, अवस्थितिकारणम् वासहेतुम् पृष्टा = जिज्ञासिता, ते = अश्वपाला एवम् = वक्ष्यमाण प्रकारेण अब्रुवन = अकथयनवयं = मिहिरनृपतेरश्वपालकाः सिन्धुतटागताः, खलु = वाक्यालङ्कारे, एतद्द्वीपाधिपस्य = एतदन्तरीपराजस्य, महाराजमिहिरस्य = मिहिरनामकस्य, अश्वपालाः = घोटकपालकाः तदीयाः नृपतिसम्बन्धिनीः, काश्चित् = कतिपयाः वडवाः = घोटकाङ्गनाः, गृहीत्वा = समादाय, प्रतिहायनं = प्रत्येकवर्षम्, एतस्मिन् = अस्मिन्, ऋतौ = कालविशेषे, इह = निर्जनप्रदेशे सिन्धुतटे आगमनशीलेन = समागतवता, सैन्धवेन = सागरजेन वाजिना = अश्वेन, ताः = वडवाः संयोज्य = सङ्गमय्य अद्भुतनवतुरङ्गोत्पादने = विस्मयावहनवीनघोटकसमुत्पत्तौ, नियोजिता = कृतनियुक्तयः, इह प्रदेशेअस्मिन् यत्र भवान् स्थितः सम्पृति, आगच्छामः । आहितगर्भाश्च = स्थापितगर्भाश्च ताः = वडवाः गृहीत्वा = समादाय, भूयः पुनः, तं = मिहिरनृपतिं, प्रापयामः, एवम् = अनेन प्रकारेण उत्पन्नाः = जाताः अभिनवाः = नूतनाः वाजिनः = अश्वाः, सैन्धवा = एतद्विशिष्टपदवीकाः नाम कथ्यन्ते = ज्ञायन्ते, लोके इति शेषः । केवलं = मात्रं राजवाह्यतां = नृपारोहणीयतां, च, उपयान्ति = गच्छन्ति । श्वो = आगामिदिने, वयम् पूर्ववर्णिता अश्वपालाः, इतः = अस्मात् विजनदेशाद् यत्र वार्ता प्रचलति प्रस्थास्यामहे = प्रस्थानं (राजधानी प्रति) करिष्यामहे ।

दिष्ट्या = सौभाग्यात्, अद्य = वर्तमानेऽह्नि सम्प्राप्तोऽसि = मिलितोऽसि । अन्यथा = नोचेत्, अद्य तवागमने असति, नूनम् = निश्चयेन अत्र = सम्प्रति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यत्र समुपस्थिताः, विजनप्रदेशे नररहितदेशे, अलब्धजीवनसाधनः, अप्राप्त-प्राणरक्षासामग्रीकः उपरतो = मृतो, अभविष्यः = जातः । इति = अश्वपाल-भाषणविरामः ।

समासः—निर्जनोद्देशे = निर्जने उद्देशे, अवस्थितिकारणम् अवस्थितेः कारणम् । एतद्द्वीपाधिपस्य एतस्य द्वीपस्य अधिपस्य, महाराजमिहिरस्य = महाश्चासौ राजा च महाराजः, महाराजश्चासौ मिहिरश्च = महाराजमिहिरस्तस्य, अश्वपालाः = अश्वं पालयन्तीति अश्वपालाः, अद्भुतनवतुरङ्गोत्पादने = अद्भुतानां नवानां तुरङ्गमानाम् उत्पादने, आहितगर्भाः = आहितः गर्भो यासु ताः, अलब्धजीवनसाधनः = अलब्धं जीवनस्य साधनं येन सः ।

कोषः—'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' 'वाम्यश्वा वडवा' इत्युभयत्राप्यमरः ।

व्याकरणम्—सिन्धोरयं सैन्धवः ।

८. प्रश्नः—सप्रसङ्गं व्याख्येयोऽयं गद्यांशः ।

तेषु चैवं वदत्सु सहसा तैरुपवर्णितः स सैन्धवोऽश्वो जलाभ्यन्तरादाविर्भूय ता वडवा आक्रमितुं कृतसरम्भस्तैरश्वपालैः कोलाहलेन विद्रावितो भूयो जलाभ्यन्तरे न्यमज्जत् ।

अथवा

अन्येद्यु र्गृहीतवडवैस्तैः सह तद्द्वीपाधिराजस्य महाराजमिहिरस्य राजधानीं गतोऽहं कृतराजदर्शनः सकुतुकं पृष्टो निखिलं स्वं वृत्तमाख्याय दयार्द्रहृदयेन तेनोदाराशयेन प्रसादीकृतेन द्रविणविसरेण प्रमुदितमानसस्तत्रैवावात्सम् । तत्र च वसन् मदेककर्मभिः सार्थवाहै विशेषतो वैदेशिकै र्विदामपुरवार्ताजिज्ञासया तदुद्दिश्य गन्तुकामैः कैरपि सह प्रतिजिगमिषया चोपचितपरिचयः सद्भिः सङ्गच्छमानस्तद्वार्तालापेनात्मानं विनोदयन् मिहिरराजसभां प्रत्यहमुपतिष्ठमानस्तत्सामन्तभूमिपालैरधिकारिवर्गैश्च सह परिवर्धितप्रणयस्तान् स्वदेशवृत्तान्तै र्विनोदयन् कञ्चन कालमयापयम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—सैन्धवाश्वदर्शनप्रसङ्गोऽत्र चित्रयति कविः श्री म० म० लक्ष्मणशास्त्री सिन्धुवादवृत्तनामके गद्यकाव्ये प्रथमसिन्धुयात्रावर्णने। सिन्धुवादश्च हितवादं श्रावयति कथामिमाम् ।

व्याख्या—तेषु = घोटकपालकेषु, च, एवम् = इत्थम्, वदत्सु = कथयत्सु, सहसा = अकस्मात्, तैः = सेवकैः, उप्रवर्णितः = वर्णनविषयीकृतः, सः = ख्यातः, सैन्धवो = सागरजः, अश्वः = हयः, जलाभ्यन्तरात् = सलिलमध्यात्, आविर्भूयः = प्रकटीभूय, ता = मिहिरनृपतिप्रेषिताः, वडवाः = घोटकाङ्गनाः, आक्रमितुम् = रन्तुम्, कृतसरम्भः = कृतोद्योगः, तैं = पूर्वकथितैः, अश्वपालैः = घोटकरक्षकैः, कोलाहलेन = कलकलशब्देन, विद्रावितः = अपसारितः, भूयः = पुनः,जलाभ्यन्तरे = सलिलमध्ये, न्यमज्जत् = निमग्नोऽभवत् ।

समासः—जलाभ्यन्तराद् = जलस्य अभ्यन्तरात्, कृतसंरम्भः = कृतः सरम्भः येन सः, अश्वपालै = अश्वान् पालयन्ति इति अश्वपालास्तैः, जलाभ्यन्तरे = जलस्य अभ्यन्तरे ।

कोषः—आपः स्त्री भूम्नि वार् वारि सलिलं कमलं जलम् इत्यमरः ।

व्याकरणम्—वद् + शतृ + सुप् = वदत्सु ।

अथवा

प्रसङ्गः—गद्यांशेऽस्मिन् वर्णयति कविः सिन्धुवादस्य मिहिरनृपतिदर्शनं तत्र कालयापनं च सिन्धुवादवृत्तस्य प्रथमसिन्धुयात्रायां श्री म० म० लक्ष्मणशास्त्रिविरचितायाम् ।

व्याख्या—अन्येद्युः = अपरस्मिन् दिने, गृहीतवडवैः धृतघोटकाङ्गनैः, तैं = अश्वपालैः विजनप्रदेशसहायकभूतैः, सह = साकम्, तद्द्वीपाधिराजस्य = तद्द्वीपस्वामिनः, महाराजमिहिरस्य = एतन्नामकनृपतेः, राजधानीं = प्रशासनकेन्द्रम्, गतः = सम्प्राप्तः, अहं = सिन्धुवादः, कृतराजदर्शनः = विहित महिरमहीपावलोकनः, सकुतुकम् = उत्सुकतापूर्वं, पृष्टः = जिज्ञासितः, निखिलं = पूर्णं, स्वं = निजं, वृत्तम् = यात्राविवरणम्, आख्याय = कथयित्वा, दयार्द्रहृदयेन = करुणाकलितान्तः = करणेन, तेन = मिहिरभूमिपेन, उदारा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शयेन = कृपासागरेण, प्रसादीकृतेन = उपहारस्वरूपदत्तेन, द्रविणविसरेण = धननिवहेन, प्रमुदितमानसः = प्रसन्नमनाः तत्रैव = मिहिरमहीपतिराजधान्यामेव, अवात्सम् = न्यवसम । तत्र = मिहिरनृपतिराजधान्यां, च, वसन् = वासं कुर्वन्, मदेककर्मभिः = मत्समानक्रियाव्यापृतैः, सार्थवाहैः = वणिग्जनैः, विशेषतो = विशेषेण, वैदेशिकैः = परदेशवास्तव्यैः, विदामपुरवार्ताजिज्ञासया = विदामपुरकथाज्ञानेच्छया, तदुद्दिश्य = विदामपुरमुद्दिश्य, गन्तुकामैः = यानोत्सुकैः, कैरपि = गमननिरतैः यात्रिभिः, सह = सार्धम्, प्रतिजिगमिषया = प्रतिनिवर्तनेच्छया, च, उपचितपरिचयः = वृद्धसंस्तवः, सद्भिः = सज्जनैः, सङ्गच्छमानः = सहचरन्, तद्वार्तालापेनसज्जनपरस्परालापेन, आत्मानं = स्वं सिन्धुवादमिति विनोदयन् = आह्लादयन्, मिहिरराजसभां = मिहिरनृपसंसदं, प्रत्यहं = प्रतिदिनम् उपतिष्ठमानः = समुपस्थितः सन्, तत्सामन्तभूमिपालै = तत्सामन्तभूमिपैः, अधिकारिवर्गैश्च = प्रभुतासम्पन्नजनसमूहैश्च, सह = सार्धम्, परिवर्धितप्रणयः वृद्धस्नेहः, तान् = सामन्तनृपाधिकारिवर्गान्, स्वदेशवृत्तान्तैः = स्वराष्ट्रविषयकथाभिः, विनोदयन् = मनोरञ्जयन्, कञ्चन = किञ्चिम् = कालं = समयम्, अयावयम् = अवाहयम् ।

समासः—गृहीतवडवैः = गृहीताः वडवा यैस्तैः, तद्द्वीपाधिराजस्य = तस्य द्वीपस्य अधिराजस्य, महाराजमिहिरस्य = महान् चासौ राजा च महाराज, महाराजश्चासौ मिहिरश्च महाराजमिहिरस्तस्य कृतदानदर्शनः = कृतः राज्ञो दर्शनं येन सः, दयार्द्रहृदयेन = दयया आर्द्रं हृदयं यस्य तेन, उदाराशयेन = उदारःआशयो यस्य तेन, द्रविणविसरेण = द्रविणस्य विसरेण प्रमुदितमनाः = प्रमुदितं मनो यस्य सः मदेककर्मभिः = मम एकं कर्म येषां तैः सार्थवाहैः सार्थं वहन्ति इति तैः, विदामपुरवार्ता जिज्ञासया = विदामपुरस्य वार्ता = विदामपुरवार्ता तस्याः जिज्ञासा तया, गन्तुकामैः = गन्तुं कामः येषां तैः, उपचितपरिचयः = उपचित परिचयो येन सः, मिहिरराजसभां = मिहिरराजस्य सभां, सामन्तभूमिपालैः = सामान्ताश्च ते

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूमिपालश्च तैः परिवार्धितप्रणयः=परिवर्धितः प्रणयो येन सः स्वदेश वृत्तान्तैः=स्वदेशस्य वृत्तान्तैः।

कोषः—वैदेहकः सार्थवाहो नैगमी वणिजो वणिक इत्यमरः

व्याकरणम्—अन्येद्युः—अन्य शब्दात् एद्युस् प्रत्ययः।

९. प्रश्नः—सप्रसङ्गम् व्याख्यायताभधोऽङ्कितो गद्यभागः। एवं वहत्यनेहसि सोहमेकस्मिन्नहानि पोतावतार सिन्धुरोधसि स्थित आरात् द्वीपमुपसर्पन्तम् पोतमेकं दृशोर्विषयतामनैषम्।

अथावतारितपोतावरोधनकीलेषु पोतवाहेषु पोतगतराशीनधितटं प्रापयत्सु वणिग्जनेषु च रोधः—स्थितेषु ससम्भ्रमं स्वस्ववस्तुजातायत्तीकरणप्रवणेषु विलिखितात्मनामधेयान् समुद्गकान् नीरीक्ष्य त इमे मदीया एव प्रयाणसमये पोतमारोपिता समुद्गका इति निश्चित्य प्रत्यभिज्ञाय च तं पोताध्यक्षमहमपृच्छम्—

उत्तरम्—प्रसङ्गनिर्देशः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्ताख्यगद्यवन्धप्रथमयात्रातो गृहीतोऽयं गद्यभागः। विधिवशादत्र मिहिरमहीदतिराज्ये वसन् सिन्धुवादः सागरतटस्थः कस्मिश्चिदहनि स्वपण्यवस्तुवाहकं पोतं पश्यति वणिग्जनैः तटावतारितानि स्ववस्तून्यपि पश्यति। एतदेवात्र वर्णयति कविः—

व्याख्या—एवं=प्रकारेणानेन वहति=गच्छति, अनेहसि=समये, सः=पूर्ववर्णितः, अहम्=सिन्धुवादः, एकस्मिन्=अन्यतमे, अह्नि=दिवसे, पोतावतार सिन्धुरोधसि=जलयानावतरणस्थलभूतसागरतटे, स्थितः=वर्तमानः, आरात्=समीप एव द्वीपम्=मिहिरमहीपतिराज्यभूतमन्तरीदम्, उपसर्पन्तम्=आयान्तम्, पोतमेकं=जलयानमेकम्, दृशोः=नेत्रयाः, विषयतामनैषम्=अयश्यम्।

अथ=अनन्तरम्, पोतवाहेषु=वहित्रनियामकेषु, अवतारितपोतावरोधनकीलेषु=भूमिस्थापित जलयानावरोधकलौहमहाकीलेषु लङ्गर इति नाम्ना प्रसिद्धेषु लोके, पोतवाहेषु=वहित्रचालकेषु, पोतगतपण्यराशीन्=यानस्थविक्रेयवस्तुसमूहान्, अधितटं=सागरतटोपरि प्रापयत्सु=नयत्सु,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वणिग्जनेषु = व्यापारिवर्गेषु, च, रोधः स्थितेषुः तटगतेषु, ससम्भ्रमं = शीघ्रतापूर्वं, स्वस्ववस्तुजातायत्तीकरणप्रवणेषु = निजवस्तुस्वायत्तीकरण-रतेषु, विलिखितात्मनामधेयान् = लिखितस्वनामाक्षरजातान्, समुद्ग-कान् = सम्पुटकान् निरीक्ष्य = अवलोक्य, ते = पुरोऽवलोक्यमानाः इमे = मनसाङ्गुल्या वा निर्दिष्टाः, मदीया = मामकीना, एव, प्रयाणसमये = यात्राप्रारम्भे, पोतम् = जलयानम्, आरोपिता = आरोहिता, समुद्गका = सम्पुटका इति, निश्चित्य = निर्धार्य, प्रत्यभिज्ञाय परिचिन्वं,श्च तं = पूर्वज्ञातं, पोताध्यक्षं = यान सञ्चालकम्, अहं = कथावक्ता सिन्धुवादेतिनामा अपृच्छम् = पृष्टवान् ।

समासः—पोतावतारसिन्धुरोधसि = पोताः अवतरन्ति यत्र एवम्भूतम् यत् सिन्धोः रोधसि रोधः तस्मिन्, अवतारितपोतावरोधनकीलेषु = अव-तारितपोतावरोधनकीलेषु = अवतारितानि पोतानाम् अवरोधनाय कीलानि यैः तेषु, पोतगतपण्यराशीन् = पोते गतानां पण्यानां राशीन्, स्वस्ववस्तु जातायत्तीकरण प्रवणेषु = स्वेषां स्वेषां वस्तूनां जातानाम् आयत्तीकरणे प्रवणेषु, विलिखितात्मनामधेयान् = विलिखितम् आत्मनो नामधेयं येषु तान्, प्रयाणसमये = प्रयाणस्य समये, पोताध्यक्षम् = पोतस्य अध्यक्षम् ।

कोषः—'कालो दिष्टोऽनेहापि' 'नियामकाः पोतवाहाः' 'समुद्गकाः सम्पुटका' इति सर्वत्राच्यमरः ।

व्याकरणम् = वाहयति इति वाहः । वहः । (प्रापणे) णिच् ।

१०. प्रश्नः—अधोलिखितांशाः व्याख्येयाः ।

"आर्य ! कस्यैते समुद्गकाः ?"

स प्रत्युवाच—एते खलु मत्पोतमधिरुढ पूर्वस्य विदामपुरनिवासिनः आर्यसिन्धुवादस्य सम्पुटकाः । एकस्मिन्नहनि सिन्धुमध्यान्निर्गत्यावस्थितं महाग्राहमेकं भ्रमादन्तरीपं मन्वानेष्वस्मासु कतिपये सिन्धुवादसहितास्त-त्रावतीर्य पाकादिक्रियां कर्तुमारभन्त । तत्तापेनोद्विग्नश्च स ग्राहः सहसैव सिन्धुतले न्यमज्जत् । तस्मिन्नतिघोरे सङ्कटे तेषु वहवो जना सिन्धुतले प्रापुः ससिन्धुवादाः । साम्प्रतं तदीयं पण्यराशिमेतत् समुद्गकसन्दोहस्थं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विक्रीय तल्लाभरूपमखिलं वसु यः कश्चन् तस्य रिक्थहरः तस्मै प्रतिपाद्य विगतचिन्तो भवितुमिच्छामि इति ।

उत्तरम्—प्रसङ्गनिर्देशः—गद्यांशोऽयं श्री म० म० लक्ष्मणशास्त्रिरचित-सिन्धुवादवृत्ताख्यकथायांप्रथमसिन्धुयात्रातो गृहीतः । अत्र प्रथम(पङ्क्तिः) सिन्धुवादस्य प्रश्नभूता । शेषाश्च पोताध्यक्षस्योत्तरभूताः ।

व्याख्या—आर्य !—(पोताध्यक्षसम्बोधनमेतत्) भद्र ! कस्य = पुरुष-विशेषस्य, एते = पुरोवलोक्यमानाः समुद्गकाः = सम्पुटकाः ? इति पप्रच्छ सिन्धुवादः कथानायकः विपत्पारावारसमुत्तीर्णः पोताध्यक्षं । सः = सौ-भाग्यात् दृष्टः मिहिरनृपतिराज्यसम्बद्धसिन्धुतटस्थापितपोतः वासरपुरचलितः सिन्धुवादपण्यवाहकः दृष्टसिन्धुवादसागरमज्जनः, प्रत्युवाच = प्रत्युत्तरमदात् मृतरूपेण स्वीकृताय किन्तु प्रबलसौभाग्यात् शिष्टाय, मिहिरनृपाश्वपालैरत्रा नीताय सिन्धुवादाय—एते = त्वया पृष्टा मत्सम्मुखस्थाः खलु = निश्चयेन्, मत्पोतम् = मत्प्रवहणम्, अधिरूढपूर्वस्य = आरूढपूर्वस्य, विदामपुर-निवासिनः = विदामपुरवास्तव्यस्य, आर्यसिन्धुवादस्य = एतन्नामकवणिग्ज-नस्य, सम्पुटकाः = समुद्गकाः । एकस्मिन् = विशिष्टे, अहनि = दिने सिन्धुमध्यात् = सागराभ्यन्तरात्, निर्गत्य = बहिरागत्य, अवस्थितमहा-ग्राहमेकम् = स्थितावहारमेकम्, भ्रमात् = भ्रान्तिवशात्, अन्तरीपं = द्वीपं, मन्वानेषु = निर्धारयत्सु, अस्मासु = सिन्धु—यात्रानिरतेषु कतिपये = केचित्, सिन्धुवादसहिताः = सिन्धुवादाद्यो यात्रिणः तत्र = कल्पितद्वीपरूपमहाग्राहे, अवतीर्य = अवतरणं कृत्वा, पाकादिक्रियां = भोजननिर्माणादिक्रियां, कर्तुं = सम्पादयितुम्, आरभन्त = प्रारभन्त । तत् तापेन = पाकदाहेन, उद्विग्नः = व्याकुलः, च, सः = पूर्वदृष्टः ग्राहः = अवहारो, न्यमज्जत् = निमग्नोऽभवत्, सहसैवः हठादेव, सिन्धुतले = सागरकुक्षौ । तस्मिन् = वर्णयितुम् अशक्ये, अतिघोरे = महाभयङ्करे, सङ्कटे = विपत्तौ, तेषु = यानादवतरितेषु बहवो = अधिकाः, जनाः = यात्रिणः सिन्धुतले—सागरतले, प्रापुः—जग्मुः, स सिन्धुवादाः—सिन्धुवादसहिताः । साम्प्रताम्—अधुना, तदीयं तत् सम्बद्धं पण्यराशिम्—विक्रेयवस्तुसमूहम्, एतत् समुद्गकसन्दोहस्थं—दृश्यमान-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पुटकसमूहस्थम्, विक्रीय—मूल्यग्रहणपूर्वकं दत्वाऽभिलाषुकाय, तल्लाभस्वरूपम् = विक्रयजनितार्थलाभरूपम् अखिलं—सम्पूर्णम् वसु—धनं, यः कश्चन्, तस्य—सिन्धुवादस्य, रिक्थहरः—दायग्राही पुत्रादिः, तस्मै—सिन्धुवादोत्तराधिकारिणे प्रतिपाद्य—समर्प्य, बिगतचिन्तः—चिन्तारहितः भवितुं—वर्तितुम्, इच्छामि—वाञ्छामि इति—एतदुत्तरं दत्तं पोताध्यक्षेण सिन्धुवादाय मृतरूपेण विख्याताय ।

समासः—मत्पोतम् = मम पोतम्, अधिरुढपूर्वस्य पूर्वमधिरुढः अधिरूढ पूर्वः तस्य, विदामपुरनिवासिनः = विदामपुरे निवसति इति विदामपुरनिवासी तस्य, सिन्धुमध्यात् = सिन्धोः मध्यात्, सिन्धुवादसहिताः = सिन्धु वादेन सहिताः, पाकादिक्रियां = पाकः आदौ यस्यांतां, तत्तापेन = तस्याः (पाकक्रियायाः) तापेन, सिन्धुतले = सिन्धोः तले, पण्यराशिम् पण्यानां राशिम्, एतत्समुद्गकसन्दोहस्थं = एतेषां समुद्गकानां सन्दोहे वर्तमानम् रिक्थहरः = रिक्थं हरति इति रिक्थहरः विगत चिन्तो विगता चिन्ता यस्य सः ।

कोषः—'ग्राहोऽवहारो', 'यानपात्रे शिशौ पोतऽ' इत्युभयत्राप्यमरः ।

व्याकरणम्—हरः = हृ + अच्

११. प्रश्नः—प्रसङ्गनिर्देशपुरःसरम् व्याख्ययोऽयं गद्यांशः ।

अहं तमवदम्—"आर्य । सोऽहं सिन्धुवादो यं भवानुपरतं मन्यते । तदेते मदीयाः सम्पुटकाः" इति । स पुनः, "अहोऽलीकपरता स्वार्थपरस्य जनस्य । ननु साक्षात्कृत तदविनाशेन मया कथङ्कारं भवान् श्रद्धीयताम्" इति सोल्लुण्ठमवदत् ।

अहं च तं मामेवमश्रद्दधानं सकलं भूतार्थमवर्णयम् । मद्वचनाकर्णनविगतभ्रमोऽसौ मां निर्वण्य प्रत्यभिजानन् सप्रमोदमुवाच—

दिष्ट्या भवाँस्तां प्रतिभयां विपदं समुत्तीर्णः । क्षमस्व मदविनयम् आयत्तीकुरु च स्वपण्यगणम्„ इति । कृतज्ञतया मया प्रदीपमानं किमपि पारितोषिकम् सविनयमसौ प्रत्याचख्यौ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—गद्यांशोऽयं सिन्धुवादपोताध्यक्षवार्तालापरूपः प्रथमसिन्धुयात्रागतः श्री म० म० लक्ष्मणशास्त्रिविरचितायां सिन्धुवादवृत्तकथायाम् ।

व्याख्या—अहं = सिन्धुवादः, तम् = पोताध्यक्षं सिन्धूवादसमुद्गकविषये कल्पितव्यवस्थम्, अवदम् = अकथयम्—आर्य श्रीमन् ! सः = भवता मृतरूपेणावधारितः, अहं = भवत्सम्मुखस्थः, सिन्धुवादः = एतन्नामा व्यापारी वासरपुरात् भवद्याने प्रस्थितः सिन्धुयात्रायै, यं = सिन्धुवादनामान माम्, भवान् = पोताध्यक्षः, उपरतं = मृतं, मन्यते = स्वीकरोति । तत् = तस्मात् एते = मया पृष्टाः भवता वर्णिताः मदीयाः = मामकीनाः, समुद्गकाः = सम्पुटकाः इति । सः = पोताध्यक्षः, पुनः = भूयः, अहो = आश्चर्यसूचकमव्ययम् अलीकपरता = सत्येतरभाषणनिष्ठा, स्वार्थपरस्य = स्वेष्टसिद्धिलम्पटस्य, जनस्य = लोकस्य । ननु = वितर्कसूचकमव्ययम्, साक्षात्कृततद्विनाशेन = प्रत्यक्षीकृतसिन्धुवादमृत्युना, मया = पोताध्यक्षेण, भवान् = सिन्धुवादरूपाकृतिः, श्रद्धीयताम् = विश्वस्यताम् ? इति = अनेनप्रकारेण (सः पोताध्यक्षः) सोल्लुण्ठम् = सोपहासम्, अवदत् = अकथयत् ।

पोताध्यक्षशङ्का निवारयति सिन्धुवादः—अहं = सिन्धुवादः, च, तं = प्रवहणाधिपतिम्, माम् = वक्तारम्, एवं = पूर्ववर्णितप्रकारेण असत्यवादिरूपेण, अश्रद्धधानम् = अविश्वसन्तम्, सकलं = निखिलं, भूतार्थं = भूतकाले घटितम् वास्तविकं कथानकम्, अवर्णयम् = अकथयम् । मद्वचनाकर्णनविगतभ्रमः = मत्कथाश्रवणसमाप्तसंशयः, असौ = वहित्रचालकः, मां = वक्तारं सिन्धुवादं, प्रत्यभिजानन् = परिचिन्वन्, = निर्वर्ण्य = निपुणमवलोक्य, सप्रमोदम् = सहर्षम्, उवाच = अवदत्दिष्ट्या = सौभाग्येन, भवान् = पुरोदृश्यमानः सिन्धुवादः, प्रतिभयां = भयावहां, ताम् = अस्माभिरवलोकितां जीवनसंकटां, विपदाम् = आपत्तिम्, समुत्तीर्णः = पारंगतोऽसि । क्षमस्व = कुरुक्षमां, मदविनयम् = ममौद्धत्यम् जीवितमेव मृतरूपेण घोषणास्वरूपम् । आयत्तीकुरु = स्वाधीनं, च कुरु स्वपण्यगणम् = निजविक्रेयवस्तुराशिम् इति ।

कृतज्ञतया = कृतघ्नताविरुद्धया, भावनयामया = सिन्धुवादेन, प्रदीप-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानं = समर्प्यमाणम्, किमपि = किञ्चिदपि, पारितोषिकं = परितोषकरमुपहारं, सविनयं विनयपूर्वकम्, असौ पोताध्यक्षः, प्रत्याचख्यौ = निषिषेध ।

समासः—साक्षात्कृततद्विनाशेन = साक्षात्कृतः तस्य विनाशः येनतेन, मद्वचनाकर्णनविगतभ्रमः = मम वचनस्य आकर्णनेन विगतोभ्रमो यस्य सः, प्रतिभयां = प्रतिगतं भयं यस्याः तां, कृतज्ञतया = कृतं जानाति इति कृतज्ञः तस्य भावः कृतज्ञता तया ।

कोषः—'पण्यं क्रय्यादयस्त्रिषु' इत्यमरः ।

व्याकरम्—ज्ञः = जानाति इति ज्ञः, ज्ञा + कः = ज्ञः, इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः ।

१२. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

"तेषु च पण्यद्रव्येषु कानिचिन्महार्घाणिमिहिरमहीपतये समुपहृत्य विज्ञाततदागमवृत्तेन प्रसन्नात्मना तेन सादरबहुमानं वितीर्णप्रचुरविभवस्तमामन्त्र्य भूयस्तदेव प्रवहणमधिरुढः पण्यविनिमयेन संगृहीतचन्दनकर्पूरमरिचमुखतत्रत्युवस्तुनिचयः ततः प्रस्थितो वर्त्मनि नैकान् द्वीपान् विलोकयन् वासरनगरमेत्य ततः प्रयातः स्वं सदनं प्रत्यागमम् । अनया च यात्रया समुपार्जितलक्षाधिकदीनारोहमिदं हर्म्यवरं दासान् दासीश्च परः शताः क्रीत्वा प्रतिष्ठितोऽभवम् । विस्मृत्य चानुभूतपूर्वाः समस्ताः विपदः सुखोपभोगैकप्रवणोऽत्रसम् ।"

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तकथायां प्रथमसिन्धुयात्राप्रसङ्गे समागतोऽयमंशः व्याख्यानायाऽत्र समुद्धृतः सिन्धुवादः हितवादमुपस्थितजनसमूहं च प्रथमसिन्धुयात्रातो गृहागमनं वर्णयति ।

व्याख्या—"तेषु = पोतादवतारितेषु, पण्यद्रव्येषु = विक्रेयवस्तुषु, कानिचित् = स्तोकानि सङ्कलितानि, महार्घाणि = बहुमूल्यानि, मिहिरमहीपतये = मिहिरनामकभूपतये, समुपहृत्य = उपायनीकृत्य, विज्ञाततदागम वृत्तेन = ज्ञातनष्टवस्तुप्राप्तिसमाचारेण, प्रसन्नात्मना = हृष्टमानसेन, तेन = मिहिरभूपतिना, सादरबहुमानम् = आदरसम्मानपूर्वकम्, वितीर्णप्रचुर-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विभवः = दत्तपर्याप्तधनः, तम् = पोताध्यक्षम्, आमन्त्र्य = मन्त्रयित्वा, भूयः = पुनः, तदेव = पूर्ववर्णितमेव, प्रवहणम् = जलयानम्, अधिरूढः = अध्यासितः, पण्यविनिमयेन = विक्रेयवस्तुविनिमयेन (तुल्यद्रव्यदानोत्तरपदार्थान्तरग्रहणं विनिमयः) संगृहीतचन्दनकर्पूरमरिचमुखतत्रत्यवस्तुनिचयः = सङ्कलितमलयजघनसारवल्लजप्रधानमिहिरमहीपतिनगरवस्तुगणः, ततः = तस्माद् द्वीपात् प्रस्थितो = निर्गतो, वर्त्मनि = मार्गे, नैकान् = बहून्, द्वीपान् = अन्तरीपान्, विलोकयन् = पश्यन्, नासरनगरम् = एतन्नामकनगरं प्रथमसिन्धुयात्राप्रस्थानप्रदेशम्, एत्य = समागत्य, ततः = वासरपुरात्, प्रयातः = प्रस्थितः, स्वं = निजं, सदनं = वेश्म, प्रत्यागमम् = प्रत्यागच्छम् । अनया = पूर्ववर्णितया प्रथमयात्रया, च, समुपार्जितलक्षाधिकदीनारः = सम्पादितलक्षोत्तरसंख्याकधनः, अहं = सिन्धुवादः, इदं = समीपस्थं दृश्यमानं च, हर्म्यवरं = प्रासादवरं, दासान् = सेवकान्, दासीश्च = सेविकाश्च, परः शताः = शताधिकाः क्रीत्वा, अत्र = विदामपुरे, प्रतिष्ठितः = प्रख्यातः, अभवम् = अभूवम् । विस्मृत्य = विस्मरणं कृत्वा, च, अनुभूतपूर्वाः = पूर्वमनुभूताः समस्याः = सकलाः, विपदः = आपदः, सुखोपभोगैकप्रवणः = शर्मभोगैकप्रवणः, अवसम् = न्यवसम् ।"

समासः—पण्यद्रव्येषु = पण्येषु द्रव्येषु, मिहिरमहीपतये = मिहिरश्चासौ महीपतिश्च, तस्मै, विज्ञाततदागमवृत्तेन = विज्ञातं तेषाम् आगमस्य वृत्तं येन तेन, प्रसन्नात्मना = प्रसन्नः आत्मा यस्य तेन, सादरबहुमानं = सादरं बहुमानं वितीर्णप्रचुरविभवः = वितीर्णः प्रचुरः विभवः यस्मै सः, पण्यविनिमयेन = पण्यानां विनिमयेन, संगृहीतः, चन्दन कर्पूरमरिचमुखतत्रत्यवस्तुनिचयः = संगृहीतः, चन्दनं कर्पूरं मरिचं च मुखं यस्य सः = चन्दनकर्पूरमरिचमुखः तत्रत्यः वस्तुनिचयः येन सः, समुपार्जितलक्षाधिकदीनारः = समुपार्जिताः लक्षाधिकाः दीनाराः येन सः, सुखोपभोगैकप्रवणः = सुखानाम् उपभोगे एकः प्रवणः ।

कोषः—"कर्पूरमस्त्रियां । घनसारश्चन्द्रसंज्ञः" "गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्युभयत्राप्यमरः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याकरणम्—समुपहृत्य = सम् + उप् + हृ + क्त्वा + ल्यप् । अधिरूढः = अधि + रुह् + क्त

१३. प्रश्नः—व्याख्येयोऽयमंशोऽधोलिखितः ।

इत्येवमुक्त्वा स सिन्धुवादो भूयः पानभोजनसङ्गीतप्रभृतिभिः कञ्चनकालमात्मानं विनोद्य सर्वास्तान् समेतानतिथिवरान् विसृज्य शतं दीनारान् हितवादाय प्रदाय "भद्र गृहाणैतत् किमप्यस्मत्प्रणयचिह्नम् । श्वः पुनरागम्यताम् । अहं भूयो ऽप्यात्मवृत्तं श्रावयितास्मि" इत्युक्त्वा तं स्वगृहं गन्तुं समनुमेने ।

सानन्दो हितवादोऽन्येद्युः विधृतविमलनववेषः पुनस्तद्गृहं गतस्तेन स्निग्धया दृशा स्वागतीकृतः कृतकृत्यमात्मानममन्यत ।

व्याख्या—प्रसङ्गः—अयमंशः सिन्धुवादवृत्तात् गृहीतः । विरचितोऽयं ग्रन्थः तैलङ्गोपाह्वेन श्री म०म० लक्ष्मणशास्त्रिमहोदयेन । प्रथमसिन्धुयात्रामुपसंहृति रचनाकारोऽत्र ।

व्याख्या—इत्येवम् = पूर्वोक्तप्रकारम्, उक्त्वा = कथयित्वा, सः पूर्ववर्णितः, सिन्धुवादः = एतन्नामा श्रेष्ठी, कथानायकः, भूयः = पुनः, पानभोजनसङ्गीतप्रभृतिभिः = पेयभक्ष्यसङ्गीतादिभिः कञ्चन = स्तोकं, कालं = समयंम्, आत्मानम् = स्वं विनोद्य = रञ्जयित्वा, सर्वांस्तान् = सम्पूर्णान् तत्रस्थान्, समेतान् = एकत्रितान, अतिरथिवरान् = अभ्यागतश्रेष्ठान्, विसृज्य = विसर्जनं कृत्वा विदायं दत्वा, शतं = शतसंख्याकान् दीनारान् = हेममुद्राविशेषान्, हितवादाय = कथाकारणभूताय परिश्रमं विनैवार्जितमनेन धनमिति कथनकराय, भारवहनवृत्तिनिरताय, प्रदाय = दत्वा, भद्र । श्रीमन् गृहाण = स्वींकुरु, एतत् = दीयमानं, किमपि = स्वल्पसंख्यम्, अस्मत्प्रणयचिह्नम् = मत्स्नेहसूचकं । श्वः = आगामिदिने, पुनः = भूयः, आगम्यताम् = आगमनं क्रियताम्, अहं = सिन्धुवादः, भूयः पुनः अपि, आत्मवृत्तं = स्वयात्राकथानकम् श्रावयितास्मि = कथयितास्मि । इत्युक्त्वा—एवं कथयित्वा तं = हितवादं, स्वगृहं = निजनिकेतनं, गन्तुं = व्रजितु समनुमेने = अनुमतिमददात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सानन्दो = सहर्षः, हितवादो = भारवहननिरतः अन्येद्युः = अपरदिने, विधृतविमलनववेषः = स्वीकृतस्वच्छनूतनवसनः, पुनः = भूयः, तद्-गृहं = सिन्धुवादवेश्म गतः = प्राप्तः, तेन = आतिथेयिना सिन्धुवादेन, स्निग्धया = प्रेमपूर्णया, दृशा = दृष्ट्या, स्वागतीकृतः = सभाजितः, कृतकृत्यम्, = सफलम्, आत्मानम् = स्वम्, अमन्यत = मन्यते स्म ।

समासः—पानभोजनसङ्गीतकप्रभृतिभिः = पानं भोजनं सङ्गतम् च प्रभृतिः येषां तैः, अस्मत्प्रणयचिह्नम् = अस्माकं प्रणयस्य चिह्नम् आत्मवृत्तम् = आत्मनः वृत्तम्, विधृतविमलनववेषः = विधृत विमलो नवश्च वेषः येन सः । तद्गृह = तस्य गृहं ।

कोषः—"गृहं गेहोदवसितं वेश्म सद्म निकेतनम्" इत्यमरः ।

व्याकरणम्—अन्येद्युः = अन्यशव्दात् एधुस्प्रत्ययः ।

१४. प्रश्नः—अधोलिखितोंशः व्याख्येयः ।

अथ समुपस्थितेवु अन्येषु सभ्यजनेषु सिन्धुवादोऽब्रवीत्—अद्याहं मामकीं द्वितीयसिन्धुयात्रां प्रथमयात्राया अत्यधिकं चमत्कारिणीमुपवर्णयिष्यामि श्रूयताम्—

उत्तरम्—प्रसङ्गः—द्वितीयसिन्धुयात्रायाः पुरोवाक्रूपेणेयम् पङ्क्तिः । कथा षट्मुखीकार्या इति सिद्धान्तपालनाय । अस्याः रचनाकारः श्री म०म० लक्ष्मणशास्त्री । सिन्धुवादवृत्तस्य प्रथमयात्राया अवसानभूता ।

व्याख्या—अथ = द्वितीयदिवसे समागते हितवादे जीविकासाधनरूपभारवहनकर्मविरतेऽनायासप्राप्तशतदीनारात्मकधननिचये कथारसिके, समुपस्थितेषु = समागतेषु, अन्येषु = अज्ञातनामगोत्रादिषु, सभ्यजनेषु = श्रेष्ठनरेषु, सिन्धुवादो = विपुलविभवः श्रेष्ठी, अब्रवीत् = अकथयत्—अद्य = वर्तमानदिने, अहं = सिन्धुवादः मामकीं = मदीयां द्वितीयसिन्धुयात्रां = प्रथमेतरसागरगमनकथां, प्रथमयात्रायाः = पूर्ववर्णितायाः अत्यधिकम् = अत्यन्तम्, चमत्कारिणीम् = आश्चर्यविपुलाम्, उपवर्णयिष्यामि = वक्ष्यामि, श्रूयताम् आकर्ण्यताम् ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।
सिन्धुवादस्य वृत्तेऽस्मिन् यात्राऽगात् प्रथमाऽभिधा ॥१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वितीयासिन्धुयात्रा

५१

१. प्रश्नः—अधोलिखितांशस्य व्याख्या कार्या ।

प्रथमयात्रोत्तरमिह विदामपुरेऽवशिष्टमायुः सानन्दं यापयितुं कृतसङ्कल्पोऽपि कैश्चिद्दिनै निरुद्यमावस्थानेन परिक्लान्तो भूयोऽपि सिन्धुयात्रोत्सुकः पण्यवस्तूनि संगृह्य एकस्मिन् दिवसे प्रामाणिकैः कैश्चित् सार्थवाहैः सह प्रवहणमारुह्य यात्रायै निरगमम् ।

(सम्पू० सं० वि० ८४)

उत्तरम्—प्रसङ्गः = श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तनामकगद्यबन्धात् द्वितीय सिन्धुयात्राकथाभागात् गृहीतोऽयं गद्यविशेषभागः । अपरदिने हितवादादिजनसमूहम् श्रावयति सिन्धुवादः स्वद्वितीययात्राप्रारम्भप्रकारम् ।

व्याख्या—प्रथमयात्रोत्तरम् = प्रारम्भिकसिन्धुयात्रानन्तरम् इह = वर्तमाने, विदामपुरे = एतन्नामकस्वनगरे, अवशिष्टम् = सावशेषम्, आयुः = अवस्थाम्, सानन्दं = सहर्षं यापयितुं = व्यतिपातयितुं, कृतसङ्कल्पो = विहितनिश्चयो, अपि, कैश्चिद् = कतिपयै, दिनै = दिवसैः, निरुद्यमावस्थानेन = उद्योगरहितवासेन परिक्लान्तः = परिश्रान्तः भूयः = पुनः, अपि, सिन्धुयात्रोत्सुकः = सागरगमनोत्कण्ठितः पण्यवस्तूनि = विक्रेयवस्तूनि, संगृह्य = एकत्रीकृत्य, एकस्मिन् = विशेषे, दिवसे = दिने, प्रामाणिकैः = यथार्थप्रकृतिकैः, कैश्चित् = कतिपयविशिष्टैः सार्थवाहैः = समुद्रयात्रारसिकैः, सह = साकं, प्रवहणम् = जलयानम्, अधिरुह्य = आरुह्य, यात्रायैः = प्रवासार्थं, निरगमम् = निरगच्छम् ।

समासः—प्रथमयात्रोत्तरम् = प्रथमा या यात्रा तस्याः उत्तरं कृतसङ्कल्पः = कृतः सङ्कल्पः येन सः, निरुद्यमावस्थानेन = निर्गत उद्यमो यस्मात् तत् निरुद्योगं यत् अवस्थानं तेन, सिन्धुयात्रौत्सुकः = सिन्धोः यात्रा सिन्धुयात्रा तस्यै उत्सुकः, पण्यवस्तूनि = पण्यानि वस्तूनि ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'समुद्रोऽब्धिरकूपारः' इत्यमरः

व्याकरणम्—आ + रुह् + क्त्वा + ल्यप् = आरुह्य

२. प्रश्नः—अधोलिखितपंक्तीनां व्याख्या कार्या।

द्वीपाद् द्वीपं परिभ्रमन्तः सलाभं विनिमयेन पण्यजातं विक्रीणाना वयमेकस्मिन् दिने द्वीपमेकं फलभारावनमितैः महीरुहैः समाच्छन्नमपि नितरां निर्जनं संप्राप्नुम। अथास्मत्सहचरेषु वनस्थल्यां फलकुसुमावचयपरेषु सहानीतं किञ्चिदशनजातं गृहीत्वा घनच्छायस्य कस्यचित् स्रोतसस्तटभूमौ स्थितोऽहं भुक्त्वा पीत्वा चापनीतश्रमो निद्रापरवशोऽभवम्। प्रबुद्धश्च प्रवहणमनालोकयन् विस्मयाक्रान्तः सहचरवर्गमन्विष्यंस्तानप्राप्येतस्ततः परिपश्यन् विदूरे महता वेगेनापसर्पत्तत्प्रवहयमद्राक्षम्। क्रमशश् चैतद्दृश्यतां गतमभिवीक्ष्य निराशतामगच्छम्।

उत्तरम्—प्रसङ्गः—इमाः पङ्क्तयः सिन्धुवाद वृत्तस्य श्री म० म० लक्ष्मणशास्त्रिरचितस्य द्वितीयसिन्धुयात्रावसरे समागताः। सिन्धुवादः हितवादे समुपस्थितातिथिगणसमक्षं द्वितीयासिन्धुयात्रायां स्वप्राणसङ्कटबीज मुपन्यस्यति कथामाध्यमेन।

व्याख्या—द्वीपाद् = अन्तरीपाद्, द्वीपम् = अन्तरीपम्, परिभ्रमन्तः = चलन्तः, सलाभं = मूलधनादधिकधनार्जनसहितं, विनिमयेन = स्ववस्तुदानोत्तरापरवस्तुग्रहणमाध्यमेन, पण्यजातं = स्वदेशानीतविक्रेयवस्तुसमूहम्, विक्रीयाना = विक्रयं कुर्वाणाः, वयम् = मत्सहचराः वणिग्जनाः, एकस्मिन्, दिने = दिवसे, द्वीपम् = अन्तरीपम्, एकम्, फलभारावनमितैः = फलभारनम्रैः, महीरुहैः = भूरुहैः, समाच्छन्नमपि = सुसङ्कुलमपि, नितरां = अत्यन्तं, निर्जनं = जनरहितम्, सम्प्राप्नुम = समागतवन्तः। अथ = एतदनन्तरम्, अस्मत्सहचरेषु = मत्सहयात्रिषु वनस्थल्यां = विपिनभूमौ, फलकुसुमावचयपरेषु = फलफुल्लसंचयननिरतेषु, सहानीतं = यात्राप्रारम्भे गृहाद्गृहीतं, किञ्चित् = स्तोकम्, अशनजातम् = भोजनसामग्रीचयम्, गृहीत्वा = समादाय, घनच्छायस्य = निविडच्छायायुक्तस्य कस्यचित्, स्रोतसः = निर्झरस्य, तटभूमौ कूलप्रदेशे स्थितो = वर्तमानो, अहं = सिन्धुवादः, भुक्त्वा = भोजनं कृत्वा,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पीत्वा = पेयं गृहीत्वा, अपनीतश्रमः = दूरीकृतक्लमः, निद्रापरवशो = निद्रितो अभवम् = अभूवम् प्रबुद्धश्च = जागरितश्च, प्रवहणम् = जलयानम्, अनालोकयन् = अपश्यन्, विस्मयाक्रान्तः = आश्चर्यचकितः, सहचरवर्गम् = सहयात्रिगणम्, अन्विष्यन् तान् = सहचरान्, अप्राप्य = अनालोक्य, इतस्ततः = दिक्षु विदिक्षु च, परिपश्यन् = अन्वेषण दृष्ट्या विलोकयन्, विदूरे = बहु दूरे महता = प्रभूतेन, वेगेन = जवेन, अपसर्पत् = दूरं गच्छत्, तत् = मत्प्रापकम् प्रवहणम् = वहित्रम्, अद्राक्षम् = अपश्यम् क्रमशः = क्रमेण, चैतद् = दृशो विषयतां गतम्, अदृश्यताम् = दर्शनाभावतां, गतं = प्राप्तम्, अभिवीक्ष्य = निरीक्ष्य, निराशताम् = नैराश्यम्, अगच्छम् = अव्रजम् ।

समासः—फलभारावनमितैः = फलानां भारेण अवनमितैः, अस्मत्सहचरेषु = अस्माकम् सहचरेषु, फलकुसुमावचयपरेषु = फलानां कुसुमानाम् च अवचये परेषु, अशनजातम् = अशनस्य जातम्, घनच्छायस्य = घनाच्छाया यस्य तस्य, तटभूमौ = तटस्य भूमौ, निद्रापरवशः = निद्रायाः परवशः, विस्मयाक्रान्तः = विस्मयेन आक्रान्तः । सहचरवर्गम् = सह चरन्ति इति सहचराः तेषां वर्गम् ।

कोषः—'वृक्षो महीरुहः शाखी' 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्युभयत्राप्यमरः ।

व्याकरणम्—भुज् + क्त्वा = भुत्वा, पा + क्त्वा = पीत्वा

३. प्रश्नः—अधोलिखित गद्यांशस्य व्याख्यानं कार्यम् ।

ईदृशीं विषमां दशामनुप्रपन्नोऽवसितजीविताशः शुचा तारस्वरेण क्रन्दन् शिरस्ताडयन् शङ्काशताकुल आत्मानं मुहुर्मुहुरेतद्यात्राचापलाय विनिन्दन् कर्तव्यमूढः कञ्चन वृक्षमारुह्य सर्वतः पश्यन् उपरि महाकाशमधश्च महासिन्धुमन्तरेण न किमपि दृष्टिपथं नयन आराद्रोधसि स्थितं किमप्यवदातं वस्तु निरीक्ष्य तरोरवतीर्णो गृहीताशनजातशेषः किमेतदिति बुभुत्सुस्तत्सकाशमुपासरम् । उपसृत्य च हस्तशतप्रमाणमतिमसृणतया दुरारोहं किमपि वस्तु समालोकयम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—गद्यांशोऽयम् श्री म० म० लक्ष्मणशास्त्रिकृत सिन्धुवादवृत्तद्वितीयसिन्धुयात्राप्रसङ्गादुधृतः । सिन्धुवादोऽत्र कथयति हितवादं विजनसिन्धुप्रान्तात् स्वागमनवृत्त ।

व्याख्या—ईदृशीं = भयङ्करां, कठिनां = दुस्तरां दशाम् = अवस्थाम्, अनुप्रपन्नो = प्राप्तो, अवसितजीविताशः = समाप्तजीवनाशः, शुचा = शोकेन, तारस्वरेण = तीव्ररवेण, क्रन्दन् आक्रोशन् = शिरः = मस्तकं, ताडयन् = पेठन्, शङ्काशताकुलः = सन्देहशतयुतः, आत्मानं = स्वं, मुहुर्मुहुर् = बारम्बारम्, एतद्यात्राचापलाय = वर्तमानसागरप्रवासचञ्चलतायै, विनिन्दन् = तिरस्कुर्वन्, कर्तव्यमूढः = कर्तव्यशून्यः, कञ्चन = अज्ञातनामानं तत्रोपस्थितम्, आरुह्य = अधिरुह्य, सर्वतः = परितः पश्यन् = अवलोकयन्, उपरि = उपरिष्टात्, महाकाशं = महाशून्यं गगनम्, अधश्च = अधस्तात् च महासिन्धुम् महासागरम्, अन्तरेण = विना, न = नहि, किमपि = किञ्चिदपि, दृष्टिपथं = लोचनगोचरताम्, नयन् = आनयन्, आरात् = समीपेरौधसि = तटे, स्थितम् वर्तमानम्, किमपि, अवदातं = गौरम्, वस्तु, निरीक्ष्य = विलोक्य, तरोः = वृक्षात्, अवतीर्णो = धरागतं, गृहीताशन जातशेषः = धृतावशिष्टभोजनः, किमेतदिति, वुभुत्सुः = वोधुमिच्छुः, तत्सकाशम् = तत्समीपम् उपासाम् = अगच्छम् । उपसृत्य = गत्वा, च, हस्तशतप्रमाणम् = शतद्वयवितस्ति परिणाहम्, अतिमसृणतया = अतिचिक्कणतया दुरारोहम् = आरोहणायोग्यम्, किमपि, वस्तु, समालोकणम् = अपश्यम् ।

समासः—अवसितजीविताशः = अवसिता जीवितस्य आशा यस्य, शङ्काशताकुलः = शङ्कानां शतेन आकुलः, एतद्यात्रा चापलाय = एतस्याः यात्रायाः चापलाय, गृहीताशनजातशेषः = गृहीतम् अशनजातशेषम् येन सः, हस्तशतप्रमाणम् हस्तानां शतं प्रमाणं यस्य तत् ।

कोषः—'अवदातः सितो गौरः' 'पृथग् विनाऽन्तरेण' इत्युभयत्राप्यमरः ।

व्याकरणम्—निः + ईक्ष् + क्त्वा + ल्यप् निरीक्ष्य ।

उप् + सृ + क्त्वा + ल्यप् उपसृत्य ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. प्रश्नः—व्याख्येयोऽधोलिखितोंशः।

अथास्तभिमुखे भगवति भास्वति दुर्दिन इव सहसा तमोव्याप्ता दिशो भयमुत्पादयन्। अकस्माच्च मदभिमुखं सवेगमापतन्तम् अतिमहापरिणाहं पक्षिविशेषमवलोक्य विस्मितोऽभवम्। पूर्वं पोतवाहेभ्यः श्रुतैतादृशमहाशकुन्तवृत्तान्तोऽहं तदवदातं वस्तु तस्यैवाण्डम् निरधारयम्। कियत्या कालकलया विटपिस्कन्ध विशङ्कटनखपञ्जरः स महाशकुन्तस्तस्मिन्नण्डे समुपाविशत्। क्षपाञ्चनिद्रयाऽपाह्रियत। अहं शनैस्तमुपगत्य स्वशिरस्थचीरपट्टिकयाऽऽत्मानं तन्नखपञ्जेरऽवध्नाम्। कदाचित् प्रभात आहारान्वेणषणात्पतिष्यतोस्य साहाय्येनास्मादतिनिर्जनात् स्थानाद्विनिर्मुक्तो भवेयमिति चेतसाऽऽशासानः प्रभातं प्रतीक्षमाणो निशीथिनीं तां तथैवावस्थाम्। प्रत्यूषे च वस्तुतस्तेन शकुन्तप्रकाण्डेन सवेगमदृष्टभूमिभागे नभसि समूह्यमानो निश्चेतन इवाभवम्। अथावतीर्णमात्रः स सपदि कर्तितात्मबन्धने मयि सहसा दृष्टमाशीविषमेकमत्यायतं समाक्रम्य चञ्चुपुटेनोद्वहन् अदृश्यतामयासीत्।

उत्तरम्—प्रसङ्गः—प्रसङ्गेऽस्मिन् सिन्धुवादो हितवादं कथयति। श्री म० म० लक्ष्मणशास्त्रिविरचितं सिन्धुवादवृत्ते द्वितीयसिन्धुयात्रावसरे तस्मान्निर्जनप्रदेशात् पक्षिमाध्यमेन सर्पागारे समागमनम् स्वीयम्।

व्याख्या—अथ तरुप्रदेशादवतरणानन्तरं, अस्ताभिमुखे = अस्तायमाने, भगवति = ऐश्वर्यशालिनि भास्वति = रवौ, दुर्दिन = मेघाच्छन्नदिवस, इव = यथा, सहसा = अकस्मात्, तमोव्याप्ता = अन्धकाराच्छन्ना, दिशो = हरितो, भयं = भीतिम्, उत्पादयन् = उत्पादयन्ति स्म। अकस्मात् = सहसा, च, मदभिमुखं = मम सम्मुखं, सवेगम् = सगतिकम्, आततन्तम् = आगच्छन्तम्, अतिमहापरिणाहं = अतिविस्तारविस्तीर्णम् पक्षिविशेषम् = शकुनिविशेषम्, अवलोक्य = विलोक्य, विस्मितः = चकितः, अभवम् = अभूवम्। पूर्वं = यात्राप्रारम्भात् प्रथमकाले, पोतवाहेभ्यः = जलयानचालकेभ्यः श्रुतैतादृशमहाशकुन्तवृत्तान्तः = ज्ञातैतादृशमहापक्षिकथः, अहं = सिन्धुवादः, तत् = पुरोऽवलोक्यमानम्, अवदातं = शुभ्रं, वस्तु, तस्यै-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाण्डं = पक्षिविशेषस्यैवाण्डं, निरधारयम् = निश्चितमकरवम् । कियत्या = कतिपयपलात्मकया, कालकलया = समयखण्डेन, विटपिस्कन्धविशङ्कटनखपञ्जरः = वृक्षशाखाविशालनखपञ्जरः, सः = सद्यो दृष्टः, महाशकुन्तः = महापक्षी, तस्मिन् = पूर्वविलोकिते, अण्डे, समुपाविशत् = अतिष्ठत् । क्षणाच्च = पलाच्च, निद्रया = स्वापावस्थया, अपाह्रियत् = अस्वपत् । अहं = सिन्धुवादः कथानायकः, शनैः = मन्दम्, तम् = विशालशकुन्तम्, उपगत्य = गत्वा स्वशिरस्थरचीरपट्टिकया = निजमस्तकस्थवसनसाहाय्येन, आत्मानं = स्वं, तन्नखपञ्जरे = शकुन्तनखपञ्जरे, अवघ्नाम् = निबद्धमकरवम् । कदाचित् = कस्मिंश्चित्, प्रभाते = प्रातः आहारान्वेषणाय = भोजनान्वेषणाय, उत्पतिष्यतः = उड्डयनं करिष्यतः, अस्य = पक्षिविशेषस्य साहाय्येन = साहचर्येण , अस्मादतिनिर्जनात् = वर्तमानाञ्जनरहितात्, स्थानात् = प्रदेशात् विनिर्मुक्तो = वन्धनरहितः (वहिरागतः) भवेयम् = स्याम, इति, चेतसा = मनसा, आशासानः = आशां कुर्वाणः, प्रभातम् = प्रातःकालम्, प्रतीक्षमाणः = वीक्षमाणः, निशीथिनी = निशां, ताम् = कष्टकल्पनाबहुलां, तथैवाऽस्था = तादृशमेव स्थितवान् । प्रत्यूषे = अहर्मुखे च वस्तुतः = याथार्थ्येन, तेन = पक्षिविशेषेण, शकुन्तप्रकाण्डेन = पक्षिविशालेन, सवेगम् = वेगपूर्वकम्, अदृष्टभूमिभागे = अज्ञातभूप्रदेशे नभसि-वियति, समुह्यमानो = नीयमानः । निश्चेतन = चेतनारहित, इव, = यथा, अभवम् = आसम् । अथ = निश्चेतन इवोत्पतनानन्तरम्, अवतीर्णमात्रः = कृतावरोहण एव सः = पक्षी, सपदि = शीघ्रम्, कर्तितात्मबन्धने = विच्छिन्नस्वसम्बन्धे, मयि = सिन्धुवादे सहसा = अकस्मात् दृष्टमाशीविषमेकम् = आलोकितसर्पमेकम्, अत्यायतं = वहुविशालम्, समाक्रम्य = आक्रम्य, चञ्चुपुटेन = तुण्डद्वयेन उद्वहन् = धारयन्, अदृश्यताम् = अगोचरताम् अयासीत् = अभजत् ।

समासः—तमोव्याप्ता = तमसा व्याप्ता, मदभिमुखं = मम अभिमुखम्, पोतवाहेभ्यः = पोतानां वाहेभ्यः, श्रुतैतादृशमहाशकुन्तवृत्तान्तः = श्रुतः एतादृशः महाशकुन्तस्य वृत्तान्तः येन सः, विटपिस्कन्ध विशङ्कटनखपञ्जरः = विटपिनां स्कन्धाः इव विशङ्कट = नखपञ्जरो यस्य सः, स्वशिरस्थ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चीरपट्टिकया = स्वस्थ शिरसि तिष्ठति इति तथा—विधा या चीरस्य पट्टिका तया, आहारान्वेषणाय = आहारस्य अन्वेषणाय, कर्तितात्मबन्धने = कर्तितः आत्मनः बन्धनं येन तस्मिन् ।

कोषः—'मेघाच्छन्नेऽह्नि दुर्दिनम्' 'विशङ्कटं पृथुवृहत्' 'उषः प्रत्यूषसी' इति सर्वत्राप्यमरः ।

व्याकरणम्—आशासानः = आश् + शानच् ।

५. प्रश्नः—अधोलिखितस्य व्याख्या कार्या प्रसङ्गपूर्वकम् ।

अहं तु क्वचिदुपत्यकायामभितो गगनभेदिश्शृङ्गैः दुरधिरोहैः शिलोच्चयैः परिवृत्तायाम् अशक्यनिर्गमनायाम् एकाकी पतितस्तया देशान्तरपरिवृत्या न मनाक् प्रसन्नः केवलं भागधेयमात्मीयमाक्रोशन् कञ्चित्कालं स्तम्भितमतिरतिष्ठम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचिते सिन्धुवादवृत्ते द्वितीयसिन्धुयात्रावसरे सिन्धुवादेनोक्तोऽयं गद्यांशः पक्षिविशेषपक्षतिसमानीतेऽपरस्थाने भाग्याक्रोशनात्मकः ।

व्याख्या—अहं = सिन्धुवादः, तु, क्वचित् = कुत्रचित्, उपत्यकायाम् = पर्वतासन्नभूमौ, अभितः = परितः गगनभेदिश्शृङ्गैः = आकाशभेदिशिखरैः, दुरधिरोहैः = आरोहणाशक्यैः, शिलोच्चयैः = पाषाणखण्डैः, परिवृत्तायाम् = वेष्टितायाम्, अशक्यनिर्गमनायाम् = असम्भवबहिर्गमनायाम्, एकाकी = केवलः, पतितः = स्खलितः, तया = कष्टपूर्णया, देशान्तरपरिवृत्या = स्थानान्तरभ्रमणेन, न = नहि, मानक् = स्वकल्पमपि, प्रसन्नः = हर्षितः, केवलं = मात्रम्, आत्मीयम् = स्वीयम्, भागधेयम् = दुर्दैवम्, आक्रोशन् = विलपन्, कञ्चित्कालं = स्वल्पसमयं, स्तम्भितमतिः = कुण्ठितबुद्धिः, अतिष्ठम् = समुपाविशम् ।

समासः—गगनभेदिश्शृङ्गैः = गगनं भिन्दन्ति इति तैः शृङ्गैः, दुरधिरोहैः = दुःखेन अधिरोहैः, अशक्यनिर्गमनायाम् = नास्ति शक्यं निर्गमनं यस्या तस्याम्, देशान्तरपरिवृत्या = अन्यो देशः देशान्तरः तत्र परिवृत्तिः तया, स्तम्भितमतिः, स्तम्भिता मतिः यस्य सः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'उपत्यकाद्रेरासन्ना भूमिः' इत्यमरः ।

व्याकरणम्—स्तम्भित = स्तम्भ + इतच् ।

६. प्रश्नः—अधोलिखितो व्याख्येयः गद्यभागः ।

अथोत्थितोऽहमितस्ततः परिक्रामस्तं प्रदेशमतिस्थूलप्रमाणैरसमसुषमैर्हीरकनिकरैर्व्याकीर्णं साश्चर्यमवालोकयम् । तांश्च सकौतुकं निर्वर्णयन्नदूरेदन्तावलनिगरणपर्याप्तायाभिमुखकन्दराननतिपृथून् परः शतानजगरान् विलोक्य साध्वसाधीनोऽभवम् । ते ह्यजगराः पूर्वोपवर्णिततत्सहजवैरिपतत्रिभयविह्वला दिवसं गिरिकन्दरासु निगूढा अन्धकारावतारे ततो निष्क्रामन्ति । अहं तस्यामुपत्यकायां भ्रमन् यथावसरं विश्राम्यन् सकलं तं दिवसमयापयम् । अस्तंगते च रवौ किञ्चिद्दैवखातमुपलभ्य शिलयैकया पिहिततत्सङ्कुचितद्वारः सर्पभयात् कथञ्चिदात्मानं सुरक्षितं मन्यमानः सहानीतं किञ्चद्भोज्यं भुक्त्वाऽऽशीविषफूत्कारजनितसाध्वसोद्वेगो जाग्रदेव कथमपि तां निशामनैषम् । उदिते च भगवति दिनकृतिविनिर्गतेषु च तेषु कालसर्पेषु सातङ्को हीरकखण्डेषु परिभ्रमन्नपि तानि ग्रहीतुमनुदितोत्साहलेशो रात्रिजागरेण भृशं क्लान्त एकस्यां शिलायां पतित्वा निद्रितो मत्सविधे पततो मासखण्डस्य ताशब्देन प्रबुद्धो गिरितलेभ्यः पतन्ति बहून्यपराणि मासखण्डानि पश्यन् विस्मितो आसम् ।

उत्तरम्—प्रसङ्गनिर्देशः—गृहीतोऽयं गद्यांशः श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तकथायाः द्वितीयसिन्धुयात्राप्रसङ्गात् । सर्पाच्छिन्नहीरकसमूहे पतितः सिन्धुवादः कथानायकः कथमात्मानमरक्षदजगरैरिति श्रावयति हितवादं कथाश्रोतारं ।

व्याख्या—अथ = बुद्धिस्तम्भानन्तरम्, उत्थितः, अहम् = सिन्धुवादः, इतस्ततः, परिक्रामन् = परिभ्रमन्, तं = हीरकाजगरमिश्रं, प्रदेशं = स्थानम्, अतिस्थूलप्रमाणैः = विशालप्रमाणैः, असमसुषमैः = अनुपमशोभैः, हीरकनिकरैः = हीरकसमूहैः, व्याकीर्णम् = व्याप्तम्, साश्चर्यं = सविस्मयम्, अवालोकयम् = अपश्यम्, तांश्च = हीरकांश्च, सकौतुकम् = औत्सुक्ययुतं, निर्वर्णयन् = पश्यन्, अदूरे = समीपे, दन्तावलनिगरणपर्याप्तायाभिमुखकन्द-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रान् = हस्तिभक्षणपर्याप्तावकाशवदनगुहाभागान्, अतिपृथून् = बहुविशालान्, परःशतान् = शताधिकान्, अजगरान् = एतन्नामकान् सर्पविशेषान्, विलोक्य = दृष्ट्वा, साध्वसाधीनः = भयविह्वलः, अभवम् = आसम्, ते = पूर्वसूचिताः हीति वाक्यालङ्कारे, अजगराः = सर्पविशेषाः पूर्वोपवर्णिततत्सहजवैरिपतत्रि-भयविह्वला = प्रथमोक्ततत्स्वाभाविकशत्रुपक्षिभीतिकम्पिताः, दिवसं = दिनं, गिरिकन्दरासु = पर्वतगुहासु, निगूढाः = सुगुप्ताः, अन्धकारावतारे = तमोविलासे, ततो = गिरिकन्दराभ्यः, निष्क्रामन्ति = निर्गच्छन्ति,। अहं = कथानायकः सिन्धुवादः, तस्यां = पूर्ववर्णितायाम्, उपत्यकायां = पर्वतासन्नभूमौ, भ्रमन् = चलन्, यथावसरं = यथासमयं, विश्राम्यन् = श्रमं परिहरन्, सकलं = पूर्णं तं = कष्टबहुलम्, दिवसं = दिनम्, अयापयम् = अत्यवाहयम्। अस्तंगते = अस्तशिखराश्रिते, च, रवौ = सूर्यनारायणे, किञ्चित्, देवखातम् = गुहाम्, उपलभ्य = समवाप्य, शिलया = पाषाणेन, एकया = एकसंख्यकेन, पिहिततत्सङ्कुचितद्वारः = आच्छादितगुहालघुछिद्रः, सर्पभयात् = अजगरभयात्, कथञ्चित् = केनाऽपि प्रकारेण, आत्मानं = स्वं, सुरक्षितम् = अजगरभक्षणभीतिवर्जम् मन्यमानः = स्वीकुर्वाणः, सहानीतं = साकमानीतम्, किञ्चिद्, भोज्यं = खाद्यं, भुक्त्वा = भक्षयित्वा, आशीविषफूत्काराजनितसाध्वसोद्वेगो = सर्पफूत्कृतिजन्यभयोद्विग्नः, जाग्रदेव = अनिद्रित एव, कथमपि = केनाऽपि प्रकारेण, तां = समुपस्थितां, निशां = त्रियामिनीम्, अनैषम् = अनयम्। उदिते = प्राप्तोदये, भगवति = महामहिमशालिनि, दिनकृति = दिवसकरे, विनिर्गतेषु = बहिरागतेषु, च, तेषु = पूर्ववर्णितेषु, कालसर्पेषु = अजगरनामकेषु, सातङ्को = भयविह्वलः हीरकखण्डेषु = हीरकनिचयेषु, परिभ्रमन्नपि = चलन्नपि, तानि = हीरकखण्डानि, ग्रहीतुम् = आदातुम्, अनुदितोत्साहलेशो = अनुत्पन्नचित्तवृत्तिविशेषलेशः, रात्रिजागरेण = यामिनीप्रबोधेन, भृशं = बहु, क्लान्तो = म्लानः, एकस्यां, शिलायाम् = ग्रावायां, पतित्वा = निपत्य, निद्रितः = सुप्तः, मत्सविधे = ममसमीपे, पततो = विपततो, महतो = विशालस्य मांसखण्डस्य = आमिषांशस्य, तारशब्देन = तीव्रनिनादेन, प्रबुद्धः = विगतनिद्रः, गिरितटेभ्यः = पर्वततटेभ्यः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पतन्ति = अधः आगच्छन्ति, बहूनि = प्रचुराणि, अपराणि = अन्यानि, मांसखण्डानि = आमिषशकलानि, पश्यन् = विलोकयन्, विस्मितः = आश्चर्यचकित, आसम् = अभवम् ।

समासः—अतिस्थूलप्रमाणैः = अतिस्थूलं प्रमाणं येषां तैः, असमसुषमैः = असमा सुषमा येषां तैः, हीरकनिकरैः, हीरकाणां निकरैः, दन्तावलनिगरणपर्याप्तायाभिमुखकन्दरान् = दन्तावलानां निगरणाय पर्याप्ताः आयामाः येषां तथाविधानि मुखानि एव कन्दरा येषां तान्, साध्वसाधीनः = साध्वसस्य अधीनः, पूर्वोपवर्णिततत्सहजवैरिपतत्रिभयविह्वलाः = पूर्वम् उपवर्णिताः तेषां सहजवैरिणः ये पतत्रिणः तेषां भयेन विह्वलाः, गिरिकन्दरासु = गिरीणां कन्दरासु, अन्धकारावतारे = अन्धकारस्य अवतारे, यथावसरम् = अवसरम् अनतिक्रम्य, पिहिततत्सङ्कुचितद्वारः = पिहितम् तस्याः सङ्कुचितम् द्वारम् येन सः सर्पभयात् = सर्पाणां भयात् आशीविषफूत्कारजनितसाध्वसोद्वेगो = आशीविषाणां फूत्कारैः जनितः साध्वसस्य उद्वेगो यत्र सः, दिनकृति = दिनं करोति इति दिनकृत् तस्मिन्, अनुदितोत्साहलेशः = अनुदितः उत्साहस्य लेशः यस्य सः, गिरितटेभ्यः = गिरीणां गिरेः वा तटेभ्यः ।

कोषः—'सुषमा परमा शोभा' 'दन्ती दन्तावले हस्ती' देवखातविले गुहा' इति सर्वत्राप्यमरः ।

व्याकरणम्—भ्रम् + शतृ = भ्रमन्, वि + श्रम् + शतृ = विश्राम्यन् ।

अलङ्कारः—दन्तावल—कन्दरान् इत्यत्रोपमालङ्कारः उपमा यत्र सादृश्य लक्ष्मीरुल्लसति द्वयोरिति लक्षणात् । अनुप्रासस्तु सर्वत्र ।

७. प्रश्नः—अधोलिखितस्य व्याख्यानं कार्यं प्रसङ्गपूर्वकम् ।

पूर्वं नाविकगणै र्वर्णितायाम् हीरकोपत्यकायामत्र च वणिग्जनै र्हीरकसम्पादनायाऽऽश्रीयमाणे चित्रेऽभ्युपायेऽश्रद्धालुरभवम् । स उपायो यथा वणिजो हि साहासिनोऽभितो गिरीन् समधिरुह्य ततो मांसखण्डान्यधः उपत्यकायां निपात्य संसक्तानेकहीरकखण्डेभ्यस्तेभ्यो महागृध्रैः सन्निपत्य गिरितटस्थान् कुलायान् नीतेभ्यतान् कोलाहलेन ततो विद्राव्य हीरकखण्डान्यात्मसात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करीन्द्राणां विदारणं क्षेपणे च समर्थैः हीरकाल्पखण्डैः = हरिकाणाम् अल्पैः खण्डैः, तद्द्वीपसुलभं = तस्मिन् द्वीपे सुलभं, वस्तुजातं = वस्तूनां जातम्, स्वनिवासभुवं = स्वनिवासस्य भुवं ।

कोषः—'गण्डके खड्गखड्गिनौ', घोणा नासा च नासिके' इत्युभयत्राप्यमरः ।

व्याकरणम् = नी + क्त्वा = नीत्वा, परि + तुष् + क्त्वा + ल्यप् = परितोष्य, दृश् (पश्) + शतृ = पश्यन् ।

१०. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

एवं सिन्धुवादः स्वां द्वितीयां सिन्धुयात्रामुपवर्ण्य हितवादाय पूर्ववच्छतं दीनारान् प्रदाय भूयोऽपि परेऽह्नि भोक्तुं तृतीययात्रावर्णनश्रवणेनात्मानं विनोदयितुञ्च निमन्त्र्य सर्वैरतिथिभिः सह विससर्ज ।

अन्येद्युश्च यथासमयं समुपस्थितेषु तेष्वभ्यागतेषु कृतभोजनेषु सिन्धुवाद एवं स्वां तृतीययात्रां वर्णयितुमारेभे ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचिते सिन्धुवादवृत्ताख्यगद्यन्बधस्य द्वितीयसिन्धुयात्राप्रसङ्गेऽत्र सिन्धुवादः कथानायकः हितवादम् द्वितीय सिन्धुयात्रोपसंहारभूतां कथां वर्णयति ।

व्याख्या—एवं = पूर्वोक्तप्रकारेण, सिन्धुवादः = कथानायकः, स्वां = निजां, द्वितीयां = प्रथमेतरां, सिन्धुयात्राम् = सागरगमनम्, उपवर्ण्य = वर्णयित्वा, हितवादाय = कथाश्रवणरताय भारवहनवृत्तिजनाय, पूर्ववच्छतं = प्रथमयात्रावच्छतसंख्यकम्, दीनारान् = सुवर्णमुद्राविशेषान्, प्रदाय = दत्वा, भूयोऽपि = पुनरपि, परे = द्वितीये, अहनि = दिवसे, तृतीययात्रावर्णनश्रवणेन = द्वितीयेतरयात्रावर्णनाकर्णनेन, आत्मानं = स्वं, विनोदायितुं = मनोरञ्जनं कर्तुं निमन्त्र्य = निमन्त्रणं दत्वा, सर्वैः समस्तैः समुपस्थितैः, अतिथिभिः = अभ्यागतैः सह = साकं, विससर्ज = विसर्जितमकरोत् ।

अन्येद्युश्च = अपरेद्युश्च यथासमयं = यथाकालं, समुपस्थितेषु = समागतेषु, तेषु = श्रवणलीनेषु, अभ्यागतेषु = अतिथिषु, कृतभोजनेषु = विहिता-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शनेषु, सिन्धुवादः = कथानायकः, एवं = वक्ष्यमाणप्रकारेण, स्वां = निजां तृतीययात्रां = द्वितीयेतरयात्रां, वर्णयितुम् = कथयितुम्, आरेभे = समारभत

समासः—सिन्धुयात्रां = सिन्धोः यात्रां, तृतीययात्रावर्णनश्रवणेन = तृतीयायाः यात्रायाः वर्णनस्य श्रवणेन । कृतभोजनेषु = कृतं भोज[नं] यैस्तेषु ।

कोषः—'घस्रो दिनाहनी वा तु क्लीवे दिवसवासरौ इत्यमरः :

व्याकरणम्—प्र + दा + क्त्वा + ल्यप् = प्रदाय, नि + मन्त्र + क्त्वा + ल्यप् = निमन्त्र्य ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशितं ।
सिन्धुवादस्य वृत्तेऽस्मिन् यात्राऽगात् प्रथमापरा ।।२।।

तृतीयासिन्ध्यात्रा

१. प्रश्नः—अधोलिखितांशस्य व्याख्या कार्या ।

तदनु सुखेन कालं यापयन् विस्मृतयात्राद्वयक्लेशभरः कुतूहलप्रचुरत[या] यौवनस्यालासगृहनिवासान् निर्विण्णोऽविगणितसिन्धुयात्रासुलभकष्ट[सं]शंयसम्भवः कैश्चिदिभ्यैः सभ्यै र्वणिग्जनैः सह भूयः प्रयातो वा[...] पुरमवाप्य पोताधिरुढोऽन्तरान्तरा मार्गपातितेषु द्वीपेषु सलाभं पण्यज[ातं] विक्रीणानो दिवसगणसमाप्यां यात्रामुद्दिश्याऽवहम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृ[त्ता]ख्यगद्यबन्धतृतीयसिन्धुयात्रातो गृहीतोऽयमंशः व्याख्यानाय । सिन्धुवा[दः] हितवादमुखजनगणं श्रावयति तृतीययात्रारम्भप्रकारमत्र ।

व्याख्या—तदनु = द्वितीययात्राकष्टानुभवात् पश्चात्, सुखेन = शर्मयु[क्त] प्रकारेण, कालं = समयं, यापयन् = हापयन्, विस्मृतयात्राद्वयक्लेशभरः [=] स्मृतिविगलित प्रथमद्वितीययात्राकष्टसमूहः, कुतूहल प्रचुरतया = औत्सु[क्या]धिक्येन, यौवनस्य = तारुण्यस्य, अलसगृहनिवासात्=आलस्ययुक्तगृहवास[ात्]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्विण्णः = खिन्नमानसः, अविगणितसिन्धु यात्रासुलभकष्टातिशयसम्भवः = अनाकलितसागरप्रवासप्राप्य दुःखातिरेकोत्पत्तिः, कैश्चिद् = कतिपयैः इभ्यैः = धनिभिः, सभ्यैः = सभामानितैः, वणिग्जनैः = व्यापारिवर्गैः, सह = साकं, भूयः = पुनः, प्रयातो = निर्गतः, वासरपुरम् = पोतप्राप्तिस्थानभूतं नगर-विशेषम्, अवाप्य=गत्वा पोताधिरूढो=जलयानकृतारोहणः, अन्तरान्तरा= मध्ये मध्ये मार्गपतितेषु = पथि समागतेषु, द्वीपेषु = अन्तरीपेषु, सलाभं= लाभपूर्वकम्, पण्यजातं = विक्रेय वस्तुनिचयं, विक्रीणानो=विक्रयं कुर्वाणः, दिवसगणसमाप्यां=दिनसमूहसमापनयोग्याम्, यात्रां=समुद्रवासम्, उद्दिश्य अभिलक्ष्य, अवहम् = प्रासर्पम् ।

समासः—विस्मृतयात्राद्वयक्लेशभरः=विस्मृतः यात्राद्वयस्य क्लेशभरः येन सः, कुतूहलप्रचुरतया = कुतूहलेन प्रचुरतया, अलसगृहनिवासात् = अलसः यः गृहे निवासः तस्मात्, अविगणितसिन्धुयात्रासुलभकष्टातिशय-सम्भवः = अविगणितः सिन्धुयात्रयोः सुलभः कष्टातिशयस्य सम्भवः येन सः, पोताधिरूढः = पोतम् अधिरूढः, मार्गपतितेषु=मार्गे पतितेषु, पण्य-जातं=पण्यानां जातं, दिवसगणसमाप्यां=दिवसानां गणः तेन समाप्यां ।

कोषः—'इभ्यआढ्यो धनी स्वामी' 'यथान्तरेन्तरा अन्तरेण च मध्ये स्युः' इत्युभयत्राप्यमरः ।

व्याकरणम्—यापयन् = यापि + शतृ, प्रयातः = प्र + या + क्त ।

२. प्रश्नः—व्याख्येयोऽधोलिखितो गद्यभागः ।

एकस्मिन् दिवसे सिन्धुमध्ये प्रवहतोऽस्मान् सहसा समुद्भूतः कतिपय-दिवसाननुस्यूतो भीष्मः प्रभञ्जन एकत्रान्तरीये पोताध्यक्षेण परिहर्तुमिष्टेऽपि नियते बलात् सरभसम् समक्षिपत् । अथ संविग्नमनाः पोताध्यक्षोऽस्मान-वादीत्—

'इदमासन्नानि च कानिचिद् द्वीपान्तराणि हिंस्रवृत्तिभिः कैश्चन् कचा-ञ्चित शरीरैर् वन्यैर्जनैर्नरभक्षकै र्ह्रस्वाकृतिभिरप्यगण्यैराधिष्ठितानि इति' ।

उत्तरम्—प्रसङ्गः—अस्ति सिन्धुवादवृत्तं नाम कथाग्रन्थः । अस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रचनाकारोऽस्ति श्री म० म० लक्ष्मणशास्त्रिमहोदयः। तृतीय सिन्धुयात्रा-तोवतरितः गद्यांशोऽयं कथयति चात्र हितवादं सिन्धुवादः प्रभञ्जन समागमे यात्रिसंचालकव्यवहारौ।

व्याख्या—एकस्मिन् = अन्यतमे, दिवसे = घस्त्रे, सिन्धुमध्ये = सागर-मध्ये, प्रव्रहतो = अपसर्पतो, अस्मान् = पोताधिरुढान्, सहसा = अकस्मात्, समुद्भूतः = समुत्पन्नः, कतिपयदिवसान् कांश्चन दिनान्, अनुस्यूतः = परिव्याप्तः, भीष्मः = भयङ्करः, प्रभञ्जनः = वात्याचक्रम् एकत्रान्तरीपे एकस्मिन् द्वीपे पोताध्यक्षेण = जलयानचालकेन, परिहर्तुम् = निराकर्तुम्, इष्टे = वाञ्छिते, अपि, नियते = भाग्यस्य, बलात् = प्रभावात्, सरभसम् = सवेगम्, समक्षिपत् = अपातयत्। अथ = अनन्तरं, संविग्नमनाः = व्याकुल-मानसः पोताध्यक्षः = जलयानचालकः, अस्मान् = वहित्राधिरुढान्, अवा-दीत् = अवदत्—

इदम् = पुरोऽवलोक्यमानम्, आसन्नानि = समीपस्थानि, च, कानि-चिद् = कतिपयानि, द्वीपान्तराणि = अन्तरीपान्तराणि, हिंस्रवृत्तिभिः = हिंसकस्वभावैः, कैश्चन, कचाचित शरीरैः = बालावृत्तदेहैः, वन्यैः = जङ्गलो-द्भवैः जनैः नरैः, नरभक्षकैः = मानवाशनशीलैः, ह्रस्वाकृतिभिः = लध्वा-कारैः, अपि, अगण्यैः गणयितुमशक्यैः, अधिष्ठितानि, सेवितानि, सन्ति इति शेषः। इति।

समासः—सिन्धुमध्ये = सिन्धोः मध्ये, कतिपयदिवसान् = कतिपयान् दिवसान् पोताध्यक्षा = पोतस्य अध्यक्षो, द्वीपान्तराणि = अन्यद्वीपो द्वीपान्त-रम् तानि, हिंस्रवृत्तिभिः = हिंस्राकृतिः वृत्तिः येषां तैः, कचाचितशरीरैः = कचैराचितानि शरीराणि येषां तैः, ह्रस्वाकृतिभिः = ह्रस्वाः आकृतयः येषां तैः, नरभक्षकैः = नाराणां भक्षकैः।

कोषः—'दारुणं भीषणं भीष्मम्' 'भाग्यं स्त्री नियति विधिः, 'कच केशः शिरोरुहः' इति सर्वत्राप्यमरः।

व्याकरणम्—गण् + णिच् + यत् = गण्यं न गण्यम् = अगण्यम् तैः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३. प्रश्नः—अधोलिखित गद्यभागस्य व्याख्या कार्या।

तदेतत्तस्य वचनं निशम्य भीता वयं तेन यथाकथितमगणेयं घोराकृतिं वन्यमानुषव्रजमनुपदमेवास्मानुद्दिश्य त्वरयाऽऽगच्छन्तं दीर्घलोहितलोमसंच्छन्न निखिलतनुम् अपश्याम। ते तु तीरमुपगम्य झटिति सिन्धौ क्षिप्तात्मानस्तरन्त उपसृत्य सर्वतोऽस्मत्प्रवहणम् पर्यवेष्टयन् उच्चैः किमपि भाषमाणा अस्माभिरनवबुध्यमानभाषास्ते प्रवहणे रज्जुनिचय मवलम्ब्य पोतान्तरं प्राविशन्। बलाच्च प्रवहणम् तीरमानीयऽस्मान् अनिच्छतोऽपि रोधस्यवतारयन्।

उत्तरम्—प्रसङ्गः—गृहीतोऽयमंशः सिन्धुवादवृत्ततृतीययात्रातः श्री म० म० लक्ष्मणशास्त्रिरचितात्। सिन्धुवादोऽत्र हितवाद वर्णयति प्रभञ्जनकारणादज्ञातदेशतटस्थापित पोते प्रवेशादिकं तद्देशस्थजनानां बलात् गमनशीलानां पोतादवतारणं च।

व्याख्या—तदेतत् = पूर्वोक्तं हिंस्राणां देशोऽयमिति पोताध्यक्षसूचनारूपं, तस्य = पोतचालकस्य, वचनं = वाक्यम्, निशम्य = श्रुत्वा, भीता = कान्दीशिका, वयं = पोताधिरुढयात्रिणः, तेन = प्रवहणचालकेन, यथाकथितम् = कथनानुरूपम्, अगणेयम् = असङ्ख्येयम्, घोराकृतिम् = भयङ्कराकारम्, वन्यमानुषव्रजम् = जाङ्गलनरसमूहम्, अनुपदमेव = अनन्तरमेव, अस्मान् = यात्रानिरतान्, उद्दिश्य = अभिलक्ष्य, त्वरया = वेगेन, आगच्छन्तं समायान्तं, दीर्घलोहितलोमसंच्छन्ननिखिलतनुम् = विशालरक्तकचाच्छन्नसर्वशरीरम्, अपश्याम = अद्राक्षम। ते = वन्या जनाः, तु, तीरम् = तटम् उपगम्य = आगत्य, झटिति = शीघ्रम् सिन्धौ = सागरे, क्षिप्तात्मानः = निक्षिप्त शरीराः, तरन्तः = कृतसन्तरणाः, उपसृत्य = आगत्य, सर्वत = परितः, अस्मत्प्रवहणम् = अस्मदीयपोतम्। पर्यवेष्टयन्, = पर्यवारयन्, उच्चैः = तारस्वरेण, किमपि = अव्यक्तमज्ञातं च, भाषमाणा = वदन्तः, अस्माभिरनवबुध्यमानभाषाः = सिन्धुवादादिभिरज्ञेय शब्दाः ते = वन्याः, प्रवहणे = पोते, रज्जुनिचयम् = डोरिकागणम्, अवलम्ब्य = आश्रित्य, पोतान्तरं = प्रवहणाभ्यन्तरं प्राविशन् = प्रवेशमकुर्वन्। बलात = हठात्, च, प्रवहणम् = पोतम्,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तीरम् = तटम्, आनीय = समानीय, अस्मान् = यात्रिणः, अनिच्छतोऽपि = नेच्छतोऽपि, रोधसि—कूले, अवातारयन् = अवतारयन्ति स्म ।

समासः—कथाकथितम् = कथितमनतिक्रम्य, अगणेय = न गणेयम् अगणेयम्, घोराकृतिम् = घोरा आकृतिः यस्य तं, वन्यमानुषव्रजम् = वन्यानां मानुषाणां व्रजम्, दीर्घलोहितलोभसंच्छन्ननिखिलतनुम् = दीर्घैः लोहितैः लोमभिः संच्छन्ना निखिला तनुः यस्य तं, क्षिप्तात्मानः = क्षिप्ता आत्मा यैस्ते, अस्मत्प्रवहणम् = अस्माकम् प्रवहणम्, अनवबुध्यमान-भाषाः = न बुध्यमाना भाषायेषां ते, रज्जुनिचयम् = रज्जूनां निचयम्, पोतान्तरं = पोतस्य अन्तरं ।

कोषः—'तनूरुहं रोम लोम' 'यथाऽन्तरेऽन्तरा' इत्युभयत्राप्यमरः ।

व्याकरणम्—नि + शम् + क्त्वा + ल्यप् = निशम्य,

४. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

एवं सिन्धुयात्राकुशलैः कैवर्तैं ईरतः परिहृतप्रवेशोऽस्मिन् प्रदेशे नियत्याक्षिप्ता आत्मपरिमाणेऽक्षमास्तच्छन्दानुरोधेनताननुसरन्तो वर्त्मनि सुलभानि कानिचित्फलमूलानि प्राणसन्धारणाय भक्षयन्तश्च वयं कञ्चनाध्वानमतिक्रम्य कञ्चिन्महोत्सेधं विशाल तोरणमायतं बाह्याङ्गणप्रदेशम् प्रासादमद्राक्ष्म । तदन्तश्च वलात् प्रवेशिता एकत्र गिरिकूटोपमं नरास्थिचयमन्यत्र च मांसश्रपणाय कृतान्नैकान् गर्तानवलोक्य भयेन कम्पमानाः कञ्चनकालमालेख्योल्लिखिता इव निश्चलाङ्गा अतिष्ठाम् । साध्वसावलुप्तधृतयोऽध्वश्रमपरिखिन्ना वेपथुस्खलच्चरणाश्च वयं निश्चेतना भूमावपताम ।

उत्तरम्—प्रसङ्गः—भयानकरसप्रस्तावनाभूतोऽयमंशः सिन्धुवादवृत्तस्य तृतीयसिन्धुयात्रागतः श्री म० म० लक्ष्मणशास्त्रिविरचितः । सिन्धुवादो हितवादं श्रावयति यत्—वन्यमानुषैः सिन्धुयात्रिणः सागरतटात् कुत्र नीताः इति ।

व्याख्या—एवं = प्रकारेणानेन, सिन्धुयात्राकुशलैः = सागरप्रवासचतुरैः, कैवर्तैः = धीवरैः परिहृतप्रवेशे = परित्यक्तप्रवेशे, नियत्या = भाग्यवशेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षिप्ता = प्रक्षिप्ता, आत्मपरित्राणे = निजरक्षणे, अक्षमा = असमर्थाः तच्छन्दानुरोधेन = वन्यमानुषाभिप्रायानुरोधेन, तान् = वन्यमानुषान्, अनुसरन्तो = अनुगच्छन्तो, वर्त्मनि = मार्गे, सुलभानि = प्राप्यानि, कानिचित् = कतिपयानि, फलमूलानि, प्राणसन्धारणाय = जीवनरक्षणाय, भक्षयन्तः = खादयन्तः, च, वयं = सिन्धुवादमुख्या यात्रिणः, कञ्चन = अज्ञातम्, अध्वानं = मार्गम्, अतिक्रम्य = गत्वा, कञ्चिन् = एकतमं, महोत्सेधम् = अत्युन्नतं, विशालतोरणम् = महाबहिर्द्वारम्, आयतम् = विशालं, बाह्याङ्गणप्रदेशं = बाह्याजिरभागम्, प्रासादम् = हर्म्यम्, अद्राक्ष्म = अपश्याम । तदन्तः = प्रासादाभ्यन्तरे, च, बलात् = हठात्, प्रवेशिता = प्रवेशं कारिता, एकत्र = एकस्मिन् स्थाने, गिरिकूटोपमम् = पर्वतशिखरसन्निभम्, नरास्थिसञ्चयम् = मानवास्थिसमूहम्, अन्यत्र = अपरत्र, च, मांसश्रपणाय = आमिषपाचनाय, कृतान् = निर्मितान्, नैकान् = एकाधिकान्, गर्तान् = अवटान्, अवलोक्य = विलोक्य, भयेन = भीत्या, कम्पमाना = विकम्पमानाः, कञ्चन = स्तोकम्, कालम् = समयम्, आलेख्योल्लिखिता इव = चित्रलिखिता इव, निश्चलाङ्गा = निश्चेष्टाङ्गाः, अतिष्ठाम = अभवाम । साध्वसावलुप्तधृतयो = भयलुप्तधैर्याः, अध्वश्रमपरिखिन्ना = मार्गश्रमालसाः वेपथुस्खलच्चरणा = कम्पस्खलत्पादाः, च, वयं = सिन्धुवादः तत्सहचराश्च, निश्चेतना = चेतनारहिता, भूमी = धरायाम् अपताम् = स्खलितवन्तः ।

समासः—सिन्धुयात्राकुशलैः = सिन्धोः यात्रायां कुशलैः, परिहृतप्रवेशे = परिहृतः प्रवेशः यत्र तत्र, आत्मपरित्राणे = आत्मनः परित्राणे, तच्छन्दानुरोधेन = तेषां छन्दस्य अनुरोधेन, फलमूलानि = फलानि च मूलानि च, तानि, प्राणसन्धारणाय = प्राणानां सन्धारणाय, महोत्सेधं = महान् उत्सेधो यस्य तं, विशालतोरणम् = विशालं तोरणम् यस्य तत्, बाह्याङ्गणप्रदेशं = बाह्यश्चासौ अङ्गणप्रदेशश्च तं । गिरिकूटोपमं = गिरेः कूटस्य, उपमा यस्य तम् नरास्थिसंचयं = नराणाम् अस्थीनां संचयं, मांसश्रपणाय = मांसस्य श्रपणाय, आलेख्योल्लिखिता = आलेख्ये उल्लिखिता, निश्चलाङ्गा = निश्चलानि अङ्गानि येषां ते, साध्वसावलुप्तधृतयः = साध्वसेन अवलुप्ताः धृतयः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येषां ते, अध्वश्रमपरिखिन्ना = अध्वनः श्रमेण परिखिन्ना, वेपथुस्खलच्चरणाः वेपथुना स्खलन्तः चरणा येषां ते ।

कोषः—'कैवर्ते दाशधीवरै' 'तोरणोस्त्री बहिर्द्वारम्' अथ वेपथुः कम्प' इति सर्वत्राप्यमरः ।

व्याकरणम्—दूरतः = दूरशब्दात् तसिल्प्रत्ययः, अतिक्रम्य = अति + क्रम + क्त्वा + ल्यप् ।

५. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः ।

अस्तमुपगते च भगवति चण्डदीधितौ समहास्वनं द्वारमुद्घाट्यगतं करालाकृतिं तालोच्छ्रयं भालस्थलज्वलदेकलोहितचक्षुषम् घोरघोणं व्यायतदंष्ट्रं तुरङ्गमायतमुखमावक्षःस्थलप्रलम्बमानाधरं दन्तावलश्रवसं कङ्कनिशितनखागं पुरुषतरं पुरुषमेकं निरीक्ष्य गतप्राणा इव वयं निश्चेतनाश्चिरमतिष्ठाम ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ताख्यगद्यबन्धे तृतीयसिन्धुयात्राप्रसङ्गे वन्यप्रदेशहर्म्याङ्गणे विकरालपुरुषदर्शनं वर्णयति सिन्धुवादो हितवादम् ।

व्याख्या—अस्तम् = अस्ताचलम्, उपगते = याते, च, भगवति = महामहिमशालिनि, चण्डदीधितौ = समहास्वनं = तारस्वरबहुलम् द्वारम् = कपाटम् उद्घाट्यागतम् = अनावृतकपाटं कृत्वा समायातं, करालाकृतिं = भयङ्कराकारं, तालोच्छ्रयम् = तालसमानोन्नतं, भालस्थलज्वलदेकलोहित चक्षुषं = ललाटस्थलज्वलदेकरक्तनेत्रम्, घोरघोणं = करालनासिकं, व्यायतदंष्ट्रं = दीर्घदंष्ट्रं, तुरङ्गमायतमुखं = घोटकदीर्घवदनम्, आवक्षः स्थल प्रलम्बमानाधरम् = वक्षः स्थलमभिव्याप्यलम्बमानोष्ठम् दन्तावलश्रवसं = गजकर्णम्, कङ्कनिशितनखाग्रं = लोहपृष्ठतीव्रनखाग्रभागं, परुषतरं = कर्कशतरं, पुरुषम् = नरम्, एकम् = एकसंख्यम्, निरीक्ष्य = विलोक्य, गतप्राणाः = निर्गतप्राणाः, इव = यथा, वयं = सार्थवाहाः, निश्चेतना = चेतनारहिता, चिरं = बहुकालम् अतिष्ठाम् = अभवाम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समासः—चण्डदीधितौ = चण्डा दीधितयो यस्य तस्मिन्, समहास्वनं = महास्वनेनसहितम्, करालाकृतिम् = कराला आकृतिः यस्य तं, तालोच्छ्रायं = तालवत् उच्छ्रायं यस्य तत्, भालस्थलज्वलदेकचक्षुषं = भालस्थले ज्वलत् एकं चक्षुः यस्य तं, घोरघोणं = घोरा घोणा यस्य तं, व्यायतदंष्ट्रं = व्यायता दंष्ट्रा यस्य तं, तुरङ्गमायतमुखम् = तुरङ्गमस्येव आयतं मुखं यस्य तम्, आवक्षःस्थलप्रलम्बमानाधरं = वक्षः स्थलमभिव्याप्य प्रलम्बमानः अधरः यस्य तं, दन्तावलश्रवसं = दन्तावलस्य श्रवसी इव श्रवसी यस्य तम्, कङ्कनिशितनखाग्रं = कङ्कस्येव निशितं नखाग्रं यस्य तं, गतप्राणाः = गता प्राणाः येषां ते।

कोषः—'घोणा नासा च नासिका' 'लोहपृष्ठस्तु कङ्कः स्यात्' इत्युभयत्राप्यमरः।

व्याकरणम्—निर + ईक्ष + क्त्वा + ल्यप् = निरीक्ष्य।

६. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अथास्मासु लब्धचेतनेषु साकूतं निर्वर्णयन् स मामुपसृत्य गृहीत्वा च शौनिक इव मेषशावकं सर्वतः परीक्षमाणोऽस्थिचर्मावशेषमुपलभ्यात्यजत्। क्रमेण चास्मत्सहचरेषु प्रत्येकं तथैव परीक्षमाणः पोताध्यक्षं स्थविष्ठं समुपलभ्य कुन्तेन निशितेन सपत्राकृत्य वैश्वानरं प्रज्वाल्य शूलाकृत्याभ्यन्तरं जघास समाप्तभोजनश्चागत्य वज्रनिर्घोषभीषणेन घर्घरस्वरेण दिशोऽभियूरयन् सुष्वाप। प्रभाते चोत्थितोऽस्मान् भीतिविहतांस्तत्रैव प्रासादे समुत्सृज्य क्वचिदयासीत्।

उत्तरम्—प्रसङ्गः—वर्णयत्यत्र सिन्धुवादः हितवादं स्थविष्ठपोतचालकभक्षणवृत्तं तृतीय सिन्धुयात्रायाम् श्री म० म० लक्ष्मणशास्त्रिरचितायां सिन्धुवादवृत्तकथायाम्।

व्याख्या—अथ = पश्चात्, अस्मासु = समुद्रप्रवासिषु, लब्धचेतनेषु = प्राप्तज्ञानेषु, साकूतं = साशयं, निर्वर्णयन् = पश्यन् स मामुपसृत्य = सिन्धुवादमागत्य, गृहीत्वा = समादाय, च, शौनिकः = वधिकः, इव = यथा, मेषशावकम् = अविसुतम्, सर्वतः = परितः, परीक्षमाणो = निरीक्षमाणः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्थिचर्मावशेषम् = अस्थिचर्ममात्रावशिष्टम्, उपलभ्य = सम्प्राप्य, अत्यजत् = त्यक्तवान् । क्रमेण = क्रमशः, च, अस्मत्सहचरेषु = अस्माकम् मित्रेषु, प्रत्येकं, तथैव = पूर्ववदेव, परीक्षमाणः = सम्परीक्षमाणः, पोताध्यक्षं = यानचालकं, स्थविष्ठम् = स्थूलातिस्थूलं, समुपलभ्य = समनुप्राप्य, कुन्तेन = भल्लेन, निशितेन = तीक्ष्णेन, सपत्राकृत्य = सपक्षवाणबिद्धं कृत्वा, वैश्वानरं = वह्निं, प्रज्वाल्य = दीपयित्वा, शूलाकृत्य = लौहकीलकैराबिद्धच, अभ्यन्तरे = गृहान्तरे, नीत्वा, जघास = भक्षयामास । समाप्तभोजनश्च = कृताऽऽहारश्च, आगत्य = आगमनं कृत्वा, वज्रनिर्घोषभीषणेन = भयङ्करेण, घर्घरस्वरेण = घर्घरध्वनिना, दिशः ककुभः, अभिपूरयन् = परिपूरयन्, सुष्वाप = निदद्रौ । प्रभाते = प्रातः, च, उत्थितः = जागरितः, अस्मान् = सिन्धुवादप्रमुखान्, भीतिविहृतान् = भयविह्वलान्, तत्रैव = तस्मिन्नेव स्थाने, प्रासादे = हर्म्ये, समुत्सृज्य = त्यक्त्वा, क्वचित् = कुत्रचिद्, अयासीत् = जगाम ।

समासः—लब्धचेतनेषु = लब्धा चेतना यैः तेषु, मेषशावकं = मेषस्य शावकं, अस्थिचर्मावशेषम् अस्थीनां चर्मणां च अवशेषो यत्र तत् । पोताध्यक्षं = पोतस्य अध्यक्षं, समाप्तभोजनः = समाप्तं भोजनं येन सः वज्रनिर्घोषभीषणेन = वज्रस्य निर्घोषः तेन भीषणम् तेन, भीतिविहृतान् = भीत्या विहृतान् ।

कोषः—'अग्नि वैश्वानरो वह्निः' इत्यमरः ।

व्याकरणम्—शौनिकः = शूना प्रयोजनमस्येति शौनिकः, अण् प्रत्ययः ।

७. प्रश्नः—व्याख्येयोऽधोलिखितो गद्यभागः ।

तस्मिंश्च कियद्दूरं गते तत्प्रबोधनभयेन निखिलां रात्रिं तूष्णीं स्थिता वयं शोकोद्गारैः सकलमेव तं सौधं प्रतिध्वनयन्तोऽस्मत् साधारणवैरिणस्तस्य निवर्हणोपायान् नानाविधान् विरचिन्तयन्तोऽपि नैकं समुचितं कर्मण्युपलभ्य सचिन्तास्तं निखिलं दिवसं तस्मिन् द्वीपे भ्रमन्तः फलमूलानि यथा लाभं भक्षयन्तः परमेश्वरानुग्रहैकशरणाः सायं भूयस्तं प्रासादं प्रत्यावर्तामहि । (सम्पू० सं० वि० वि० ८४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—हितवादं वर्णयति सिन्धुवादः तृतीयवर्णनायां सिन्धुवादवृत्तकथायां श्री म० म० लक्ष्मणशास्त्रिरचितायां नरपिशाचान्मुक्तिकथानकमत्र ।

व्याख्या—तस्मिन् = स्थाविष्ठपोतचालकभक्षके, कियद्दूरं = स्वल्पदूरं, गते = प्रयाते, तत्प्रबोधनभयेन = नरभक्षकजागरणभीत्या, निखिलां = सकलां रात्रिं = निशां, तूष्णीं = मौनं, स्थिता = वर्तमानाः, वयं = सागरयात्रिणः, शोकोद्गारैः = करुणविलापैः, सकलमेव = सम्पूर्णमेव, तं = वधस्थानभूतं, सौधं = प्रासादं, प्रतिध्वनयन्तो = प्रतिध्वनिविषयतां नयन्तः, अस्मत्साधारणवैरिणः = अस्माकं सामान्यशत्रोः, तस्य = नरभक्षकस्य, निर्वहणोपायान् = मारणोपायान्, नानाविधान् = बहुप्रकारान्, विचिन्तयन्तोऽपि = परिचिन्तयन्तोऽपि, नैकं = नैकं, समुचितं = योग्यम्, कर्मण्यम् = कर्मयोग्यम्, उपलभ्य = अवाप्य, सचिन्ता = चिन्तायुक्ताः, तं = वर्तमानं निखिलं = पूर्णं, दिवसं = दिनं, तस्मिन् = बलात्प्रवहणादवतारिते, द्वीपे = अन्तरीपे, भ्रमन्तः = चलन्तः, फलमूलानि, यथालाभं = सुलभं यथा, भक्षयन्तः = खादन्तः, परमेश्वरानुग्रहैकशरणाः = शिवकृपैकाश्रयाः, सायं = सन्ध्यायां, भूयः = पुनः, तं = वधस्थलभूतं, प्रासादं = हर्म्यं, प्रत्यावर्तामहि = पुनरागच्छाम ।

समासः—तत्प्रबोधनभयेन = तस्य प्रबोधनस्य भयेन, शोकोद्गारैः = शोकस्य उद्गारैः, अस्मत्साधारणवैरिणः = अस्माकम् साधारणवैरिणः, निर्वहणोपायान् = निर्वहणस्योपायान्, फलमूलानि = फलानि च मूलानि च, यथालाभं = लाभमनतिक्रम्य, परमेश्वरानुग्रहैकशरणा = परमेश्वरस्य अनुग्रहः एव एकं शरणं येषां ते ।

कोषः—'प्रमापणं निर्वहणम् निकारणम् विशारणम्' इत्यमरः ।

व्याकरणम्—कर्मण्यम्—कर्मणि साधुः यत् प्रत्ययः ।

८. प्रश्नः—अधोलिखितांशः व्याख्येयः ।

स तु नरपिशाचः पूर्ववत् प्रतिनिवृत्यास्मास्वेकं कवलीकृत्याप्रभातम-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शेत। एवं जीवितनिराशानस्मान् सिन्धुनिमज्जनमेव शरणं मन्यमानांस्तथाकर्तुं प्रवृत्तान्निरीक्ष्यैकोन्धतामिस्रपातकविभीषिकयाऽऽत्मघातान्निरवारयत्।

उत्तरम्—प्रसङ्गः—सिन्धुवादोऽत्रवर्णयति हितवादं यत् दृष्ट्वा नरभक्षणं वन्यमानुषस्य चिन्ताकुलः सिन्धुमज्जनाद्यतः भक्षणावशिष्टवणिग्वर्गः केन निवारितः इति तृतीयसिन्धुयात्रायां सिन्धुवादवृत्तकथायां श्री म० म० लक्ष्मणशास्त्रिविरचितायाम्।

व्याख्या—सः = पूर्ववर्णितः, तु, नरपिशाचः = मानवराक्षसः, पूर्ववत् = प्रथमवत्, प्रतिनिवृत्य = परावर्तनं कृत्वा, अस्मासु = स्थविष्ठबालकभक्षणावशिष्टव्यापारिजनेषु, एकम् = अन्यतमं, कवलीकृत्य = भुक्त्वा, आप्रभातम् = प्रातः कालं यावत्, अशेत = शयनमकरोत्। एवं = प्रतिदिनभक्षणप्रवृत्तिदर्शनोत्तरं, जीवितनिराशान् = त्यक्तस्वजीवनाशान्, अस्मान् = जनद्वयभक्षणावशिष्टान् वणिग्जनान्, सिन्धुनिमज्जनम् = सागरान्तःप्रवेशनमेव, शरणम् = अवलम्बनम्, मन्यमानाम् = स्वीकुर्वाणान्, तथाकर्तुम् = आत्मघातं कर्तुं, प्रवृत्तान् = निरतान्, निरीक्ष्य = दृष्ट्वा, एकः = सहचरेष्वन्यतमः, अन्धतामिस्रपातकविभीषिकया = अन्धतामिस्रनामकनरकपातभयेन आत्मघातात् = स्ववधात्, निरवारयत् निवृत्तान् अकरोत्।

समासः—नरपिशाचः = नरः पिशाचइव, जीवितनिराशान् = जीवितात् निराशान्, सिन्धुनिमज्जनम् = सिन्धोः निमज्जनम्, अन्धतामिस्रपातकविभीषिकया = अन्धतामिस्रे पातकस्य विभीषिकया, आत्मघातात् = आत्मनः घातात्।

कोषः—'मनुजाः मानवाः नराः' इत्यमरः।

व्याकरणम्—कृ + तुमुन् + कर्तुम्।

९. प्रश्नः—व्याख्येयोऽधोलिखितो गद्यभागः।

अथाहं तान् मत्सहचरानेवमब्रवम्—आर्याः नन्वयं द्वीपः काष्ठप्रचुरः तत्तेभ्य फलकानि सम्पाद्य क्वचिद् गूढं निक्षिप्य तदुपयोगौपयिकमवसरं प्रतीक्षेमहि। मया ह्यस्य पुरुषादहतकस्य विनाशायैक उपायश्चिन्तितः। तस्मिन् किल साफल्यमुपगते सधैर्यमत्रैव कमपि पोतं सम्भाव्यागममनुपाल-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यन्तः कालं क्षपयेम । अन्यथा तु फलकाश्रयेण समुद्रमाश्रयेम । अपायबहुलमपि फलकाश्रयेण सिन्धुतरणम् नूनमेतन्नरपिशाचमुखकन्दराप्रवेशाच्छ्रेय इति । ते तु एतमुपायमन्वमन्यन्त । अथ वयं बृहन्ति काष्ठफलकानि प्रत्येकं नरत्रयवहनपर्याप्तावकाशानि पर्यकल्पयाम ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तकथातृतीयसिन्धुयात्रातो गृहीतेऽस्मिन्नंशे कथयति सिन्धुवादः हितवादं नरपिशाचवधोपायं स्वप्रोक्तम् ।

व्याख्या—अथ = आत्मघातवारणानन्तरम्, अहं = सिन्धुवादः, तान् = सहचरान् व्यापारिणः, मत्सहचरान् = सिन्धुवादसुहृदः, एवम् = वक्ष्यमाणरीत्या, अब्रवम् = अवदम्—आर्याः = श्रीमन्त = सभ्या वा ! ननु = वाक्यालङ्कारे, अयं = वर्तमानः, द्वीपः = अन्तरीपः, काष्ठप्रचुरः = काष्ठबहुलः, तत्, तेभ्यः = काष्ठेभ्यः, फलकानि = पट्टिकाः, सम्पाद्य = निर्माय, क्वचिद् = कुत्रचिद्, गूढं = निगूढं गुप्तं वा, निक्षिप्य = प्रक्षिप्य, तदुपयोगौपयिकम् = काष्ठोपयोगयुक्तम्, अवसरं = कालं, प्रतीक्षेमहि = संप्रतीक्षेमहि । मया = सिन्धुवादेन, हि, अस्य = नरभक्षकस्य, पुरुषादहतकस्य = नरभक्षकाधमस्य, विनाशाय = मारणाय, एक = वक्ष्यमाणः, उपायः = मार्गः, चिन्तितः = विचारितः । तस्मिन् = उपाये, किल, साफल्यम् उपगते = सफलीभूते, सधैर्यं = धीरतापूर्वकम्, अत्रैव अस्मिन्नेव द्वीपे वा नरबधस्थलभूते प्रासादे, कमपि, पोतं = जलयानम्, सम्भाव्यागमनम् = अनुमेयागमनम्, अनुपालयन्तः = प्रतिपालयन्तः, कालं = समयं, क्षपयेम = यापयेम । अन्यथा तु = अथवा, फलकाश्रयेण = काष्ठपट्टिकामाध्यमेन, समुद्रम् = सागरम्, आश्रयेम = समाश्रयेम । अपायबहुलमपि = विघ्नभूयिष्ठमपि, फलकाश्रयेण = काष्ठपट्टिकाश्रयेण, सिन्धुतरणं = सागरगमनं, नूनम् = निश्चयेन, एतत्नरपिशाचमुखकन्दराप्रवेशात् = मानवाधमवदनविवरगमनात्, श्रेयः = श्रेयस्करः इति । ते = सहचराः, तु, एतम् = पूर्ववर्णितम्, उपायम् = मार्गम्, अन्वमन्यन्त = समर्थितवन्तः ।

अथ = मन्मतसमर्थनानन्तरम्, वयं = सिन्धुवादमुख्याः, बृहन्ति =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust Funding by MoE-IKS

महाप्रमाणानि, काष्ठफलकानि = काष्ठपट्टिकारूपाणि, प्रत्येकं, नरत्रयवहन पर्याप्तावकाशानि = जनत्रयवहनप्रचुरस्थानानि, पर्यकल्पयाम = व्यरचयाम

समासः—काष्ठप्रचुरः = काष्ठैः प्रचुरः, तदुपयोगौपयिकम् = तस्य उपयोगे औपयिकम् पुरुषादहतकस्य = पुरुषम् अत्ति इति पुरुषादः स चासौ हतकश्च तस्य, सम्भाव्यागमम् = सम्भाव्यः आगमः यस्य तम्, फलकाश्रयेण = फलकस्माश्रयेण, अयायबहुलम् = अयायैःबहुलम्, नरपिशाचमुख कन्दराप्रवेशात् = नरः पिशाच इव = नरपिशाचः तस्य सुखम् एव कन्दरा तत्र प्रवेशात्। काष्ठफलकानि = काष्ठानां फलकानि, नरत्रयवहनपर्याप्तावकाशानि = नराणां त्रयम् तेषां वहनाय पर्याप्तः अवकाशो यत्र तानि।

कोषः—'युक्तमौपायिकं लभ्यम्' इत्यमरः।

व्याकरणम्—नरः पिशाच इव, 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्युपमितसमासः।

१०. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

सायं च स्ववसतिं भूयः प्रत्यगच्छाम। सोऽपि नररूपधरोऽन्तकः यथासमयमुपेत्यास्मास्वेकं जग्ध्वा निदद्रौ। तं च सघर्घरस्वनं निद्रावशम् कलय्य धीरधियो नवजना अहं च लोहशूलमग्नौ प्रताप्य तच्चक्षुषि निक्षिप्य तमन्धतामनयाम।

अथवा

सोऽप्यविषह्यवेदनया भृशं तुद्यमानस्तारमाक्रोशन् दूरे स्थितेष्वस्मासु कञ्चन विधर्तुं कृतप्रयत्नोऽपि वन्ध्यश्रमः इतस्ततः परामृशन् द्वारदेशमवाप्य कुत्रापि प्रययौ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचिते सिन्धुवादवृत्ते तृतीयसिन्धुयात्राप्रसङ्गे नरभक्षकान्धकरणमत्र कथयति सिन्धुवादः हिन्दवादम्।

व्याख्या—सायं = सन्ध्यायां, च, स्ववसतिं = स्वीयगेहम्, भूयः = पुनः प्रत्यागच्छाम = प्रत्यापताम। सः = नरपिशाचः, अपि, नररूपधरः मानवाकारः, अन्तकः = यमः, यथासमयम् = यथाकालम्, उपेत्य = आगत्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्मासु = वणिग्जनेषु, एकम् = अन्यतम्, जग्ध्वा = भुक्त्वा, निदद्रौ = अस्वपत् । तं = नरयमं, च, सघर्घरस्वनं = घर्घरध्वनियुक्तं, निद्रावशम् = शयनरतम्, आकलय्य = अवधार्य, अस्मासु = वणिग्जनेषु, धीरधियो = धैर्ययुक्तमतयः, नवजना = नवसङ्ख्यका नरा, नूतना यौवनसम्पन्ना वा नरा, अहं = सिन्धुवादः, च, लोहशूलमग्नौ = कृष्णायसकुन्तम् वह्नौ, प्रताप्य = दाहयित्वा, तच्चक्षुषि = नरकालनयने, निक्षिप्य = क्षिप्त्वा, तम् = नराधमम्, अन्धताम् = दर्शनशक्तिक्षीणताम्, अनयाम = आनीतवन्तः ।

समासः—स्ववसतिं = स्वीयां वसतिं, नररूपधरः = नरस्य रूपं धरति इति । यथासमयम् = समयमनतिक्रम्य, सघर्घरस्वनं = घर्घरेण स्वनेन सहितम्, निद्रावशम् = निद्रायाः वशम्, धीरधियः = धीराधीः येषां ते, नवजना = नवाश्च ते जनाश्च, लोहशूलम् = लोहस्य शूलम्, तच्चक्षुषि = तस्य चक्षुषि ।

कोषः—'मनुजा मानवा नरा' 'बुद्धि र्मनीषा धिषणाधीः' इत्युभयत्राप्यमरः ।

व्याकरणम्—धृ + अच् = धरः । प्र + क्षिप् + क्त्वा + ल्यप् ।

अथवा

प्रसङ्गः—वर्णयत्यत्र श्री म० म० लक्ष्मणशास्त्रिमहोदयाः सिन्धुवादवृत्तरचनाकाराः तस्यैव तृतीयसिन्धुयात्रायां सिन्धुवादमुखेन नरकालपलायनम् ।

व्याख्या—सः = नरपिशाचः, अविषह्यवेदनया = असह्यकष्टपरम्परया, भृशं = बहु, तुद्यमानः = पीड्यमानः, तारम् = तीव्रम्, आक्रोशन् = समाक्रन्दन्, दूरे = विप्रकृष्टे, स्थितेषु = वर्तमानेषु, अस्मासु = सिन्धुवादसहितेषु, कञ्चन = कमपि, विधर्तुं = ग्रहीतम्, कृतप्रयत्नो = विहितप्रयासो, अपि, बन्ध्यश्रमः = निष्फलयत्नः, इतस्ततः, परामृशन् = संस्पृशन्, द्वारदेशम् = बहिरागममार्गम्, अवाप्य = संप्राप्य, कुत्र = क्वचिद्, अपि, प्रययौ = जगाम ।

समासः—अविषह्यवेदनया = अविषह्या चासौ वेदना च तया, कृतप्रयत्नः = कृतः प्रयत्नः येन सः, बन्ध्यः श्रमः = बन्ध्यश्रमः यस्य ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'स्त्री द्वार्द्वारम्' इत्यमरः ।

व्याकरणम्—परामृशन् = पर + आ + मृश + शतृ, वि + धृ + तुमुन् = विधर्तुं ।

११. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

तस्मिंश्चापगतमात्रे वयं सिन्धुरोधो निगूहितं काष्ठफलकसमुदयमवाप्यानाकर्ण्य तद्गर्जनं तं मृतं मत्वा निर्विशङ्काः कस्यचिद् प्रवहणस्यागमनं सम्भावयन्तः आप्रभातमतिष्ठाम । प्रभातायां च तस्यां युगायमानायां निशायां तमस्मदरातिमात्मतुल्याकारप्रमाणाभ्यापराभ्यां नरहतकाभ्यां समनुस्त्रियमाणम् सत्वरमापतन्तमद्राक्ष्म ।

उत्तरम्—प्रसङ्गः—सिन्धुवादो हितवादं स्वमन्दिरस्थं नष्टनयननरहतकस्य तत्समैः सह सिन्धुवादप्रमुखवणिग्जनानुगमनमत्र वर्णयति तृतीयसिन्धुयात्रायां श्री म० म० लक्ष्मणशास्त्रिरचितायां सिन्धुवादवृत्तकथयाम् ।

व्याख्या—तस्मिन् = नरभक्षके, अपगतमात्रे = अपसृते एव, वयं = सिन्धुवादादयः, सिन्धुरोधोनिगूहितं = सागरतटगोपितं, काष्ठफलकसमुदयम् = काष्ठपट्टिकानिचयम्, अवाप्य = संप्राप्य, अनाकर्ण्य = अश्रुत्वा, तद्गर्जनं = नरभक्षकसिंहनादम्, तं = नरयमं, मृतं = निष्प्राणं, मत्वा = ज्ञात्वा, निर्विशङ्काः = शङ्कारहिताः, कस्यचित् = अनिर्धारितस्य, प्रवहणस्य = पोतस्य, आगमनं = समागमं, सम्भावयन्तः = तर्कयन्तः, आप्रभातम् = प्रातः कालम् यावत्, अतिष्ठाम् = स्थिता आस्म । प्रभातायाम् = प्रातःकालरूपेणपरिणतायां, च, तस्यां = अनुभवबहुलायां, युगायमानायां = युगसमानायाम्, निशायां = रजन्याम्, तम् = नरभक्षकम्, अस्मदरातिम् = अस्मद्रिपुम्, आत्मतुल्याकारप्रमाणाभ्यां = तन्नरभक्षकसमाकारप्रमाणाभ्याम्, अपराभ्याम् = इतराभ्याम् = नरहतकाभ्याम् = मानवभक्षकाभ्याम्, समनुस्त्रियमाणम् = अनुगम्यमानम्, सत्वरम् = शीघ्रम्, आपतन्तम् = आगच्छन्तम् अद्राक्ष्म = अपश्याम ।

समासः—सिन्धुरोधोनिगूहितं = सिन्धोः रोधसि निगूहितम्, काष्ठफलकसमुदयम् = काष्ठस्य फलकानां समुदयम्, तद्गर्जनं = तस्यगर्जनम्, आत्म-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तुल्याकारप्रमाणाभ्याम् = आत्मना तुल्यः आकारः प्रमाणश्च ययोः ताभ्याम्
नरहतकाभ्याम् = नरः हतक इव ताभ्याम् ।

कोषः—'मनुजा मानवा नरा' इत्यमरः ।

व्याकरणम्—अन् + आ + कर्ण + क्त्वा + ल्यप् = अनाकर्ण्य

१२. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

तांश्चावलोक्य ससम्भ्रममं फलकान्यधिरुह्य तानि क्षेपणोभ्याम् प्रेरयन्तः सत्वरं पलायामहि । ते तु नराधमा अस्मान्निरीक्ष्य क्रोधेन दशनान् पेषयन्तो महतीः शिलाः अस्मत्फलकेषु तरसाऽस्यन्तस्तानि चूर्णीकृत्य सर्वान् सिन्धुतलेऽमज्जयन् । केवलमहमुभाभ्यां सहचराभ्यां सह फलकमेकमधिरुढो नियत्या तस्या विपदोऽभिरक्षितः सिन्धुमध्यमध्यगच्छन् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रि विरचितायां सिन्धुवादवृत्तकथायां तृतीयसिन्धुयात्रावसरे सिन्धुवादः वर्णयति रक्षणं स्वस्य स्वसहचराभ्याम् च नरहतकशिलाक्षेपणात् ।

व्याख्या—तान् = नरहतकान्, च, अवलोक्य = दृष्ट्वा, ससम्भ्रमम् = सवेगम्, फलकानि = काष्ठपट्टिकाः, अधिरुह्य = आरुह्य, तानि = फलकानि, क्षेपणीभ्यां = नौकादण्डाभ्यां, प्रेरयन्तः = चालयन्तः, सत्वरं = शीघ्रम्, पलायामहि = पलायिता बभूवुः । ते = पूर्ववर्तिता, तु, नराधमा = मानवहतका, अस्मान् = वणिग्जनान्, निरीक्ष्य = विलोक्य = कोपेन, दशनान् = दन्तान्, पेषयन्तः = सवेगं चालयन्तः चूर्णयन्तो वा, महतीः = बृहतीः, शिलाः = ग्राब्णः अस्मत्फलकेषु = अस्माकं काष्ठपट्टिकासु, तरसा = बलेन अस्यन्तः = प्रक्षिपन्तः, तानि = फलकानि, चूर्णीकृत्य = पेषयित्वा, सर्वान् = सहचरान् यात्रिणः, सिन्धुतले = सागरमध्ये, अमज्जयन् = निमज्जितान् अकुर्वन् । केवलम् = अहं = सिन्धुवादः, उभाभ्यां = युगलाभ्यां, सहचराभ्यां = सहयात्रिभ्यां, सह = सार्धम्, फलकम् = काष्ठपट्टिकाम्, एकाम्, अधिरुढो, नियत्या = भाग्येन, तस्याः = पूर्ववर्णितायाः, विपदो = कष्टपरम्परातः, अभिरक्षितः = सुरक्षितः, सिन्धुमध्यम् = सागरमध्यम् अध्यगच्छन् = प्राप्नवम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समासः—नराधमाः = नरेषु अधमाः, अस्मत्फलकेषु = अस्माकं फलकेषु = सिन्धोः तले ।

कोषः—नौकादण्डः क्षेपणी स्यात्' इत्यमरः ।

व्याकरणम्—अव + लोक + क्त्वा + ल्यप् = अवलोक्य ।

१३. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः सप्रसङ्गम् ।

तत्र च महोर्मिषु क्वचिन्निमज्जन्तः क्वचिच्चोन्मज्जन्तो वयं दैवैकनाथाः संशयग्रस्तहृदयास्तां क्षपामक्षपयाम् । प्रातश्च सुदैववशेन क्वचिद् द्वीपे क्षिप्ता सानन्दं तत्र समृद्धाः मृद्वीका यथेच्छमुपभुज्य कञ्चिच्छ्रममपानयाम् ।

अवतीर्णायां च निशायां तीरं सम्प्राप्य प्रसुप्ता अत्यायतप्रमाणस्याजगरस्यैकस्य विसर्पणशब्देनाऽदूरोत्थितेन प्रबुद्धा अभवाम । सचाजगरः क्षणादस्मास्वेकं मुक्तये कृतवृथाप्रयत्नं न्यगिलत् ।

उत्तरम्—प्रसङ्गः—वर्णयत्यत्र सिन्धुवादः हितवादं समुद्रसंतरणम् तृतीयसिन्धुयात्रायां श्री म० म० लक्ष्मणशास्त्रि रचितायाम् सिन्धुवादवृत्तकथायाम् ।

व्याख्या—तत्र = सागरमध्ये, च, महोर्मिषु = विशालतरङ्गेषु, क्वचित् = कुत्रचित्, निमज्जन्तः = ब्रुडन्तः, क्वचित् = कुत्रचित्, उन्नज्जन्तः = स्फुरन्तः, वयं = वणिजः, दैवैकनाथाः = भाग्यैकनाथाः, संशयग्रस्तहृदया = सन्देहविह्वलचेताः, तां = संशयशीलां, क्षपां = निशाम्, अक्षपयाम = अनयाम । प्रातश्च = सूर्योदये च, सुदैववशेन = सद्भाग्यकारणेन, क्वचिद् = कुत्रचित, द्वीपे = अन्तरीपे, क्षिप्ताः = निक्षिप्ताः, सानन्दं = सहर्षं, तत्र = द्वीपविशेषे समृद्धाः = फलिताः, मृद्वीकाः = द्राक्षाः = यथेच्छं = स्वेच्छानुसारम्, उपभुज्य = भुक्त्वा, कञ्चित् = स्तोकं श्रमम् = परिश्रमम्, अपानयाम = दूरमकुर्म ।

अवतीर्णायाम् = आगतायां, च, निशायां = रात्रौ, तीरं = तटम्, सम्प्राप्य = अनुप्राप्य, प्रसुप्ताः = निद्रिताः, अत्यायतप्रमाणस्य = विशालप्रमाणस्य, अजगरस्य = सर्पविशेषस्य, एकस्य, विसर्पणशब्देन = अपसर्पण-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ध्वनिना दूरोत्थितेन = विप्रकृष्टजेन, प्रबुद्धा = जागरिताः, अभवाम । सः = दृष्टपूर्वः, अजगरः = सर्पविशेषः, क्षणात् = पलात्, अस्मासु = वणिग्जनेषु, एकम् = अन्यतमं, मुक्तये = मोचनाय, कृतवृथाप्रयत्नं = विहितासफलयत्नम्, न्यगिलत् = अखादत् ।

समासः—महोर्मिषु = महत्य उर्मयः तासु, दैवैकनाथाः = दैवम् एकं नाथः येषां ते, संशयग्रस्तहृदयाः = संशयेन ग्रस्तं हृदयं येषां ते, सुदैववशेन = सुष्ठु दैवम् तस्य वशेन, यथेच्छम् इच्छामनतिक्रम्य, ।

अत्यायतप्रमाणस्य = अत्यायतं प्रमाणं यस्य, तस्य, विसर्पणशब्देन = विसर्पणस्य शब्देन, अदूरोत्थितेन = न दूरे उत्थितेन, कृतवृथाप्रयत्नं = कृतः वृथाप्रयत्नः येन तं ।

कोषः—'अजगरे शयुर्वाहस इत्युभौ इत्यमरः

व्याकरणम्—प्र + बुध् + क्त = प्रबुद्ध, जस् प्रबुद्धाः ।

१४. प्रश्नः—व्याख्या कार्याऽधोलिखितस्य ।

उर्वरितैकसहचरोऽहं "हन्त ! दुःखाद्दुःखान्तरं प्राप्तौ स्वः नराशनात्कथञ्चिद्विमुक्तौ साम्प्रतं सर्पमुखमनुप्रविष्टौ" इति जीविते निराश उच्चैराक्रन्दम् ।

अथावयो र्निकटवर्तिनं शाखिनमारुह्यस्थितयोरधस्तादुपगतो महाकायोऽजगरः स्वफूत् कारवेगेन मत्तः किञ्चिदधोवर्तिन्यां शाखायां स्थितं तं मदीयमेकाकिनं सहचरं निगीर्य कुत्रापि न्यलीयत ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितात् सिन्धुवादवृत्तात् गृहीतोऽयमंशः तृतीयसिन्धुयात्राप्रसङ्गागतः । वर्णयत्यत्र हितवादं कथाश्रवणरतं सिन्धुवादः शिष्टस्यापि सहचरस्य अजगरोदरगमनम् ।

व्याख्या—उर्वरितः, शिष्टः, एकः, सहचरः = सहायकः यस्य सः, उर्वरितैक सहचरः, अहं = सिन्धुवादः, "हन्त = खेदसूचकमव्ययम्, दुःखात् कष्टात्, दुःखान्तरं = कष्टान्तरं, प्राप्तौ स्वः = अनुभवावः, नराशनात् = मानवभक्षणात् कथञ्चित् = केनाऽपि प्रकारेण, विमुक्तौ, साम्प्रतम् = अधुना,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्पमुखम् = भुजङ्गमुखम्, अनुप्रविष्टौ: गतौ, इति, जीविते = जीवनविषये, निराशः = आशारहितः, उच्चैः = तारस्वरेण, आक्रन्दम् = व्यलपम् ।

अथ = पश्चात्, आवयोः = सिन्धुवादतत्सहचरयोः निकटवर्तिनं = समीपस्थं, शाखिनं = वृक्षम्, आरुह्य = अधिरुह्य, स्थितयोः = वर्तमानयोः, अधस्तात् = भूपृष्ठात्, उपगतो = उपर्यारूढः, महाकायः = विशालप्रमाणः, अजगरः = शयुः, स्वफूत्कारवेगेन = निजफूत्कृतिगत्या, मत्तः = सिन्धुवादस्थानात्, किञ्चित् = स्वल्पम् अधोवर्तिन्यां = निम्नस्थायां शाखायां = लतायां स्थितं = वर्तमानं, तं = मत्सहचरं, मदीयं = सिन्धुवादसम्बद्धम् एकाकिनम् = असहायं, सहचरं = मित्रम्, निगीर्य = कवलीकृत्य, कुत्रापि = क्वचिदपि, न्यलीयत = अदृश्यतां गतः ।

समासः—सर्पमुखं = सर्पस्यमुखं, निकटवर्तिनं = निकटेवर्तिनं = निकटेवर्तिनं, स्वफूत्कारवेगेन = स्वस्य फूत्कारस्य वेगेन ।

कोषः—'समे शाखाल्नते' इत्यमरः

व्याकरणम्—मत्तः = अस्मतशब्दात तासिल प्रत्ययः ।

१५. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

एवमेकावशेषम् आत्मनोऽपि तामेव गतिं सम्भावयन् जीवितनिराशः सिन्धौ निमज्य मर्तुकामोऽपि भूयोजीवनाशया प्राणोदितो रक्षायै परमेश्वरं भूयो भूयः प्रार्थयमानोऽकस्माद् दूरादागच्छद् प्रवहणमेकमपश्यम् । शिरस्थपटेन च कृतसङ्केतस्तत्स्थजनावधानमाकृष्य गृहीतसङ्केते पोतावाहैः सपदि सम्प्रेषितां नावमेकामारुह्य पोतं संप्राप्नवम् ।

विदितमदद्भुतवृत्तान्ताः पोतवर्तिनो वणिजो मां विपत्सिन्धुतरणायाभिनन्द्य विशीर्णं मन्नेपथ्यं विलोक्य नवेन तेन भोजनोपहारैश्च मामन्वगृह्यन् ।

तैश्च सहितः कानिचिदहानि द्वीपान्तरेषु वाणिज्यया द्रविणमुपार्जयन् सालहतं नाम चन्दनद्रुमप्रभवं द्वीपमुपगत्य संगृहीतप्रचुरचन्दनस्ततः प्रस्थातुकामः पोताध्यक्षेणैवमुक्तः ।

CC0. In Public Domain. Jangamwadi Math Collection; Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—स्वपोतप्राप्ति कथयति सिन्धुवादः हित्तवादं तृतीयसिन्धुयात्रायामत्र श्री म० म० लक्ष्मणशास्त्रि रचितायां सिन्धुवादवृत्तकथायाम् ।

व्याख्या—एवम् = पूर्वोक्तप्रकारेण, एकावशेषः = शिष्टैकः, आत्मनः = स्वस्य, अपि, तामेव = वहुसोदरगामिनीं, गतिम् = अवस्थाम्, सम्भावयन् = आकलयन्, जीवितनिराशः = जीवनर्निरपेक्षः, सिन्धौ = सागरे, निमज्य = ब्रूडित्वा, मर्तुकामोऽपि = जीवनत्यागेच्छोऽपि, भूयः = पुनः, जीवनाशया = जीवितरक्षणधिया, प्राणोर्दितः = प्रेरितः, रक्षायै = रक्षणाय, परमेश्वरं = भगवन्तं, भूयो भूयः = पुनः पुनः, प्रार्थयमानो = याचमानः, अकस्मात् = सहसा, दूरात् = विप्रकृष्टात्, आगच्छत् = समापतत्, प्रवहणम् = वहित्रम्, एकम् = अन्यतमम्, अपश्यम् = अवालोकयम्, शिरस्थपटेन = शिरोवस्त्रेण, च, कृतसङ्केतः = विहितसङ्केतः, तत्स्थजनावधानमाकृष्य = आगच्छत्पोतस्थमानवध्यानमावर्ज्य, गृहीतसङ्केतैः = प्राप्तसङ्केतैः, पोतवाहैः = यानचालकैः सपदि = शीघ्रम्, सम्प्रेषितां = प्रेषितां, नावम् = नौकाम् एकाम्, आरुह्य = अधिरुह्य, पोतं = जलयानं, संप्राप्नवम् = समागमम् ।

विदितमदद्भुतवृत्तान्ताः = ज्ञातसिन्धुवादविस्मयावहकथाः, पोतवर्तिनो = यानारूढाः, वणिजः = व्यापारिणः, मां = सिन्धुवादं, विपत्सिन्धुतरणाय = आपत्तिसागरपारगमनाय, अभिनन्द्य = प्रशंसांकृत्वा विशीर्णं = गलितं, मन्नेपथ्यं = सिन्धुवादवसनम्, विलोक्य = दृष्ट्वा, नवेन = नूतनेन, तेन = नेपथ्येन, भोजनोपहारैश्च = अशनोपायनैश्च, माम् = सिन्धुवादम्, अन्वगृह्णन् = अनुगृहीतवन्तः ।

तैश्च = नवागतपोतव्यापारिभिः, सहितः = युक्तः, कानिचित् = कतिपयानि, अहानि = दिनानि, द्वीपान्तरेषु = अन्तरीपान्तरेषु, वाणिज्यया = व्यापारेण, द्रविणम् = धनम्, उपार्जयन् = सम्पादयन्, सालहतं नाम = सालहतनाम्ना विख्यातं, चन्दनद्रुमप्रभवं = मलयजवृक्षकारणम्, द्वीपम् = अन्तरीपम्, उपगत्य = समागत्य, संगृहीतविपुलचन्दनः = एकत्रिताधिकच-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्दनकाष्ठः, ततः = तस्मात्, प्रस्थातुकामः = गन्तुकामः, पोताध्यक्षेण = यानचालकेन, एवं = वक्ष्यमाणम्, उक्तः = कथितः ।

समासः—जीवितनिराशः = जीविते निराशः, मर्तुकामः = मर्तुं कामो यस्य सः, जीवनाशया = जीवनस्य आशया, शिरस्थपटेन = शिरस्थेन पटेन, कृतसङ्केतः = कृतः सङ्केतः येन सः, तत्स्थजनावधानम् = तस्मिन् तिष्ठन्ति इति तत्स्थाः तेषां जनानाम् अवधानम्, गृहीतसङ्केतैः = गृहीतः सङ्केतो यैः तैः ।

विदितमदद्भुतवृत्तान्ता = विदितं मम अद्भुतं वृत्तान्तं यैस्ते, विपत्सिन्धुतरणाय = विपत् एव सिन्धुः तस्य तरणाय, भोजनोपहारैश्च = भोजनैः उपहारैश्च ।

द्वीपान्तरेषु = अन्यो द्वीपः द्वीपान्तरम् तेषु, चन्दनद्रुमप्रभवं = चन्दनस्य द्रुमाः तेषां प्रभवं, संगृहीतप्रचुरचन्दनः = संगृहीतं प्रचुर चन्दनं येन सः, प्रस्थातुकामः = प्रस्थातुं कामः यस्य सः, पोताध्यक्षेण = पोतस्य अध्यक्षेण ।

कोषः—'नियामकाः पोतवाहाः' इत्यमरः 'आकल्यवेषौ नेपथ्यम्' इत्यपि ।

व्याकरणम्—निमज्य = नि + मज् + क्त्वा + ल्यप् ।

१६. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

"आर्य ! एतानि पण्यवस्तूनि मत्पोतमारुढपूर्वस्य मार्गे दैवान्मतस्यैकस्य वणिक्श्रेष्ठस्य विक्रियाखिलं तद्धनं विदामपुरं सम्प्राप्तेन भवता तद्दायादेभ्यो दीयमानमभ्यर्थये ।"

अथवा

इत्युक्त्वा स तत्पण्यजातमदर्शयत् । तथेत्यभ्युपगत्य पश्यन्नहं तेषु स्यूतेषूल्लिखितमात्मनोऽभिधानमवलोक्य पोताध्यक्षं तं द्वितीययात्रायां प्रसुप्तं मामेकाकिनं परित्यज्यापसृतं प्रत्यभिज्ञायापृच्छम्—

"किन्नामधेयोऽसौ यस्यैतद्वस्तुजातम् ?" इति ।

अथवा

"सोऽब्रवीत्—भद्र एतानि तानि विदामपुरवासिनो वणिगग्रगण्यस्यार्यसिन्धुवादस्य । यः किल द्वीपमेकमवतीर्य सहसाऽदृश्यतां गत इति ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"भार्य सोऽहं सिन्धुवादो यं भवान् तस्मिन् द्वीपे एकाकिनं सुप्तं परित्यज्यापयात" इति ब्रुवाणं मां क्षणं निर्वर्ण्य प्रत्यभिज्ञाय च प्रहृष्टः "आर्य! सिन्धुवाद! दिष्ट्या भवन्तं तीर्णापदं भूयो विलोकयामि" इति समभिनन्द्य तत्पण्यजातं मदधीनमकरोत्।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तस्य तृतीयसिन्धुयात्राप्रसङ्गात् गृहीतोऽयमंशः। पोताध्यक्ष इत्थमकथयत् सिन्धुवादमिति वर्णयति सिन्धुवादः हितवादम्।

व्याख्या—आर्य! भद्र एतानि = पुरो वर्तमानानि, पण्यवस्तूनि = विक्रेयपदार्थान्, मत्पोतम् = मदीयं प्रवहणम्, आरूढपूर्वस्य = कृतारोहणस्य, मार्गे = पथि, दैवात् = दुर्भाग्यात्, मृतस्य, लोकान्तरंगतस्य, एकस्य = विशिष्टस्य, वणिक्श्रेष्ठस्य = व्यापारिणः, विक्रीय = विधाय विक्रयम्, अखिलं = निखिल तद्धनं = विक्रयोत्तरप्राप्तधनं, विदामपुरम् = एतत्संज्ञ नगरं, सम्प्राप्तेन = गतेन, भवता = श्रीमता, तद्दायादेभ्यो = वणिक्सम्पत्युत्तराधिकारिभ्यः, दीयमानम् = अर्प्यमाणम्, अभ्यर्थये = प्रार्थये।

समासः—पण्यवस्तूनि = पण्यानि वस्तूनि, मत्पोतम् = आरुढपूर्वस्य = पूर्वम् आरुढः, आरुढपूर्वः तस्य, मम पोतम्, वणिक् श्रेष्ठस्य = वणिक्षु श्रेष्ठस्य।

कोषः—'विक्रेयं पणितव्यम् च पण्यं क्रय्यादयस्त्रिषु' इत्यमरः।

व्याकरणम्—दीयमानम् = दा + शानच् + अम्।

अथवा

प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ते तृतीयसिन्धुयात्रायामागतः पोताध्यक्षाय दत्तः सिन्धुवादस्योत्तर एव व्याख्येयांशभूतोऽत्रप्रश्नसंवलितः।

व्याख्या—इति = एवम्, उक्त्वा = निगद्य, सः = पोताध्यक्षः, तत्पण्यजातम् = तत्पोतस्थपणितव्यनिचयम्, अदर्शयत् = दृष्टिमथमनयत्। तथा = इत्थमेवास्तु, इति, अभ्युपगत्य = स्वीकृत्य, पश्यन् = विलोकयन्, अहं =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिन्धुवादः, तेषु = दृश्यमानेषु, स्यूतेषु = अनुस्यूतेषु, उल्लिखितम् = लिखितम्, आत्मनः = स्वस्य, अभिधानम् = नाम, अवलोक्य = दृष्ट्वा, पोताध्यक्षं = यानचालकं, त = पुरःस्थं, द्वितीययात्रायां = प्रथमेतरयात्रायां, प्रसुप्त = शयानं, माम् सिन्धुवादम्, एकाकिनं द्वितीयहीनमेव, परित्यज्य = विहाय, अपसृतम् = पलायितं, प्रत्यभिज्ञाय = परिचित्य, अपृच्छम् = पृष्टवान्—किन्नामधेयोऽसौ = वणिक्, यस्यैतद्वस्तुजातम् इति = अयं पण्यराशिरिति ।

समासः—पण्यजातम् = पण्यानां जातम्, पोताध्यक्षं = पोतस्य अध्यक्षं वस्तुजातम् = वस्तूनां जातम् ।

कोषः—'यानपात्रे शिशौ पोतः' इत्यमरः ।

व्याकरणम्—प्रत्यभिज्ञाय = प्रति + अभि + ज्ञा + क्त्वा + ल्यप् ।

अथवा

प्रसङ्गः—पोताध्यक्षसिन्धुवादवार्तालापोऽयमत्रोपस्थापितो व्याख्यानाय श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ततृतीयसिन्धुयात्रातः ।

व्याख्या—सः = पोताध्यक्षः, अब्रवीत् = अवदत्, "भद्रा = आर्यं, एतानि = पुरःस्थितानि, तानि = वस्तूनि, विदामपुरवासिनो = विदामनगरवास्तव्यस्य, वणिगग्रगण्यस्य = व्यापारिश्रेष्ठस्य, आर्यसिन्धुवादस्य । यः = सिन्धुवादः, किल = निश्चयेन, द्वीपम् अन्तरीपम् एकम् = अन्यतमम्, अवतीर्य = अवतरणं कृत्वा, सहसा = झटिति अकस्मात्, अदृश्यतां = दृशोरविषयतां, गतः = प्राप्तः, इति"

आर्य ! = भद्र ! सः = पूर्वपरिचितः, अहं सिन्धुवादः = एतन्नामा वणिग् यम् = सिन्धुवादं, भवान् = पोतचालकः, तस्मिन् = विशिष्टेद्वीपे, एकाकिनं = द्वितीयहीनं, सुप्तं = शयानं, परित्यज्य = त्यक्त्वा, अपयातः = अपसृतः, इति = एवं, ब्रुवाणं = भाषमाण मां = सिन्धुवादं, क्षण = पलं, निर्वर्ण्य = विलोक्य, प्रत्यभिज्ञा = परिचित्य, च, प्रहृष्टः = आनन्दितः, "आर्य ! सौभाग्यशालिन् भद्र ! सिन्धुवाद ! दिष्ट्या भाग्येन, भवन्तं =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीमन्तं, तीर्णापदं = लङ्घितविपदं, भूयः = पुनः, विलोकयामि = पश्यामि। इति, समभिनन्द्य = अभिनन्दनं कृत्वा, तत्पण्यंजातं = तत्पणितव्यनिचयं, मदधीनम् = मद्वशगम्, अकरोत् = विदधाति स्म।

समासः—वणिगग्रगण्यस्य = वणिक्षु अग्रगण्यस्य, तीर्णापदं = तीर्णाः आपदोयेनतं, पण्यजातं = पण्यानां जातम्, मदधीनम् = मम अधीनम्।

कोषः—'दिष्ट्या समुपजोषं चेत्यानन्दे' इत्यमरः।

व्याकरणम्—ब्रुवाणम् = ब्रू + शानच् + अम्।

विशेषम् = यत्तदो नित्यसम्बन्धः इति नियमात् सः—यम् इति प्रयोगः।

१७. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

ततश्च प्रस्थितोऽहं मार्गे द्वीपभ्रमाधायिनो महिष्ठान् कमष्ठान् धेनुरिव पयस्विनीश्चित्रवर्णा काश्चिन्ममंतस्यीः साश्चर्यं विलोकयन् क्रमेण वासरपुरं सम्प्राप्य समुपार्जितापरिमितदसुवसरो दीनेभ्योऽतिसृष्टविपुलधनो विषयसुखोपभोगैकपरः सानन्दं समयमयापयम्।

इत्येवं तृतीयसिन्धुयात्रावर्णनं परिसमाप्य सिन्धुवादः पूर्ववद्धितवादाय दत्तशतदीनारः सर्वैरतिथिभिः सहान्येद्युभोक्तुं चतुर्थयात्रांवर्णनमाकर्णयितुम् चानुरुध्य तं विससर्ज।

अन्येद्युश्च स यथासमयं निर्वर्तितभोजनेषु तेषु स हितवादेषु दत्तावधानेष्वित्थं स्वां चतुर्थीसिन्धुयात्रां वर्णयामास।

उत्तरम्—प्रसङ्गः—तृतीयसिन्धुयात्रामुपसंहरत्यत्र सिन्धुवादः हितवादश्चामन्त्रयति चतुर्थसिन्धुयात्राश्रवणाय श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ताख्यगद्यबन्धस्य तृतीयसिन्धुयात्राप्रसङ्गे।

व्याख्या—ततः = तस्मात् द्वीपात् च, प्रस्थितः....प्रचलितः, अहं = सिन्धुवादः, मार्गे = पथि, द्वीपभ्रमाधायिनो = अन्तरीपशङ्कासमुत्पादकान्, महिष्ठान् = अतिस्थूलान्, कमठान्=कच्छपान्, धेनुरिव=गौरिव, पयस्विनीः= दुग्धदात्रीः, चित्रवर्णाः = नानारङ्गाः, कश्चित् = कतिपयाः, मत्स्यीः = मत्स्यस्त्रियः, साश्चर्यं = सविस्मयं, विलोकयन् = पश्यन्, क्रमेण = क्रमशः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वासरपुरं, सम्प्राप्य = अवाप्य, समुपार्जितापरिमितवसुविसरो = अर्जितबहुधनसमूहः, दीनेभ्यः = निर्धनेभ्यः, अतिसृष्टविपुलधनो = दत्तबहुविभवः, विषयसुखोपभोगैकपरः – वासरासुखलिप्तः, सानन्दं = सहर्षं, समयम् = कालम्, अयापयम् = व्यतीतवान् ।

इत्थेवम् = इत्थं, तृतीयसिन्धुयात्रावर्णनं = द्वितीयेतरसागरगमनवृत्तान्तं, परिसमाप्यः = समाप्तिमानीय, सिन्धुवादः, पूर्ववत् = प्रथमवत्, हितवादाय= भारवहनवृतिरसिकाय, दत्तशतदीनारः = विश्राणितशतसुवर्णमुदः, सर्वैः = पूर्णैः, अतिथिभिः = अभ्यागतैः, सह = साकम्, अन्येद्युः = अपरस्मिन् दिने, भोक्तुं = भोजनकरणाय चतुर्थयात्रावर्णनम् = तृतीयेतर प्रवासवर्णनम्, आकर्णयितुं = श्रोतुं, चानुरुध्य = विवेद्य, तं = हितवादं, विससर्जः = विसर्जयामास ।

अन्येद्युश्च = अपरेस्मिन् दिने च, सः = सिन्धुवादः, निर्वर्तितभोजनेषु= समाप्ताशनेषु, तेषु = अभ्यागतेषु सहितवादेषु = हितवादयुक्तेषु, दत्तावधानेषु= समर्पितध्यानेषु, इत्यम् = वक्ष्यमाणरीत्या, स्वां = स्वीयां चतुर्थी, सिन्धुयात्रां, सर्णयामास = अकथयत् ।

समासः—द्वीपभ्रमाधासिनः = द्वीपस्य भ्रमस्य आधाथिनः, समुपार्जितापरिमितवसुविसरो = समुपार्जितः अपरिमितः वसुविसाः येन सः, अतिसृष्ट विपुलधनः, अतिसृष्टं विपुलं धनं येन सः, विषयसुखोपभोगैकयाः = विषयसुखानाम् उपभोगे एकपरः, तृतीयसिन्धुयात्रावर्णनं = तृतीयाया सिन्धोः यात्रायाः वर्णनं, दत्तशतदीनारः = दत्ताः शतदीनाराःयेन सः, चतुर्थयात्रावर्णनम् = चतुर्थयात्रायाः वर्णनम्, निर्वर्तितभोजनेषु = निर्वर्तितं भोजनं येषां तेषु, दत्तावधानेषु = दत्तम् अवधानं यैस्तेषु ।

कोषः—'माहेयी सौरभेयी गौ' इत्यमरः ।

व्याकरणम्—परि + सः + आप् + क्त्वा + ल्यण् = परिसमाप्य वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।

सिन्धुवादस्य वृत्तेस्मिन् तृतीयाऽगात् कथा शुभा ॥३॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्थी सिन्धुयात्रा

१. प्रश्नः—व्याख्येयोऽधोलिखितोंशः। 83

एवं सुखान्यनन्यसुलभानि भुञ्जानोऽपि भूयोः व्युत्थितसिन्धुयात्रोत्कटोत्साहः सम्भाव्यलाभान्युच्चावच्चानि वस्तूनि संगृह्य पोतमारूढः पौरस्त्यान्तरीपानुद्दिश्य प्रायाम्। एकस्मिन् पुनरहनिसमुत्थितया भीषणया वात्यया भग्नप्रवहणेष्वस्मासु बहवः सपदि प्राणांस्तत्यजुः।

अथवा

कतिपयावशिष्टवणिग्जनसहायो दैवात् फलकमेकमारुह्य वीचिवेगेन समुत्थमान एकत्र द्वीपे प्रक्षिप्तः कानिचित् फलानि सम्भुज्य पीत्वा च प्रस्रवणाम्भः किञ्चित् समुच्छ्वसितः, शुचार्तः क्षीणबलतया द्वीपस्थानि वस्तून्यवलोकयितुमप्यनुत्सहमानस्तत्रैव सिन्धुरोधसि निपत्य निद्रितोऽभूवम्। प्रभातायां यामिन्यामुदिते भगवति दिवाकरे प्रबुध्यमानानितस्ततो विचरतः काश्चिद्वसतो दूराद्विलोक्य शरणाशया तत्रोपसृतानस्मान् अकस्मादापतिताः परशताः असिताङ्गाः पुरुषाः समुपगम्य वन्दिनोऽकार्षुः गणशश्चास्मान् विभज्य स्वगृहाभिमुखमभिजग्मुः।

उत्तरम्—प्रसङ्गः = श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तस्य चतुर्थसिन्धुयात्रायामाद्यः गद्यभागः व्याख्यानाय दत्तः। सिन्धुवादः हितवादम् कथयति अत्र।

व्याख्या—एवं = तृतीयसिन्धुयात्राप्रसङ्गोक्तम्, अनन्यसुलभानि = सर्वजहाप्राप्याणि, सुखानि = शर्माणि, भुञ्जानः = आस्वादयन्नपि, भूयः = पुनः, व्युत्थितसमुद्रयात्रोत्कटोत्साहः = व्युत्पन्नसागरगमनोत्कटोत्साहः, सम्भाव्यलाभानि=शक्यप्राप्तिकानि, उच्चावच्चानि=नैकभेदानि बहुप्रकाराणीति भावः, वस्तूनि = पदार्थान्, संगृह्य = एकत्रीकृत्य, पोतम् = जलयानम्, आरूढः कृतारोहणः पौरस्त्यान्तरीपान्=प्राच्यद्वीपान्, उद्दिश्य=अभिलक्ष्य, प्रायाम्= अगच्छम्, एकस्मिन् = विशेषेऽन्यतमे वा, अहनि = दिवसेः पुनः = भूयः समुत्थितया = समुत्पन्नया, भीषणया = भीमया, वात्यया = वातचक्रया,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भग्नप्रवहणेषु = त्रुटितयानेषु अस्मासु = वणिक्षु, वहवः = अनेके, सपदि = शीघ्रं, प्राणान् = जीवनान् तत्यजुः = त्यक्तवन्तः ।

समासः—अनन्यसुलभानि = न अन्यैः सुलभानि, व्युत्थितसमुद्रयात्रोत्कटोत्साहः—व्युत्थितः समुद्रयात्राया उत्कट उत्साहः यस्मिन् सः, सम्भाव्यलाभानि = सम्भाव्यः लाभः येषु तानि, पौरस्त्यान्तरीपान् = पौरस्त्यान् अन्तरीपान्, भग्नप्रवहणेषु = भग्न प्रवहणं येषां तेषु ।

कोषः—'उच्चावचं नैकभेदः' द्वीपोऽस्त्रियामन्तरीपम्' इत्युभयत्राप्यमरः।

व्याकरणम्—पुरो भवाः पौरस्त्याः, अन्तः मध्ये आपः येषां ते अन्तरीपाः । त्यज् + लिट् झि = तत्यजुः ।

अथवा

प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तस्य चतुर्थयात्राप्रसङ्गे प्रवहणभङ्गोत्तरां दशां वर्णयति रचनाकारः पाठकम्, सिन्धुवादश्च हितवादमत्र ।

व्याख्या—कतिपयावशिष्टवणिग्जनसहायः = कतिचिच्छिष्टव्यापारिजनसहायः, दैवात् = भाग्यात्, फलकमेकम् = काष्ठपट्टिकामेकाम्, आरुह्य = अधिरुह्य, वीचिवेगेन = तरङ्गाघातेन, समुह्यमानः = नीयमानः, एकत्र = एकस्मिन्, द्वीपे = अन्तरीपे, प्रक्षिप्तः=प्रपितः, कानिचित्=कतिपयानि, फलानि, सम्भुज्य=आस्वाद्य, प्रस्रवणाम्भः=निर्झरजलम्, पीत्वा=गृहीत्वा, किञ्चित्=स्तोकं, समुच्छ्वसितः=निश्वसितः, शुचा=कष्टेन, आर्तः=पीडितः, क्षीणवलतया=नष्टशक्तितया, द्वीपस्थानि=अन्तरीपस्थानि, वस्तूनि=पदार्थान्, अवलोकयितुम्=विलोकयितुम्, अपि, अनुत्सहमानः=अनिच्छन्, तत्रैव=तस्मिन्नेव, सिन्धुरोधसि=सागरतटे, निपत्य=पतित्वा, निद्रित=निद्रावशीभूतः, अभवम् । प्रभातायाम्=प्रातःकालइवा चरणरतायां, यामिन्याम्=रजन्याम्, उदिते=गगनाङ्गणागते, भगवति = महिमशालिनि, दिवाकरे=दिनकरे, प्रवुध्यमानान्=जागरितान्, इतस्ततो=यत्र तत्र, विचरतः=चलतः, कांश्चिद=कतिपयान्, वसतः=निवसतः, दूरात्=विप्रकृष्टात्, विलोक्य=दृष्ट्वा, शरणाशया=रक्षणाशया, तत्रोपसृतान्=तस्मिन् द्वीपे समागतान् अस्मान्=वणिजः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अकस्मात्=सहसा, आपतिताः=समायाताः, परःशताः=शताधिकाः, असिताङ्गाः=कृष्णाङ्गाः, पुरुषाः=जनाः समुपगम्य=समागत्य, वन्दिनः=निगडितान्, अकार्षुः=अकुर्वन्, गणशः=लघुसमुदायरूपेण, च, अस्मान्=निगडितान् सिन्धुवादादीन्, विभज्य=पृथक्कृत्वा, स्वगृहाभिमुखम्=निजगेहसम्मुखम्, अभिजग्मुः=अभिवव्रजुः।

समासः—कतिपयावशिष्टवणिग्जनसहायः = कतिपयाः अवशिष्ट वणिग्जना एव सहाया यस्य सः, वीचिवेगेन = वीचीनां वेगेन, प्रस्रवणाम्भः = प्रस्रवणस्य अम्भः, क्षीणवलतया = क्षीणं बलं यस्य सः क्षीणबलः तस्य भावः क्षीणबलता, तया, सिन्धुरोधसि = सिन्धोः = रोधसि, शरणाशया = शरणस्य आशया, असिताङ्गाः = न सितानि अङ्गानि येषां ते।

कोषः—स्त्रियां वीचिरथोर्मिषु', 'कूलं रोधश्च तीरं च' 'उदन्वानुदधिः सिन्धुः' इति सर्वत्राप्यमरः।

व्याकरणम्—सम + उह् + शानच् + सु = समुह्यमानः प्र + क्षिप् + क्त = प्रक्षिप्तः, सम् + भुज् + क्त्वा + ल्यप् = सम्भुज्य।

२. प्रश्नः—अधोलिखितांशस्य व्याख्या कार्या।

अहं पञ्चभिरपरैः सहचरैः सहैकं गृहमनायि। अथ ते कालपुरुषाः कानिचिद् वृक्षमूलानि वितीर्यास्मान् सङ्केतैस्तानि भक्षयितुं प्रेरयामासुः स्वयं तान्यनास्वाद्य केवलमस्मांस्तानि भोक्तुं कृतानुरोधाँस्तान् वीक्ष्य शङ्काकुला अपि क्षुधातुरा मत्सहचरायथेच्छंतानि जघसुः। अहं तु तान् सन्दिहानस्तानि प्रत्यादिशम्। अचिराच्चास्मत्सहचरांस्तानि भुक्त्वा विस्मतात्मानः किमपि प्रलपितुमारभन्त। तैश्चोपहृतं नारिकेलतैलपाचितमोदनम् आतृप्तेरभुञ्जत। अनिच्छन्नप्यहं प्राणसन्धारणाय किञ्चिदभ्यवाहरम्।

उत्तरम्—प्रसङ्गः—निगडितः सिन्धुवादः गत्वाऽभिनवं द्वीपं किमकरोदिति वदति श्रवणरतं हितवादं प्रसङ्गेऽस्मिन् श्री म० म० लक्ष्मणशास्त्ररचित सिन्धुवादवृत्तचतुर्थसिन्धुयात्रायाम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्या—अहं = सिन्धुवादः कथानायकः वक्ता च, पञ्चभिः = वाण-संख्यकैः, अपरैः = अन्यैः, सहचरैः = मित्रैः, सह = साकम् एकं = विशिष्टं, गृहम = गेहम्, अनायि = नीतः, । अथ = नयनोत्तरं ते = निगडनकराः, कालपुरुषाः = नरयमाः, कानिचिद् = अज्ञातानि, वृक्षमूलानि = तरुमूलानि, वितीर्य = दत्वा, अस्मान् = वाणिजः, सङ्केतैः = चेष्टाभिः तानि = दत्तानि तरुमूलानि, भक्षयितुं = भोक्तुं, प्रेरयामासुः प्रेरितवन्तः । स्वयं, तानि = तरुमूलानि, अनास्वाद्य = अभुक्त्वा केवलम्, अस्मान् = निगडितान् तानि = पूर्वोक्तानि मूलानि, भोक्तु = भक्षयितु कृतानुरोधान् = विहित-निवेदनान् तान् = नरयमान्, वीक्ष्य = दृष्ट्वा शङ्काकुला = द्वापराकुला, अपि क्षुधातुरा = बुभुक्षापीडिता, मत्सहचराः = मम मित्राणि, यथेच्छं = मनोनुकूलं, तानि = तरुमूलानि, जघसुः = भ[क्षि]तवन्तः । अहं = सिन्धुवादः, तान् = पुरुषान्, सन्दिहानः = विशङ्कमानः, तानि = तरुमूलानि, प्रत्यादिशम् = निषिद्धमकरवम् । अचिराच्च = शीघ्रमेव अस्मत्सहचराः = अस्माकं सहवर्तिनः, तानिः = तरुमूलानि, भुक्त्वा = खादित्वा, विस्मृता-त्मानः = आत्मांन विस्मृताः सन्तः किमपि = अव्यक्तं, प्रलपितुम् = वक्तुम् आरभन्त = प्रारभन्त । तैः = नरान्तकैः, च, उपहृतं = दत्तं, नारिकेलतै-लयाचितम् = नारिकेलतैले कृतयाचनम्, ओदनं=भक्तं तण्डुलं वा, आतृप्तेः = तृप्तिपर्यन्तम् अभुञ्जत = अखादन् । अनिच्छन्नपि = अवाञ्छन्अपि, अहं = सिन्धुवादः प्राणसन्धारणाय = जीवनरक्षणाय किञ्चित् = स्तोकम् अभ्यवाहरम् = अखादम् ।

समासः—काल एव पुरुषः = कालपुरुषः, वृक्षमूलानि = वृक्षाणां मूलानि, कृतानुरोधान् = कृतः अनुरोधः यैस्ते तान्, शङ्काकुला = शङ्कया आकुला, विस्मृतात्मानः = विस्मृतः आत्मा यैस्ते, नारिकेलतैलपाचितम् = नारिकेलस्य तैलेन पाचितम्, प्राणसन्धारणाय = प्राणान्तं सन्धारणाय ।

कोषः—'वृक्षो महीरुहः शाखी' 'मूलं बुध्नोऽङ्घ्रिनामकः' इत्युभयत्राप्यमरः ।

व्याकरणम्—इच्छन् = इष् + शतृ, भक्षयितुम् = भक्ष् = णिच् + तुमुन् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३. प्रश्नः—कार्या व्याख्या अधोलिखितस्य ।

ते हि कालपुरुषाः पुरुषादापसदा अस्मान् प्रथमोषधिविशेषेण विमोह्य तैलपक्वोदनेन पीवरतां नीत्वा भोक्तुमकामयन्त । एवं पीनतामापादितास्त पस्विनो मम सखायः क्रमेण तेषामामिषतामयासिषुः । अहं तु मृत्योर्भयेन क्षीयमाणोऽत्यल्पमश्नन्नास्थिपञ्जरावशेषो मत्पीवरतनुतां प्रतीक्षमाणैस्तैः कञ्चन कालं विमुक्तः स्वच्छन्दं चरितुमप्यनुमतः कमपि समयं चिन्तासन्ततमनैषम् ।

अथवा

एवं लब्धावसर एकस्मिन् वासरे तां वसतिं विहाय पलायने मति व्यधाम् । मन्निरीक्षणकार्यं नियोजितेनानुमितमत्पलायनाभिप्रायेण स्थविरेणैकेन परावर्तितुं समाहूयमानोऽपि त्वरितगतिस्तस्य दृशोरगोचरोऽभवम् । सप्तवासरान् निरन्तरं प्रधावमानस्तत्रोपलब्धैः भूरिभिनीरिकेलफलैः केवलं निवारितक्षुत्पिपासः प्रतिक्षणं मदन्वेषणपरायणानां तेषामासत्ति विशङ्कमानः कथमप्यष्टमे दिवसे सिन्धुतटमुपगतः कांश्चित् सिताङ्गान् जनान् प्रचुरमरिचनिचयावचयव्यापृतान् विलोक्य निर्भयं तानुपासरम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ते चतुर्थसिन्धुयात्राप्रसङ्गे हितवादं वर्णयति सिन्धुवादः स्वमित्राणां मारणम् कालपुरुषकृतमत्र ।

व्याख्या—ते = नरभक्षकाः, हि, कालपुरुषाः = यममानवाः, पुरुषादापसदाः = नरभक्षक नीचाः, अस्मान् = सिन्धुवादप्रमुखान् वणिजः, प्रथमम् = पूर्वम्, औषधिविशेषेण = विशिष्टप्रकारकौषधविशेषेण, विमोह्य = मोहमप्रापयित्वा, तैलपक्वोदनेन = स्नेहपाचिततण्डुलेन, पीवरतां = पीनतां नीत्वा = समानीय, भोक्तुं = भक्षयितुम्, अकामयन्त = ऐच्छन् एवं = पूर्वोक्तप्रकारेण, पीनतां = पीवरताम्, आपादिता = प्रापिता, तपस्विनः = वराकाः, मम = सिन्धुवादस्य सखायः = सुहृदः, क्रमेण, तेषांम् = मांसभक्षकानाम्, आमिषताम् = भोज्यताम, अयासिषुः = अवापुः । अहं = सिन्धुवादः, तु, मृत्योः = मरणस्य, भयेन = भीत्या प्रत्यहं = प्रतिदिनं,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षीयमाणो = कृशतां नीयमानः, अत्यल्पम् = अतिस्वल्पम्, अश्नन् = खादन्, अस्थिपञ्जरावशेष = अतीव कृशः, मत्पीवरतनुतां = मत्पुष्टशरीरतां, प्रतीक्षमाणैः = प्रतीक्षां कुर्वाणैः, तैः = नरान्तकैः कञ्चन = स्वल्पं, कालम् = समयं, विमुक्तः = बन्धनरहितः, स्वच्छन्दं = स्वेच्छया, चारितुम् = भ्रमितुम्, अपि, अनुमतः = कृतानुज्ञः, कमपि = स्वल्पमपि, समयं = कालं, चिन्तासन्ततं = निरन्तरचिन्ताशीलम्, अनैषम् = नीतवान् ।

समासः—कालपुरुषाः = काल एव पुरुषः, ते, पुरुषादाः = पुरुषम् अत्ति इति पुरुषादः, ते, तैलपक्वोदनेन = तैलैः पक्वेन ओदनेन, अस्थिपञ्जरावशेषः = अस्थ्नां पञ्जरमेव अवशेषो यस्य सः, चिन्तासन्ततम् = चिन्तया सन्ततम् ।

कोषः—'पीन पीन्वी तु स्थूलपीवरे' इत्यमरः ।

व्याकरणम्—प्रति + ईक्ष + शानच् = प्रतीक्षमाणः । वि + मुच + क्त = विमुक्तः ।

अथवा

प्रसङ्गः—सिन्धुवादोऽत्र वर्णयति नरान्तकसमीपात् स्वपलायनम् श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तचतुर्थसिन्धुयात्रायां ।

व्याख्या—एवम् = पूर्वोक्तप्रकारेण, लब्धावसरः = प्राप्तसमयः, एकस्मिन् = अपरस्मिन्, वासरे = दिने, तां = नरभक्षकप्रचुरां, वसतिं = निवास धरां, विहाय = त्यक्त्वा पलायने = अपसरणे, मतिं = धियम्, व्यधाम् = अकरवम् । मन्निरीक्षणकार्यनियोजितेन = मदवलोकननियुक्तेन, अनुमितमत्पलायनाभिप्रायेण = सम्भावितमत्पलायनभावेन, स्थविरेण = गतायुषा, एकेन = अन्यतमेन, परावर्तितुम् = पुनरागमनाय, समाहूयमानोऽपि = आमन्त्र्यमाणोऽपि, त्वरितगति = शीघ्रगमनः, तस्य = रक्षकस्य मम दृशोः = नेत्रयोः, अगोचरः = अविषयः, अभवम् = जातः । सप्तवासरान् = सप्तदिवसान्, निरन्तरं = सदा प्रधावमानः, धावन्, तत्रोपलब्धैः = तत्र प्राप्तैः, भूरिभिः = बहुभिः: नारिकेलफलैः केवलं, निवारितक्षुत्पिपासः = निवृत्तभोजनजलपानेच्छः प्रतिक्षणं = प्रतिपलं, मदन्वेषणपरायणानां = मदगवेषणा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लीनानां तेषां = कालपुरुषाणामासत्तिम् = सामीप्यम्, विशङ्कमानः = तर्कयन्, कथमपि = यथाकथञ्चित्, अष्टमे = अष्टसंख्यके, दिवसे = दिने, सिन्धुतटमुपगतः = सागरतटमागतः, कांश्चित् = कतिपयान् सिताङ्गान् श्वेताङ्गान्, जनान् = मनुष्यान्, प्रचुरमरिचनिचयावचयव्यापृतान् = बहुमरिचसमूहसञ्चयलग्नान्, विलोक्य = दृष्ट्वा, निर्भयं = भयरहितं, तान् = मरिचसञ्चयलीनान्, उपासरम् = अगच्छम् ।

समासः—लब्धावसरः = लब्धः अवसरः येन सः, मन्निरीक्षणकार्यनियोजितेन = मम निरीक्षणस्य कार्ये नियोजितेन, अनुमितमत्पलायनाभिप्रायेण = अनुमितः मम पलायनस्य अभिप्रायः येन तेन, त्वरितगतिः = त्वरिता गति र्यस्य सः, नारिकेलफलैः = नारिकेलस्य फलैः, निवारितक्षुत्पिपासः, निवारिते क्षुत्पिपासे येन सः, मदन्वेषणपरायणानां = मम अन्वेषणे परायणानाम्, सिन्धुतटम् = सिन्धोः तटं, सिताङ्गान् = सितानि अङ्गानि येषां तान्, प्रचुरमरिचनिचयावचयव्यापृतान् = प्रचुरः यः मरिचनिचयः तस्य अवचये व्यापृतान् ।

कोषः—"दिवसवासरौ' इत्यमरः ।

व्याकरणम्—वि + ओहाक् + क्त्वा + ल्यप् = विहाय, वि + लुच् + क्त्वा + ल्यप् = विलोक्य ।

४. प्रश्न—व्याख्येया अधोलिखितांशाः—

'कुतो भवानिति' मद्देशभाषायां पृच्छतस्तानुदितप्रहर्षोऽहं निखिलं स्वागमप्रकारमकथयम् । नराशनमुखगतस्यापि मम ततो विमुक्तिवृत्तान्तमाकर्ण्य विस्मितास्ते सानन्दं मामभ्यनन्दन् ।

अथ तैः सह कानिचिदहानि मरिचसञ्चयकर्मणि तत्रातिवाह्य प्रवहणमधिरूढस्तेषां निवासभुवं द्वीपमेकमुपागतस्तैः सकुतुकं तत्रत्य नरपतिं सम्प्रापितोऽभवम् । स च परमोदाराशयोऽस्मद्वृत्तान्तश्रवणविस्मितात्मा मह्यमुपहृतनववसनो मां समाराधयितुमधिकृतान् समादिदेश । तत्र च समृद्धे द्वीपे महनीये गृहे वसन् प्रत्यहमभिवर्धमानराजप्रासादो राजानुवर्तिभिरधिकारिभिरिभ्यैर्जनैश्च सहोपचितस्नेहः सुखेनावात्सम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ते चतुर्थसिन्धुयात्राप्रसङ्गे सिन्धुवादः हितवादं कथयति मरिचव्यापारिदेशगमनकथामत्र।

व्याख्या—कुतः = कस्माद्, भवान् = श्रीमन् ? इति = इत्याकारकं, मद्देशभाषायाम् = मन्मातृभाषायाम् पृच्छतः, = जिज्ञासितान्, तान् = सद्यः मिलितान् जनान् उदितप्रहर्षः = समुत्पन्नहर्षः, अहं = सिन्धुवादः, निखिलं= पूर्णं, स्वागमप्रकारम् = निजागमनप्रकारम्, अकथयम् = अवर्णयम्। नराशनमुखगतस्य = मानवभक्षकमुखप्रविष्टस्य, अपि, मम = सिन्धुवादस्य, ततो = मानवभक्षकमुखात् विमुक्तिवृत्तान्तं = मुक्तिकथानकम्, आकर्ण्य = श्रुत्वा, विस्मिताः = चकिताः, ते = श्रवणाताः, सानन्दं = सहर्षं, माम् = सिन्धुवादम्, अभ्यनन्दन् = प्रशशंसुः।

अथ = पश्चात्, तैः = प्रशंसकैः, सह = साकं, कानिचित् = कतिपयानि, अहानि = दिनानि, मरिचसञ्चयकर्मणि मरिचानामेकत्रीकरेण तत्र = तस्मिन् स्थाने, अतिवाह्य प्रवहणम् = पोतम्, अधिरुढः = कृतारोहणः, तेषां = मरिचव्यापारिणां, निवासभुवं = वासस्थानं, द्वीपम् = अन्तरीपम्, एकम = अन्यतमम्, उपागतः = प्राप्तः, तैः = मरिचव्यापारिभिः सकुतुकं = सकौतूहलं, तत्रत्यं = तद्देशस्थं नरपति = राजानम्, सम्प्रापितोऽभवम् = प्रापितोऽभवम्। सः = तद्देशनरपतिः, च, परमोदाराशयो = बहुकृपालुस्वभावः, अस्मद्वृत्तान्तश्रवणविस्मितात्मा = अस्मत्कथाश्रवणचकितात्मा, मह्यम् = सिन्धुवादम्, समाराधयितुम् = सेवितुम्, अधिकृतान् = नियुक्तान् अधिकारिणः, समादिदेश = आदिष्टवान्, तत्र = द्वीपे, च, समृद्धे = धनाढ्ये द्वीपेऽन्तरीपे, महनीये विशाले, गृहे = निकेतने, वसन् = निवसन्, प्रत्यहं = प्रतिदिनम्, अभिवर्धमानराजप्रसादो = वृद्धनृपकृपाकटाक्षः, राजानुवर्तिभिः = नृपानुगामिभिः, अधिकारिभिः = अधिकारसम्पन्नैः, इभ्यैः = धनिकैः, जनैः = नृभिः, च, सह = साकम् उपचितस्नेहः = वृद्धप्रीतिः, सुखेन = शर्मणा, अवात्सम् = वासमकरवम्।

समासः—मद्देशभाषायां = मम देशस्यभाषायाम्, उदितप्रहर्षः = उदितः प्रहर्षः यस्मिन् सः, स्वागमप्रकारम् = स्वस्य आगमस्य प्रकारम्, नराशन-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुखगतस्य = नराशनानां मुखेषु गतस्य, विनृक्तिवृत्तान्तम् = विमुक्तेः वृत्तान्तम् ।

मरिचसञ्चयकर्मणि = मरिचानां सञ्चयकर्मणि, निवासभुवं = निवासस्य भुवं, सकुतुकं = कुतुकेन सह, नरपतिं = नराणां पतिं, परमोदाराशयो = परम उदार आशयो यस्य सः, अस्मदवृत्तान्तश्रवणविस्मितात्मा = अस्माकं वृत्तान्तानां श्रवणेन विस्मित आत्मा यस्य सः, उपहृतनववसनः, = उपहृतम नवम् वसनम् येन सः, अभिवर्धमानराजप्रसादः = अभिवर्धमानः राज्ञः प्रसादो यस्मिन् सः, उपचितस्नेहः = उचितः स्नेहः यस्य सः ।

कोषः—'शर्म सातसुखानि च' इत्यमरः ।

व्याकरणम्—समाराधयितुम् = सम् + आ + राध् + णिच् + तुमुन् ।

५. प्रश्नः—व्याख्येयः गद्यभागोऽयं सप्रसङ्गः ।

एकदा तत्रत्यान् निखिलान् जनान् नराधिपमपि तुरगानपर्याणान-वल्गान पादग्रहणीकानारोहतोऽवलोक्य विस्मितो राजानमपृच्छम्—

'देव समृद्धेऽत्र भवद्राज्ये कथं तुरङ्गमाः पर्याण वल्गापादग्रहि-काभिरसज्जिताः समारुह्यन्ते ?' इति । स तु तेषां नामाप्यजानन् व्यस्मयत् ।

अथाहं, लोहचर्मकारानुपेत्य प्रदर्शितादर्शस् तान्यश्वपर्याणादीनि सम्पाद्य नृपाय समुपाहरम् । स च तैः स्ववाह्यं तुरङ्गममलङ्कृत्य तमाधि-रुढः प्रसन्नमना बहुपारितोषिकं मह्यं व्यतरत् । अथाधिकारिभिरिभ्य-जनैश्चान्यैः सम्प्रार्थितस्तानि पर्याणादीनि विरचय्य तेभ्य उपहृत्य तैः प्रसन्नमानसैः प्रदत्तं विपुलं वसु समुपार्जयम् । सर्वेषां च स्नेहपात्रमभवम् ।

उत्तरम्—प्रसङ्गः—गद्यभागोऽयं गृहीतः सिन्धुवादवृत्ताख्यगद्यबन्धात् चतुर्थसिन्धुयात्राप्रसङ्गात् श्री म० म० लक्ष्मण शास्त्रिर चितात् । घोट-कालङ्कारनिर्माणप्रयोगविधानमुपदिश्य कियत्स्नेहं लाभं चावाप तस्मिन् देशे इत्येव वर्णयति सिन्धुवादः कथानायकः हितवादं भारवहनवृत्तिजनं श्रवणरतं ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्या—एकदा = एकस्मिन् समये, तत्रत्यान् = तस्मिन् द्वीपे स्थितान्, निखिलान् = सकलान्, जनान् = नरान्, नराधिपमपि, तुरगान् = घोटकान्, अपर्याणान् = पर्याणरहितान्, अवल्गान् = वदनरज्जुरहितान्, अपादग्रहणीकान् = पदग्रहणीरहितान्, आरोहतः = आरोहणं कुर्वतः, अवलोक्य = दृष्ट्वा, विस्मितः = चकितः, राजानम् = नृपतिम्, अपृच्छम् = पृष्टवान् ।

देव = श्रीमन् । समृद्धे = सम्पन्ने, अत्र = वर्तमाने, भवद्राज्ये = भवतां शासनक्षेत्रे, कथं = किं, तुरङ्गमाः = घोटकाः, पर्याणवल्गापादग्रहिकाभिः पर्याणमुखरज्जुपदग्रहणिकाभिः, असज्जिताः = अनलङ्कृताः, समारुह्यन्ते = आरुह्यन्ते ? इति । सः = राजा, तु, तेषां = उपरिवर्णितानां नामापि = संज्ञामपि, अजानन् = अनवगच्छन्, व्यस्मयत = विस्मितोऽभूत् अथ = पश्चात्, अहं = सिन्धुवादः, लोहचर्मकारानुपेत्य = लोहकर्मनिरतान् चर्मकर्मनिरतान् गत्वा, प्रदर्शितादार्शः = दर्शितप्रतिकृतिकः, तानि = अश्वालङ्करणानि, अश्वपर्याणादीनि = घोटकपर्याणादीनि, सम्पाद्य = निर्माय्य, नृपाय = राज्ञे, समुपाहरम् = अददाम् । सः = राजा, च, तं = अलङ्कृत्य = विभूष्य, तम् = घोटकम्, अधिरूढः = आरूढः, प्रसन्नमना = हृष्टचेताः, बहुपारितोषिकं = प्रभूतोपहारम्, मह्यं = सिन्धुवादाय, व्यतरत = अददात् । अथ = अनन्तरम्, अधिकारिभिः = अधिकारसम्पन्नैः, इभ्यजनैः = धनिकैः, अन्यैः = इतरैः, सम्प्रार्थितः = निवेदितः, तानि = अश्वालङ्करणानि, पर्याणादीनि = पर्याणादिसंज्ञकानि, विरचय्य = सम्पाद्य, तेभ्यः = समुत्कण्ठितेभ्य अधिकारिधनिकादिभ्यः, उपहृत्य = उपायनीकृत्य, तैः = गृहीतोपहारैः, प्रसन्नमानसैः हृष्टहृदयैः, प्रदत्तं = समर्पितं, विपुलं = बहुवसु धनम्, समुपार्जयम् = सम्पादयम् । सर्वेषां, च, स्नेहपात्रं = प्रेमास्पदम्, अभवम् = अभूवम् ।

समासः—पर्याणवल्गापादग्रहिकाभिः = पर्याणं च वल्गा च पादग्रहिका चेतीतरेतरद्वन्द्वः, ताभिः, प्रदर्शितादर्शः=प्रदर्शितः आदर्शः येन सः, पर्याणादीनि = पर्याणम् आदौ यत्र तानि, स्वबाह्यं = स्वेन बाह्यम्, प्रसन्नमना =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसन्नं मनः यस्य सः, प्रसन्नमानसैः = प्रसन्नं मानसं येषां तैः, स्नेहपात्रं = स्नेहस्य पात्रं ।

कोषः—'इभ्य आढयो धनी स्वामी' त्यमरः ।

व्याकरणम्—अवलोक्य = अव = लोक + क्त्वा + ल्यप् उपेत्य = उप + इण् + क्त्वा + ल्यप् ।

६. प्रश्नः—लेख्या अधोलिखितस्य व्याख्या ।

प्रत्यहं राजसभामुपासीनं मामेकस्मिन् अहनि भूपतिरुवाच—"आर्य ! भवन्तं गुणाकरं विलोक्योपस्निह्यतीवास्माकमन्तरात्मा । सर्वाश्चास्मदीयाः प्रकृतयो भवन्तमनुरक्ताः । अद्यैकस्मिन् विषये भवन्तं किञ्चिदनुरोद्धुमिच्छामि न तदार्येण प्रत्याख्येयम्' इति ।

अहं तं प्रत्यवोचम्—"सर्वथा प्रभवति देवोऽस्योपकारभरक्रीतस्य शरीरस्य । तद्यथेच्छमादेशदानेनानुगृह्यतामयञ्जन इति ?

आर्य ! भवन्तमिह कृतदारपरिग्रहं सुखिनं द्रष्टुमिच्छामि ।" इत्येवं वादिनस्तस्य प्रणयप्रार्थनामिमां प्रत्यादेष्टुमसञ्जातसाहसोऽहं 'यथाज्ञापयति देव' इति तदभ्युपागमम् । अथैकया तरुण्या रमण्या कृतोद्वाहस्तया सह गार्हस्थ्यसुखमनुभवन्नपि जन्मभूमिस्नेहेन बलवत्तरेण प्रेरितस्ततोऽपसरणावसरं प्रतीक्षमाणः कालं कञ्चनाक्षपयम् ।

उत्तरम्—प्रसङ्गः—सिन्धुवादः हितवादं श्रावयति स्वोद्वाहप्रसङ्गमत्र श्री म० म० लक्ष्मण शास्त्रिरचितसिन्धुवादवृत्तकथायां चतुर्थसिन्धुयात्रायाम् ।

व्याख्या—प्रत्यहं = प्रतिदिनं, राजसभामुपासीनं = नृपपरिषदमासीनम्, मां = सिन्धुवादं, एकस्मिन्, अहनि = दिने, भूपति = नृपतिः उवाच = अवोचत् । "आर्य ! भद्र ! भवन्तं = श्रीमन्तं, गुणाकरं = गुणनिधिं, विलोक्य = दृष्ट्वा, उपस्निह्यति = द्रवति, इव = यथा, अस्माकमन्तरात्मा = मादृशामात्मा । सर्वा = पूर्णाः, च, अस्मदीयाः, प्रकृतयः = प्रजाः, भवन्त = श्रीमन्तम्, अनुरक्ताः = स्निग्धाः । अद्यैकस्मिन्, विषये = प्रसङ्गे,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवन्तं = श्रीमन्तं, किञ्चिदनुरोद्धुमिच्छामि = निवेदितुं वाञ्छामि। न=नहि, तत् = निवेदनम्, आर्येण = श्रीमता, प्रत्याख्येयम् = निषेधितव्यम् ।' इति। अहं = सिन्धुवादः, तं = नृपतिं, प्रत्यवोचम् = अवदम् सर्वथा = सर्वप्रकारेण, प्रभवति = सक्षमोऽस्ति, देवः = स्वामी, अस्योपकारभरक्रीतस्य शरीरस्य = मम देहस्य। तद्यथेच्छम् = स्वेच्छया, आदेशदानेन = आज्ञया, अनुग्राह्यतामयं, जनः = सेवकः इति।

"आर्य ! = भद्र ! भवन्तम् = श्रीमन्तं कृतदारपरिग्रहमिहं = कृतोद्वाहमत्र, सुखिनं = सुखाढ्यं, द्रष्टुमिच्छामि = अवलोकयितुं वाञ्छामि ।" इत्येवम् = इत्थं, वादिनस्तस्य = राज्ञः प्रणयप्रार्थनामिमाम् = प्रेमाभ्यर्थनामिमाम्, प्रत्यादेष्टुम् = निराकर्तुम्, असञ्जात साहसः = अनुत्पन्नधैर्यः, अहं = सिन्धुवादः, यथाआज्ञापयतिदेवः = यथादेशः श्रीमतामिति तदभ्युपागमम् = स्वीकृतवान् । अथ = पश्चात् एकया, तरुण्या = युवत्या रमण्या= स्त्रिया, कृतोद्वाहः = सम्पन्नविवाहः, तया = रमण्या, सह = साकं, गार्हस्थ्यसुखं = गृहस्थाश्रमानन्दम्, अनुभवन्नपि = भुञ्जन्नपि, जन्मभूमिस्नेहेन = मातृभूमिप्रेम्णा, वलवत्तरेण = उत्कटेन प्रेरित = सम्प्रेरितः, ततोपसरणावसरं = पलायनकालं प्रतीक्षमाणः, कालं = समयं, कञ्चन अक्षपयम् = अयापयम् ।

समासः—राजसभाम् = राज्ञः सभां, गुणाकरं = गुणानामाकरम् उपकारभरक्रीतस्य = उपकारस्य भरः तेन क्रीतस्य, यथेच्छम् = इच्छामनतिक्रम्य, आदेशदानेन = आदेशानां दानेन, कृतदारपरिग्रहं = कृतः दाराणां परिग्रहः येन तम्, असञ्जातसाहसः = न सञ्जातम् साहसम् यस्य सः, कृतोद्वाहः, कृतः उद्वाहः येन सः, गार्हस्थ्यसुखं = गार्हस्थ्यम् सुखं, जन्मभूमिस्नेहेन = जन्मभूमेः स्नेहेन, अपसरणावसरं = अपसरणस्य अवसरं ।

कोषः—'प्रकृतयः पौराणां श्रेणयोऽपि च' 'भार्याजायाऽथ पुम्भूम्नि दाराः स्यात्' 'प्रत्यादेशो निराकृतिः इति सर्वत्राप्यमरः ।

व्याकरणम्—प्रत्यादेष्टुम् = प्रति + आ + दिश् + तुमुन् । प्रतीक्षमाणः= प्रति + ईक्ष् + शानच ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

७. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

एवं मयि ततः पलायनोपायान्वेषणपरायणे कस्यचिदस्मत्प्रणयिनः प्रतिवेशिकस्य भार्या रुगार्ता सहसाऽम्रियत । तं च शुचा व्याकुलं समाश्वासयितुं गतः 'चिरं जीव' इति वदन्नहं तेनोक्तः—

"भद्र ! किमिदमसम्बद्धं प्रार्थयसे ? ननु घटिकामात्रावशेषो मज्जीवनावधिः, अचिरादेव प्रिययोपरतया सह भूमौ निखातो भविष्यामि । सोऽयमेतद्देशस्याचारो यद्दम्पत्योर्येकस्मिन् मृतेऽपरोऽपि तेन सार्धं भूमिसात् क्रियते । सर्वैरपि जनैरनुलङ्घनीयोऽयं नृशंसः समुदाचारः" इति ।

उत्तरम्—प्रसङ्ग—श्री म० म० लक्ष्मणशास्त्रिविरचित सिन्धुवादवृत्ते चतुर्थसिन्धुयात्रायां तद्देशाचारं वर्णयति सिन्धुवादः हितवादं ।

व्याख्या—एवं = पूर्वोक्तप्रकारेण, मयि = सिन्धुवादे, ततः = तस्माद् देशात्, पलायनोपायान्वेषणपरायणे = अपसरणोपायगवेषणानिरते कस्यचिद् = विशिष्टस्य, अस्मत् प्रणयिनः = अस्माकं स्नेहपात्रस्य, प्रतिवेशिकस्य = प्रतिवेशिनः, भार्या = रमणी, रुगार्ता = रोगसम्पीडिता, सहसा = अकस्मात्, अम्रियत = मृता । तं = मृतपत्नीकं, च, शुचा = शोकेन, व्याकुलं = विह्वलं, समाश्वासयितुं = सान्त्वयितुं, गतः = प्राप्तः "चिरं = बहुकालं, जीव = प्राणान् धारय" इति, वदन् = कथयन्, अहं = सिन्धुवादः, तेन = मृतपत्नीकेन, उक्तः = प्रोक्तः—

"भद्र = महानुभाव ! किम् = कथम्, इदम् = एतत्, असम्बद्धं = पूर्वापरसम्बन्धविरुद्धं, प्रार्थयसे = निवेदयसे ? ननु, घटिकामात्रावशेषो = षष्ठिपलमात्रावशेषः, मज्जीवनावधिः = मम जीवनकालः, अचिरादेव = शीघ्रमेव, प्रियया = स्त्रिया, उपरतया = मृतया, सह = साकं, भूमौ = धरायां, निखातो = भूमिगर्भस्थो, भविष्यामि । सोऽयम् एतद्देशस्य = मम राष्ट्रभूमेः, आचारः = व्यवहारः, यत् दम्पत्योः = जम्पत्योः, एकस्मिन् मृते = उपरते, अपरः = शिष्टः, अपि, तेन = मृतेन सार्धं = सह, भूमिसात् क्रियते = भूगर्भस्थो विधीयते । सर्वैः = सकलैः, अपि, जनैः = लोकैः, अनुलङ्घनीयः लङ्घनायोग्यः अयं = सद्योनिर्दिष्टः, नृशंसः = क्रूरः, समुदाचारः = व्यवहारः' इति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समासः—पलायनोपायान्वेषणपरायणे = पलायनस्य उपायानाम् अन्वेषणे यः परायणः तस्मिन्, अस्मत् प्रणयिनः अस्माकं प्रणयिनः, रुगार्ता = रुजा आर्ता, घटिकामात्रावशेषः = घटिकामात्रम् अवशेषो यस्य सः, मज्जीवनावधिः = मम जीवनस्य अवधिः ।

कोषः—'नृशंसो घातुकः क्रूरः' इत्यमरः ।

व्याकरणम्—अनुलङ्घनीयः = अनु + लघि + अनीयर् ।

८. प्रश्नः—व्याख्येयः गद्यभागः अधोलिखितः ।

ईदृशनृशंसाचारश्रवणसञ्जातसाध्वसे मयि तस्य सम्बन्धिनो बान्धवाः सखायः प्रतिवेशिनश्च तदौर्ध्वदैहिककर्मसम्विधानाय समाजग्मुः तां च तस्योपरतां भार्यां महार्घनेपथ्येन सञ्च्छाद्य विभूष्य च समग्रैरलङ्करणैः शवयाने बद्ध्वा शोकोचितनेपथ्येन तद्भर्त्रा सम्बन्धिबान्धवैश्च समनुसृतामदूरवर्तिनोऽत्युच्चस्यैकस्य शिखरिण उपत्यकां नीत्वा अपनीतपिधान एकत्र महागर्ते रज्जुभिरवातारयन् । तदनु तस्याः पतिमापृष्ठबान्धवगणमविहितप्रतिबन्धलेशं तत्रैव शवयाने पार्श्वनिहिताशनजलपूर्णकलशे निवेश्य तस्मिन्नेवातिगभीरे गर्तेऽवतार्य गर्तमुखं च शिलया समाच्छाद्य स्वं स्वं गृहमयासिषुः । ईदृशक्रूराचारनित्यपरिचिततया सर्वथाऽनाकुलांस्तान् तद्बान्धवान् विलोक्य विस्मयोद्वेगशवलस्वान्तोऽहं नितरां कुण्ठितमतिरभवम् । राजानं च तमवोचम्—

उत्तरम्—प्रसङ्गः—सिन्धुवादः वर्णयत्यत्र तद्देशमित्रस्य मृतपत्न्या सहैव गर्तनिक्षेपप्रकारम् हितवादं श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्ते चतुर्थसिन्धुयात्राप्रसङ्गे ।

व्याख्या—ईदृशनृशंसाचारश्रवणसञ्जातसाध्वसे = एतादृश क्रूराचारश्रवणोत्पन्नभये, मयि = सिन्धुवादे, तस्य = मृतपत्नीकस्य, सम्बन्धिनो = रक्तसम्बद्धाः जना, बान्धवाः = भ्रातरः, सखायः = सुहृदः, प्रतिवेशिनश्च = प्रतिवेशिकाश्च, तदौर्ध्वदैहिककर्मसंविधानाय = तदन्त्येष्टिसंस्कारसम्पादनाय, समाजग्मुः = समागतवन्तः, तां = मृतां, च, तस्य = सिन्धुवादमित्रस्य,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपरतां = मृतां, भार्यां महार्घनेपथ्येन = बहुमूल्यवेषसा, संच्छाद्य = आच्छाद्य, विभूष्य = भूषयित्वा, च, समग्रैः = सकलैः, अलङ्करणैः = भूषणैः, शवयाने = कुणपयाने, बद्ध्वा = निगडयित्वा, शोकोचितनेपथ्येन = कारुणिकनेपथ्येन, तद्भर्त्रा = मृतायाः स्वामिना, सम्बन्धिबान्धवैश्च = रक्तजसम्बन्धिभिः भ्रातृभिः, च, समनुसृताम् = अनुगताम्, अदूरवर्तिनः = समीपस्थस्य, अत्युच्चस्य = महोन्नतस्य, एकस्य शिखरिणः = पर्वतस्य, उपत्यकां = समीपभुवम्, नीत्वा = समानीय, अपनीतविधाने = दूरीकृताच्छादने, एकत्र = एकस्मिन्, महागर्ते = विशालगर्ते रज्जुभिः = शुल्वैः, अवातारयन् = अवतारयन्ति स्म। तदनु = तत्पश्चात् तस्याः = मृतायाः, पतिं = भर्तारम्, आपृष्टबान्धवगणम् = आपृष्टभ्रातृनिचयम्, अविहितप्रतिबन्धलेशम् = अकृतप्रतिबन्धलेशम्, तत्रैव, शवयाने = कुणपयाने, पार्श्वनिहिताशनजलपूर्णकलशे = समीपस्थभोजनपानीयपूर्णघटे, निवेश्य = निवेशनं कृत्वा, तस्मिन्नेव, अतिगभीरे = अतलस्पर्शिनि, गर्ते = निखाते, अवतार्य = अवतरणं सम्पाद्य, गर्तमुखं = खातमुखं, च, शिलया = ग्रावखण्डेन, समाच्छाद्य = आच्छाद्य, स्वं स्वं = निजं निजं, गृहम् = गेहम्, अयासिषुः = गतवन्तः। ईदृशक्रूराचारनित्यपरिचिततया = एतादृशनृशंसाचारनित्यपरिचिततया, सर्वथा = सर्वप्रकारेण, अनाकुलान् = आकुलतारहितान्, तद्बान्धवान् = स्वमित्रभ्रातॄन्, विलोक्य = दृष्ट्वा, विस्मयोद्वेगशबलस्वान्तः = आश्चर्यव्याकुलतायुक्तचेताः, अहं = सिन्धुवादः, नितरां = भृशम्, कुण्ठितमतिः निष्क्रियबुद्धिः, अभवम्। राजानं = तद्देशनृपतिं, च, तम् = सुपरिचितं मित्रं च अवोचम् = अकथयम्।

समासः—ईदृशनृशंसाचारश्रवणसञ्जातसाध्वसे = ईदृशः नृशंसः यः आचारः तस्य श्रवणेन सञ्जातं साध्वसं यस्मिन् सः, तदौर्ध्वदैहिककर्मसम्विधानाय = तस्याः यदौर्ध्वदैहिककर्म तस्य संविधानाय, महार्घनेपथ्येन = महार्घेण, नेपथ्येन, शवयाने = शवस्य याने, शोकोचितनेपथ्येन = शोके उचितेन नेपथ्येन, सम्बन्धिबान्धवैश्च = सम्बन्धिभिः बान्धवैश्च, अपनीतविधाने = अपनीतं विधानं यस्य तस्मिन्, महागर्ते = महाँ चासौ गर्तश्च तस्मिन्, आपृष्टबान्धवगणम् = आपृष्टः बान्धवानां गणः येन तम्, अविहित-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतिबन्धलेशम् अविहितः प्रतिबन्धानां लेशः येनतम्, पार्श्वनिहिताशनजलपूर्ण-कलशे = पार्श्वे निहितः अशनेन जलेन च पूर्णः कलशः यस्मिन् तत्र, ईदृश-क्रूराचारनित्यपरिचिततया—ईदृशः क्रूरः यः आचारः तेन परिचितः तस्य भावः तत्ता, तया, विस्मयोद्वेगशवलस्वान्तः—विस्मयेन, उद्वेगेन च शवलं स्वान्तं यस्य सः, कुण्ठितमतिः = कुण्ठिता मतिर्यस्य सः ।

कोषः—'रज्जुस्त्रिषु वटी गुणः' 'कुणपः शवमस्त्रियाम्' 'नृशंसोघातुकः क्रूरः' 'अपिधानतिरोधानपिधानाच्छादनानि च' इति सर्वत्राप्यमरः ।

व्याकरणम्—अवतार्य = अव् + तॄ + णिच् + क्त्वा + ल्यप् । समाच्छाद्य = सम् + आ + छादि + क्त्वा + ल्यप् । भर्त्री = भृ + तृच् + टा ।

९. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

"देव ! जीवितजननिखननाचारमिमं जगति क्वचिदप्यदृष्टश्रुतपूर्वं भवद् राज्ये प्रचलन्तं वीक्षमाणस्य मम दलतीव हृदयम् । अमानुषः सोऽयं समुदाचार" इति ।

सोऽब्रवीत्—"आर्य ! किमत्र क्रियतामनुल्लङ्घनीये नियमे ? एतेन खलु नियमेन सर्वानप्यधिकुर्वताऽहमपि संयतोऽस्मि । दुर्दैवाद्यदि देवीमतिजीवेयं मयापि सैवेयं गतिर्निर्विवादमनुगन्तव्या" इति ।

अहं पुनरवदम्—देव ! किमेष नियमो वैदेशिकेष्वपि प्रवर्तते ? स उवाच—"अथ किम् ? नियतमेतद्द्वीपवर्तिसर्वजनसाधारणोऽयं नियमो न केनाप्युलङ्घनीय" इति ।

एतदाकर्ण्य चिन्ताक्रान्तोऽहं खिन्नमना गृहं परावर्ते । दैवात् भार्या चेत् प्रथमं म्रियेत हन्त मयाऽपि समनुगन्तव्येति विचारेण दीर्णहृदयः स्वल्पतमेऽपि तस्या अस्वास्थ्ये भृशमुद्विग्नस् तस्या भाविनिधनमुत्प्रेक्ष्यान्तर्वेपमानचेता । अतिक्लेशेन कमपि कालमत्यवाहयम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्तचतुर्थसिन्धुयात्राप्रसङ्गे हितवादं श्रावयति सिन्धुवादः स्वतद्देशनृपमध्ये जीवितनिक्षेपपरम्पराविमर्शम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्या—"देव ! = श्रीमन् ! जीवितजननिखननाचारम् = सप्राण-नरनिक्षेपाचारम्, इमम् = प्रचलिताचारम्, जगति = संसारे, क्वचिदपि = कुत्रचिदपि, अदृष्टश्रुतपूर्वं = पूर्वमनवलोकितमनाकर्णितम्, भवद् राज्ये = श्रीमतां शासनक्षेत्रे, प्रचलन्तं = चलन्तं, वीक्षमाणस्य = पश्यतः, मम = सिन्धुवादस्य वक्तुः दलतीव = स्फुटतीव, हृदयं = स्वान्तं। अमानुषः = मानवेतर सोऽयं = वर्तमानोऽयं, समुदाचारः = व्यवहारः" । इति

सः = राजा तस्य देशस्य, अब्रवीत = अवोचत्—आर्य ! किमत्र = प्रवर्तमाने, अनुलङ्घनीये = ल ङ्घनायोग्ये नियमे = विधाने क्रियताम् = विधीयताम् । एतेन = प्रचलितेन, लुख नियमेन = विधानेन, सर्वान् = जनान्, अपि, अधिकुर्वता = शासता, अहम् = नृपतिः अपि, संयतो = नियमितो, अस्मि । दुर्दैवात् = दुर्भाग्यात्, यदि, देवीम् = महाराज्ञीम् महिषीम्, अति-जीवेयम् = देवी मरणानन्तरम् जीवामि चेत्, मया = राज्ञा, अपि, सैत्रेयं = एषैव गतिः = दशा, निर्विवादम् = विवादरहितं यथा स्यात्तथा, अनु-गन्तव्या = अनुसर्तव्या इति ।

अहं = सिन्धुवादः, पुन = भूयः, अवदम् = अब्रवम् देव = स्वामिन्, किम्, एषः = आचारः, नियमः = समुदाचारः, वैदेशिकेष्वपि = विदेशनिपा-सिष्वपि, प्रवर्तते = प्रवृत्तो भवति ? सः = राजा, उवाच = अकथयत् "अथ किम् ? तेष्वपि प्रवर्तत इति भावः । नियतं = निश्चितम्, एदद्द्वीप-वर्तिसर्वजनसाधारणः = अस्मदन्तरीपनिवसिजनसामान्यः, अयं, नियमः = आचारः न = नहि, केनापि, उलङ्घनीयः = लङ्घयितुं शक्यः इति ।

एतत् = वचनम्, आकर्ण्य = श्रुत्वा चिन्ताक्रान्तः = चिन्तितः, अहं = सिन्धुवादः खिन्नमना = उद्विग्नमना, गृहं = गेहं, परावर्ते = प्रत्यागच्छम् । दैवाद = दैवयोगात् भार्या = पत्नी, चेत्, प्रथमं = पूर्वं, म्रियेत = लोकान्तरं गच्छेत् हन्त = दुःखसूचकमव्ययम्, मया = सिन्धुवादेन, अपि, समनु-गन्तव्या = अनुसर्तव्या, इति = इत्याकारकेण, विचारेण = कल्पनया, दीर्ण-हृदयः = भग्नचेताः स्वल्पतमे = अत्यल्पतमे, अपि, तस्याः = पत्न्याः अस्वास्थ्ये = स्वास्थ्यदोषे, भृशम् = बहु, उद्विग्नः = व्याकुलः । तस्याः =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पत्न्याः, भविनिधनम् = भविष्यन् मृत्युम्, उत्प्रेक्ष्य = कल्पयित्वा, अन्तर्वेप-मानचेताः = अभ्यन्तरकम्पमानहृदयः, अतिक्लेशेन = महाकष्टेन, कमपि = स्वल्पम् कालम् = समयम्, अत्यवाहयम् = अयापयम्।

समासः—जीवितजननिखननाचारम् = जीवितानां जनानांनिखनस्य आचारम् अदृष्टश्रुतपूर्वं = पूर्वम् अदृष्टश्रुतं भवद्राज्ये, भवतां राज्ये निर्वि-वादम् = विवादान्निर्गतम्। एतद्द्वीपवर्तिसर्वजनसाधारणः = एतेषां द्वीप-वर्तिनां सर्वेषां जनानां साधारणः, चिन्ताक्रान्तः = चिन्तयाआक्रान्तः, दीर्णहृदयः = दीर्णहृदयं यस्य सः, भाविनिधनम् भाविनं निधनम्, अन्तर्वेप-मानचेताः = अन्तः वेपमानं चेतः यस्य सः।

कोषः—"नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम्" इत्यमरः।

व्याकरणम्—अनुगन्तव्या = अनु + गम् = तव्यत् + टाप्।

१०. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः।

अथैकदा मद्दुर्दैवमहिम्ना वस्तुतः सा मदीया दयिता, केनाप्यसाध्ये-नामयेनाक्रान्ता दिष्टान्तमवाप। अवशश्चाहं तस्या शवेन सह, दैवमा-क्रोशन् सकलैः सभ्यैरिभ्यैश्च मद्गौरवेण स्वयं नरपतिना चानुस्त्रियमाणः कृतप्राणरक्षणभिक्षः शोकार्तरावभरितदिशावकाशोऽप्यस्पृष्टनिखिलजनहृदयः पितृसदनमनीये। सवेषभूषां मद्योषां प्रथमं समुत्सृज्य मामपि सपाथेय जलं महागर्तेऽधो निधाय पिधाय च तन्मुखं सनृपाः सर्वे ततः प्रातिष्ठन्त।

उत्तरम्—प्रसङ्गः—सिन्धुवादः तत्रत्यपरम्परानुसारं स्व पत्न्या सह, स्वस्यापि गर्तनिक्षेपं वर्णयति हितवादं श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्तचतुर्थसिन्धुयात्रायां।

व्याख्या—अथ = पश्चात्, एकदा = एकस्मिन् समये, मद्दुर्दैव-महिम्ना = मद्भाग्यप्राबल्याद्, वस्तुतः = यथार्थेन, सा = सुखमयजीवनाय प्राप्ता, मदीया = मामकीना, दयिता = प्रिया, केनापि = अज्ञातेन असाध्येन = अचिकित्स्येन, आमयेन = रुजा, आक्रान्ता = संग्रस्ता, दिष्टान्त = प्रलयं यमं वा, अवाप = जगाम। अवशः = विवशः, च, अहं = सिन्धुवादः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्याः = पत्न्याः, शवेन = कुणपेन्, सह = साकं, दैवम् = भाग्यम् आ-क्रोशन् = विनिन्दन्, सकलैः पूर्णैः, सभ्यैः = सज्जनैः इभ्यैः = धनिकैः, च मद्गौरवेण = मत्सम्मानेन, स्वयं, नरपतिना = राज्ञा, च, अनुस्त्रियमाणः = अनुगम्यमानः, कृतप्राणरक्षणरक्षणभिक्षः = विहितजीवनरक्षणयाञ्चासमुदयः, शोकार्तरावभरितदिशावकाशो = करुणक्रन्दभरितदिशाकन्दरः, अपि, अस्पृष्टनिखिलजनहृदयः = अप्रभाविकसकलनरहृदयः पितृसदनम् = श्मशानरूपं महागर्तम्, अनीये = नीतः। सवेषभूषां = सद्वस्त्रभूषणां मद्योषां = स्त्रियं, प्रथमं = पूर्वं, समुत्सृज्य = त्यक्त्वा, माम् = सिन्धुवादम्, अपि, सपाथेयजलं = सभोजनपानीयं, महागर्ते = महाविवरे, अधः = अधस्तात्। निधाय = स्थापयित्वा, = पिधाय = आच्छाद्य च तन्मुखं = गर्तमुखं, सनृपाः = सभूपाः सर्वे = जनाः, ततः श्मशानभूमिरूपगर्तसमीपात्, प्रातिष्ठन्त = परावर्तन्त।

समासः—मद्दुर्दैवमहिम्ना = मम दुर्दैवस्य महिम्ना, कृतप्राणरक्षणभिक्षः = कृता प्राणरक्षणस्य भिक्षा येन सः, शोकार्तरावभरितदिशावकाशः = शोकार्तैः रावैः भरिताः दिशानाम् अवकाशा येन सः, अस्पृष्टनिखिलजनहृदयः = अस्पृष्टानि निखिलानां जनानां हृदयानि येन सः, पितृसदनम् = पितृणां सदनम् सवेषभूषां = वेषेण भूषया च सह सपाथेयजलं = पाथेयेन जलेन च सह, महागर्ते = मह्यां चासौ गर्तश्च तस्मिन्।

कोषः—'कुणपः शवमस्त्रियां' 'रोगण्याधिगदामयाः' इत्युभयत्राप्यमरः।

व्याकरणम् = दिशा = भागुरिमगनुसारमावन्तप्रयोगः।

११. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अहं चाधस्तलं संप्राप्तो गुहामेकां निरन्तरविकीर्णशवसहस्रपूरिगन्धामासन्नमरणकतिपय जीवितनिरवातजनमन्दनिः श्वासश्रवणसन्दारितहृदयामपश्यम्। एकत्र च स्थितः, स्थूलतमै र्वाष्पबिन्दुभिश्चिरमात्मानं समभ्युक्ष्य शोकोदगारैस्तां गुहां प्रतिध्वनयन् सर्वथा निराशोऽप्यनुत्सृष्टजीविताशः प्राणसन्धारणान्वेषणेप्रकारं चिन्तयन् सह सम्प्रेषितं किञ्चित् तत् पाथेयकं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भुक्त्वा निश्चेतन इवनिशां व्यनैषम्। सविधस्थिते प्रत्यहमत्यल्पं भुज्यमाने-ऽपि क्रमेण क्षीणतामुपेयुषि मदन्नसंग्रहे नितरां जीवननिराश एकस्मिन्नहनि संस्थितमवतार्यमाणं पुरुषमेकं तमनुगच्छन्तीं जीवन्तीं तद्भार्यां चापश्यम्। जीवितस्नेहेन नृशंसहृदयीकृतो व्यपगतसदसद्विवेको ऽहं पिहिते गर्तमुखे सहसा तां समुपेत्य शिलाघातमहनम्। तया च सहावतारितं पाथेयं जलं-स्वायत्तीकृत्य कञ्चन कालं जीवितोऽतिष्ठम्। एवं काश्चन जीविताः स्त्रियः काश्चिच्च पुरुषान् समये-समये निहत्य तत्पाथेयापहरणायत्त जीवितः काल-मक्षपयम्।

उत्तरम्—प्रसङ्गः—बीभत्सरसासिसाधयिषुः कविरत्र सिन्धुवादमुखेन हितवादम् पाठकान् च श्रावयति गर्तावतारणोत्तर क्रियाकलापं कथानाय-कस्य श्री म० म० लक्ष्मणशास्त्रिरचिते सिन्धुवादवृत्ते चतुर्थसिन्धुयात्रा-प्रसङ्गे।

व्याख्या—अहं = सिन्धुवादः, च, अधस्तलं = नीचैः, सम्प्राप्तः = गतः गुहाम् = दरीम्, एकाम् = अन्यतमां निरन्तर विकीर्णशवसहस्रयूति-गन्धाम् = सदाप्रक्षिप्तकुणपसहस्रदुर्गन्धबहुलाम्, आसन्नमरणकतिपयजीवित-निखातजनमन्दनिःश्वासश्रवणसन्दारितहृदयाम् = सद्योमृतकतिचित्-सप्राणक्षिप्तनरमन्दनिःश्वासश्रुतिदीर्णहृदयाम्, अपश्यम् = अवालोकयम्। एकत्र = एकस्मिन् स्थाने, च, स्थितः = वर्तमानः, स्थूलतमैः = पृथुतमैः, वाष्पविन्दुभिः = अश्रुकणिकाभिः, आत्मानं स्वं (सिन्धुवादं) समभ्युक्ष्य = आर्द्रीकृत्य, शोकोद्गारैः = करुणविलापैः, तां = शवबहुलां जीवितजनचितां च, गुहां = कन्दरं, प्रतिध्वनयन् = प्रतिनादयन् सर्वथा = सर्वप्रकारेण, निराशः = आशारहितः, अपि, अनुत्सृष्टजीविताशः = अपरित्यक्तजीवनाश। प्राण सन्धारणान्वेषणप्रकारं = जीवनरक्षणप्रकारं, चिन्तयन् = विमृशन् सह = साकं, सम्प्रेषितं = दत्तं, किञ्चित्, तत्, पाथेयं = भोजनजलात्मकं, भुक्त्वा = समादाय, निश्चेतनः = चेतनारहितः, इव = यथा, निशां = यामिनीं व्यनैषम् = व्यत्यपातयम्। सविधस्थिते = पार्श्वस्थे, प्रत्यहं = नित्यम्, अत्यल्पं = स्वल्पमपि, भुज्यमाने खाद्यमाने, अपि क्रमेण = क्रमशः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षीणतामुपेयुषि = कृशतां गते, मदन्नसंग्रहे = मद्भक्ष्यनिवहेनितरां = भृशम्, जीवननिराशः = जीविताशारहितः एकस्मिन् = अन्यतमे, अहनि = दिने, संस्थितं = मृतम्, अवतार्यमाणम् = नीचैरानीयमानं, पुरुषं = जनम एकम्, तम् = मृतम्, अनुगच्छन्तीम् = अनुयान्तीं, जीवन्तीं, तद्भार्यां मृतकपत्नीं, च, अपश्यम् = व्यलोकयम् । जीवितस्नेहेन = प्राणलोभेन, नृशंसहृदयीकृतः क्रूरहृदयीकृतः, व्यपगतसदसद्विवेकः = समाप्तोचितानुचितविचारः, अहं = सिन्धुवादः पिहिते = समाच्छादिते, गर्तमुखे = विवरच्छिद्रे, सहसा = अकस्मात्, तां = जीवितां, पृष्ठतः = पश्चात्, समुपेत्य = आगत्य, शिलाघातम् = पाषाणघातम्, अहनम् = अमारयम् । तया = मया मारितया, च, सह, साकम्, अवतारितम् = गर्ते समानीतम् पाथेयं = भोजनं, जलं = पानीयं स्वायत्तीकृत्य = स्वाधीनतामानीय, कञ्चन, कालं = समयं, जीवितः = जीवनसहितः, अतिष्ठम् = अवसम् । एवम् = अनेनप्रकारेण, काश्चन = काश्चित्, जीविताः = धृतजीवनाः स्त्रियः = दाराः काश्चिच्च पुरुषान् = जनान्, समये समये = काले काले, निहत्य = मारयित्वा तत्पाथेयापहरणायत्तजीवितः = तद्भोजनापहरणायत्तजीवनः कालम् = समयम् अक्षपयम् = अयापयम् ।

समासः—निरन्तरविकीर्णशवसहस्रपूतिगन्धाम् = निरन्तरं विकीर्णानां शवानां सहस्रस्य पूतिगन्धः यस्यां सा ताम्, आसन्नमरणकतिपयजीवितनिखातजनमन्दनिःश्वासश्रवणसन्दारितहृदयाम् = आसन्नं मरणं येषां तेषां, कतिपयानां जीवितनिखातजनानां मन्दनिःश्वासस्य श्रवणेन सन्दारितं हृदयं यया तां, वाष्पबिन्दुभिः = वाष्पाणां बिन्दुभिः, शोकोद्गारैः = शोकस्य उद्गारैः, अनुत्सृष्टजीविताशः = न उत्सृष्टाजीवितस्य आशा येन सः, प्राणसन्धारणान्वेषणप्रकारं = प्राणानां सन्धारणस्य अन्वेषणप्रकारं, सविधस्थिते = सविधे स्थिते, मदन्नसंग्रहे = मम अन्नानां संग्रहे, जीवन निराशः = जीवने निराशः, जीवितस्नेहेन = जीवितस्य स्नेहेन, नृशंसहृदयीकृतः = अनृशंसहृदयः नृशंसहृदयः कृतः इति नृशंसहृदयीकृतः, व्यपगतसद्सद्विवेकः = व्यपगतः सदसतोः विवेकः यस्य सः, गर्तमुखे = गर्तस्य मुखे,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिलाघातं = शिलायाः आघातो यस्यां क्रियायामिति, तत्पाथेयापहरणायत्त-जीवितः = तेषां पाथेयानाम् अपहरणस्य आयत्तं जीवितं यस्य सः ।

कोषः,—सलिलम् कमलम् जलम्' इत्यमरः ।

व्याकरणम्—नृशंसहृदयीकृतः = अभूततद्भावे च्विप्रत्ययः पाथेयम् = पथि साधुः पाथेयः, तं, ढञ् प्रत्ययः ।

१२. प्रश्नः—व्याख्येयः गद्यभागोऽयं सप्रसङ्गः ।

एकस्मिन् दिने सद्योहतैकयोपिदारान्मन्दं पदशब्दं निःश्वासस्वनं चाश्रृणवम् । तां दिशमनुसृत्य गतोऽहं मत्समीपादपसरदिव किञ्चिद्वस्तु ध्वान्तेनानुपलक्ष्यमाणविशेषमलक्षयम् । सङ्कुचितायां गुहायां तस्यामवाक्शिरास्तदनुसरन् केनचित् समयेन गुहावसाने छिद्रमेकं मत्प्रवेशपर्याप्तावकाशं प्राप्य सङ्कोचितगात्रो विनिर्गत्य वहिरागतः पुनरपि प्रत्यागतजीविताशः सिन्धुरोधः स्थितमात्मानमवालोकयम् । मयाऽनुस्रियमाणञ्च कञ्चनजलौकसं शवभक्षणाय तां गुहां प्रविश्य प्रतिनिवर्तमानं निरधारयम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादः वृत्तचतुर्थसिन्धुयात्रायां सिन्धुवादः हितवादं श्मशानभूतगुहानिर्गमनमार्गज्ञानप्रकारं कथयति ।

व्याख्या—एकस्मिन्, दिने = दिवसे, सद्यः = तत्कालं हतैकयोषिदारात् = मारितैकरमणीसमीपात्, मन्दं = शनैः, पदशब्दं = चरणध्वनिं, निःश्वासश्वनं = उच्छ्वासशब्दं, च, अश्रृणवम् = अश्रौषम् । तां = शब्दसंपातसूचितां, दिशं = दिशाम्, अनुसृत्य = आश्रित्य, गतः = प्राप्तः, अहं = सिन्धुवादः, मत्समीपाद् = सिन्धुवादपार्श्वात् अपसरदिव = प्रचलदिव, किञ्चिद्वस्तु = पदार्थजातं ध्वान्तेन = अन्धकारेण, अनुपलक्ष्यमाणविशेषं = अपरिभाव्यमाणविशेषम् अलक्षयम्—अपश्यम् । सङ्कुचितायां = सङ्कीर्णभूतायां तस्यां = पूर्ववर्णितायाम् श्मशानायमानायां गुहायां = कन्दरायाम्, अवाक्शिराः = अधोनमितमस्तकः, तदनुसरन् = वस्त्वनुगच्छन्, केनचित् समयेन = कालेन गुहावसाने = कन्दरासमाप्तौ, छिद्रमेकं = विवरमेकं मत्प्रवेशपर्याप्तावकाशं =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिन्धुवादप्रवेशपर्याप्तस्थानयुक्तं, प्राप्य = अवाप्य, सङ्कोचितगात्रः = लघुकृत-गात्रः, विनिर्गत्य = निष्क्रम्य, बहिरागतः = बाह्यप्रदेशे समायातः, पुनरपि = भूयोऽपि, प्रत्यागतजीविताशः = प्राप्तजीवनाभिलाषः, सिन्धुरोधः स्थितं = सागरतटस्थम्, आत्मानम् = स्वम् अवालोकयम् = अपश्यम् । मया, अनुस्रियमाणम्=अनुगम्यमानं, च, कञ्चन् = कमपि, जलौकसं = पानीयवास्तव्यं, शवभक्षणाय = कुणपखादनाय, तां = पूर्वोक्तां गुहां = कन्दरां, प्रविश्य = प्रवेशं कृत्वा, प्रतिनिवर्तमानं = परावर्तमानं, निरधारयम् = निश्चितवान् ।

समासः—हतैकयोषिदारात् = हतामेकां योषितम् आरात्, पदशब्दं = पदानां शब्दं, निःश्वासस्वनम् = निःश्वासस्य स्वनम्, अनुपलक्ष्यमाणविशेषम् = न उपलक्ष्यमाणः विशेषः यस्य तत्, अवाक्शिराः = अवागस्ति शिरः यस्य सः, गुहावसाने = गुहाया अवसाने, मत्प्रवेशपर्याप्तावकाशं = मम प्रवेशाय पर्याप्तः अवकाशो यस्मिन् तत्, सङ्कोचितगात्रः = सङ्कोचितम् गात्रम् येन सः, प्रत्यागतजीविताशः = प्रत्यागताजीवितस्य आशा यस्मिन् सः, सिन्धुरोधस्थितं = सिन्धोः रोधसि स्थितं, जलौकसं = जले ओकः यस्य तं, शवभक्षणाय = शवानां भक्षणाय ।

कोषः—'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः ।

व्याकरणम्—अनुसृत्य = अनु + सृ + क्त्वा + ल्यप् । अनुस्रियमाणम् = अनु + सृ + शानच् ।

१३. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

अथाऽहं भूयस्तां गुहां प्रविश्य संगृहीतप्रचुरशवालङ्करणरत्नमौक्तिकराशि निष्क्रमणावसरं प्रतीक्षमाणो द्वित्रैर्दिनैस्तत्रापतन्तं पोतमेकमद्राक्षम् । तदधिरूढैश्च गृहीतमत्सङ्केतैःप्रेषितं प्लवमारुह्य पोतं सम्प्राप्नवम् । तत्र च श्रुतमद्भुतपातैस्तैः प्रशंसितसाहसः कैश्चिद् दिनै निरपायं गृहान् सम्प्राप्त आमोदप्रमोदमात्रव्यवसायोऽवसम् ।

एवमुक्त्वा सिन्धुवादस्तानतिथिवरान् सहितवादानन्येद्यु र्भोजनाय पञ्चमसिन्धुयात्राकर्णनाय चागन्तुं सम्प्रार्थ्य विससर्ज । हितवादं च पूर्ववद्दीनार-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शतमतिसृज्य समतोषयत्। अन्येद्युश्च समागतान् तानुद्दिश्य सिन्धुवाद एवं स्वां पञ्चमीं यात्रां शंसितुमुपचक्रमे।

उत्तरम्—प्रसङ्गः—चतुर्थसिन्धुयात्रामुपसंहरन् गृहागमनं वर्णयति सिन्धुवोदोऽत्र हितवादं श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तचतुर्थ सिन्धुयात्रायाम्।

व्याख्या—अथ = पश्चात्, अहं = सिन्धुवादः, तां श्मशानभूतां, गुहां = कन्दराम्, प्रविश्य = गत्वा, संगृहीतप्रचुरशवालङ्करणरत्नमौक्तिकराशिः = एकत्रीकृतविपुलकुणपभूषणरत्नमुक्ताकलापः, निष्क्रमणावसरं=पलायनसमयं, प्रतीक्षमाणो, द्वित्रैः, दिनैः = दिवसैः, तत्रापतन्तम् = समायान्तम्, पोतं = प्रवहणम् एकम् अद्राक्षम् = अपश्यम्। तदधिरुढैश्च = पोतारोहितैश्च, गृहीतमत्सङ्कतैः = प्राप्तसिन्धुवादसङ्केतैः प्रेषितं = प्रहितं, प्लवम् = नावम्, आरुह्य = समारुह्य पोतं = जलयानम् = सम्प्राप्नवम् = समागच्छम्। अत्र = पोते, च, श्रुतमदद्भुतवार्तैः = आकर्णितसिन्धुवादविस्मयकारकवृत्तान्तैः, तैः = पोतारुढैः, प्रशंसितसाहसः = अभिनन्दितधैर्यः कैश्चित् दिनैः = दिवसैः निरन्तरायं = निर्विघ्नं गृहान् = गेहान्, सम्प्राप्तः = समागतः, आमोदप्रमोदमात्रव्यवसायः = हर्षानन्दमात्रव्यापारः, अबसम् = न्यवसम्।

एवम् = पूर्वोक्तप्रकारेण, उक्त्वा = कथयित्वा, सिन्धुवादः = कथानायकः, तान् = समुपस्थितान् अतिथिवरान् = अभ्यागतान्, सहितवादान् = हितवादसहितान्, अन्येद्युः = अपरेद्युः, भोजनाय = अशनाय पञ्चमसिन्धुयात्राकर्णनाय = चतुर्थेतरसिन्धुयात्राश्रवणाय, च, आगन्तुं = समागमाय, सम्प्रार्थ्य = प्रार्थयित्वा, विससर्ज = विदायमदात्। हितवादं = भारवहनशीलं कथाकारणं दीनारशतम् = शतदीनारान्, अतिसृज्य = अर्पयित्वा समतोषयत् = तोषयति स्म। अन्येद्युश्च = अपरेद्युश्च समागतान् = समुपस्थितान्, तान् = अतिथीन् उद्दिश्य = अभिलक्ष्य सिन्धुवादः = कथावक्ता एवं = वक्ष्यमाणप्रकारं स्वां = निजां पञ्चमीं = चतुर्थेतरां, यात्रां, शंसितुं = वक्तुम् उपचक्रमे = प्रारभत।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समासः—संगृहीतप्रचुरशवालङ्करणरत्नमौक्तिकराशिः = संगृहीतः प्रचुरः शवालङ्करणानां रत्नमौक्तिकानां च राशिः येन सः, निष्क्रमणावसरं = निष्क्रमणस्यावसरं, तदधिरुढैः = तस्मिन् अधिरुढैः, गृहीतमत्सङ्केतैः = गृहीतः मम सङ्केतः यैस्तैः, श्रुतमदद्भुतवार्तैः = श्रुता मम अद्भुता वार्ता यैस्तैः, प्रशंसितसाहसः = प्रशंसितः साहसः यस्य सः, आमोदप्रमोदमात्रव्यवसायः = आमोदप्रमोदमात्र एव व्यवसायः यस्यः सः।

कोषः—'देवखातविले गुहा' इत्यमरः।

व्याकरणम्—पञ्चमी = पञ्च + डट् (मट्) + ङीप्।

वेदव्यासेन शुक्लेन, सम्पाद्य सुप्रकाशिते।
सिन्धुवादस्य वृत्तेऽस्मिन् चतुर्थः कथितो गमः ॥४॥

पञ्चमीसिन्धुयात्रा

१. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

एवं मया प्रत्यहमुपभुज्यमानैः सुखैः मांपुनरपि सिन्धुयात्रासाहसाङ्गीकारान्निवारयितुमपर्याप्तैर्भूयो विचलितहृदयः पञ्चमींयात्रामुद्दिश्यप्रस्थातुं सन्नद्धोऽभवम्। मृतके पोतेऽविश्वसन् स्वकीयेन व्ययेनाभिनवं पोतं निर्वाप्य सर्वोपकरणैः परिकरितं तं सञ्चितवाणिज्योपयोगिवस्तुनिकरः समारुह्यान्यांश्च वणिजः सपण्यजातानधिरोप्यानुकूले वहति वाते प्रस्थितः कैश्चिद्दिनैर्विजनमेकं द्वीपं प्रापम्। तत्र चैकमतिविशालमण्डजाण्डं चञ्चुपुटोद्घाटितमुखान्तरविनिर्गच्छन्नवशावकमपश्यम्। मया तत् स्प्रष्टुं निषिध्यमाना अपि मत्सहचरा मद्वचनमुपेक्ष्य कुठारेण तं दण्डं विभिद्य तं शावकं खण्डशोवकृत्य स्वयं विशीर्णशुष्कपर्णसमेधितेऽनले शूलाकृत्य जघसुः।

उत्तरम्—प्रसङ्गः—पञ्चमसिन्धुयात्रायाः प्रस्तावनां वर्णयति सिन्धुवादः हितवादं श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तपञ्चमसिन्धुयात्रायां।

व्याख्या—एवम् = पूर्वोक्तप्रकारेण, मया = सिन्धुवादेन, प्रत्यहम् = प्रतिदिनम्, उपभुज्यमानैः = संसेव्यमानैः, सुखैः = आनन्दैः, मां = सिन्धुवादं,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनरपि = भूयोऽपि, सिन्धुयात्रासाहसाङ्गीकारात् = समुद्रप्रवासोत्साहस्वीकारात्, निवारयितुं = वारयितुम्, अपर्याप्तैः = न्यूनैः, भूयः = पुनः विचलितहृदयः = चञ्चलमानसः, पञ्चमीं चतुर्थेतरां यात्रां = गमिम्, उद्दिश्य = अभिलक्ष्य, प्रस्थातुं = प्रस्थानं कर्तुं, सन्नद्धः = कटिबद्धः, अभवम् । भृतके = सशुल्के, पोते = प्रवहणे, अविश्वसन् = विश्वासं न कुर्वन्, स्वकीयेन = निजेन, व्ययेन = मूल्येन, अभिनवं = नूतनं, पोतं = यानं, निर्माप्य, सर्वोपकरणैः = सर्वसामग्रीभिः, परिकरितं = युतं तं = पोतं, सञ्चितवाणिज्योपयोगिवस्तुनिकरः = एकत्रीकृतव्यापारोपयुक्तपदार्थसमूहः, समारुह्य=आरुह्य, अन्यांश्च= इतरांश्च, वणिजः = व्यापारिणः, सपण्यजातान् = विक्रेयवस्तुसहितान्, अधिरोप्य = उपवेश्य, अनुकूले = कूलानुरूपे वहति = प्रचलति, वाते = पवने, प्रस्थितः = कृतप्रस्थानः कैश्चिद् = कतिपयैः दिनैः = दिवसैः, विजनम् = निर्जनम्, एकम् द्वीपम् = अन्तरीपं, प्रापम् = अगच्छम् । तत्र = द्वीपे, चैकम्, अतिविशालम् = महाप्रमाणम्, अण्डजाण्डं = पक्षिणोऽण्डम् चञ्चुपुटोद्घाटितमुखान्तरविनिर्गच्छन्नवशावकं = तुण्डयुगलोद्घाटितवदनमध्यनिर्गच्छन्नूतनशिशुम्, अपश्यम् = अवालोकयम् । मया = कथानायकेन, तत् = अण्डजाण्डं, स्प्रष्टुम् = स्पर्शकरणाय, निषिध्यमाना = प्रतिषिध्यमाना, अपि, मत्सहचराः = मन्मित्राणि, मद्वचनमुपेक्ष्य = मत्कथनमुपेक्ष्य, कुठारेण = यन्त्रविशेषेण तदण्डं = दृश्यमानमण्डम् विभिद्य = भेदयित्वा, तं = परिदृश्यमानं, शावकं = शिशुम्, खण्डशोऽवकृत्य = कर्तयित्वा स्वयम् = आत्मना, विशीर्णशुष्कपत्रसमेधिते = विकीर्णपर्णज्वलिते, अनले = वह्नौ, शूलाकृत्य = शूलेन वेधयित्वा, जघसुः = खादितवन्तः ।

समासः—सिन्धुयात्रासाहसाङ्गीकारात् = सिन्धोः यात्राः साहसस्य अङ्गीकारात्, विचलितहृदयः = विचलितं हृदयं यस्य सः, सर्वोपकरणैः = सर्वैं = उपकरणैः, सञ्चितवाणिज्योपयोगिवस्तुनिकरः = सञ्चितः वाणिज्यस्य उपयोगिनां वस्तूनां निकरः येन् सः, सपण्यजातान् = पण्यजातैः सहितान्, अण्डस्याण्डम् = अण्डजाण्डम्, चञ्चुपुटोद्घाटितमुखान्तरविनिर्गच्छन्नवशावकम् = चञ्चुपुटाभ्याम् उद्घाटितं यत् मुखं तस्यान्तरात् विनिर्गच्छन् नवः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शावकः यस्मात् तत्, विशीर्णशुष्कपत्रसमेधिते = विशीर्णानि यानि शुष्कानि पत्राणि तैः समेधिते।

कोषः—"पृथुकः शावकः शिशुः" इत्यमरः।

व्याकरणम्—वहति = वह् + शतृ + ङि।

२. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः।

अवसिताभ्यवहारेषु तेषु नभसि दूरादापतन्तौ तच्छावकपितरौ विलोक्य सम्भ्रमाकुलतां गतेषु पोताध्यक्षो विज्ञातैतच्छकुन्तानुभावस्तस्या विपदः समुद्धरणाय त्वरितं प्रवहणमारोढुं सर्वानन्ववाघ्नात्।

अथ तौ पक्षिणौ क्रेङ्कारै र्दुःश्रवै र्भग्नाण्डसन्दर्शनेन द्विगुणीकृतैः सकलमेव तं द्वीपमपूरयताम्, वैरनिर्यातनपरौ च क्षणाच्चञ्चुपुटविधृताभिर्विशालाभिः शिलाभिरभिवर्षन्तावस्मत् प्रवहणं खण्डशः कृत्वा तत्रस्थान् नाविकान् यात्रार्थिनश्च चूर्णीकृत्य जलधितलं प्रापयामासुः। अहं तु मग्नोऽपि पुनरुन्मग्नो दैवाद्भग्नप्रवहणस्यैकमपर्याप्तोपवेशनावकाशं फलकमेकेन बाहुनावलम्ब्य परेण सन्तरन्ननुकूलपवनेन कुत्राप्यग्रतस्युन्नततटे द्वीपे क्षिप्तः कथमपि तटमारुह्य समस्थलीमुपागमम्।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचिते सिन्धुवादवृत्ते पञ्चमसिन्धुयात्राप्रसङ्गे सिन्धुवादः हितवादं पोतभङ्गम् वर्णयति।

व्याख्याः—अवसिताभ्यवहारेषु = समाप्तभोजनकार्येषु, तेषु = यात्रिगणेषु, नभसि = आकाशे, दूरात् = विप्रकृष्टात्, आपतन्तौ = आगच्छन्तौ तच्छावकपितरौ = तच्छिशुप्रसूजनयितारौ, विलोक्य = दृष्ट्वा सम्भ्रमाकुलतां गतेषु = सम्भ्रमेण या आकुलता तां प्राप्तेषु, पोताध्यक्षः = प्रवहणचालकः, विज्ञातैतच्छकुन्तानुभावः = ज्ञातैतदण्डजाशयः, तस्याः = सम्भाव्यायाः, विपदः = आपत्तेः, समुद्धरणाय = सन्तरणाय, त्वरितं = शीघ्रं, प्रवहणम् = पोतम्, आरोढुम् = आगन्तुम् सर्वान्=यात्रिणः, अन्ववघ्नात् = प्रार्थयामास।

अथ = पश्चात्, तौ = समागतौ, पक्षिणौ = अण्डस्य मातापितरौ, क्रेङ्कारैः = क्रेंक्रेङ्कितध्वनिभिः, दुःश्रवैः = कर्णोद्वेजकैः, भग्नाण्डसन्दर्शनेन=

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विदीर्णाण्डावलोकनेन, द्विगुणीकृतैः, सकलमेव, निखिलमेव, तं = वर्तमानं, द्वीपम् = अन्तरीपम्, अपूरयताम् = पूरयतः स्म, वैरनिर्यातनपरो = रिपुनिर्यातनलीनौ, च, क्षणात् = पलेन, चञ्कुपुटविधृताभिः = तुण्डयुगलधृताभिः, विशालाभिः, शिलाभिः = पाषणखण्डैः, अभिवर्षन्तौ = वर्षन्तौः, अस्मत्प्रवहणम् = अस्मत्पोतम्, खण्डशः कृत्वा = विभिद्य, तत्रस्थान् = तद्देशवर्तमानान् नाविकान् = नौकर्णधारान्, यात्रार्थिनश्च = गमनसमुत्सुकांश्च, चूर्णीकृत्य = भेदयित्वा जलधितलं = सागरतलं, प्रापयामासतुः = संप्रेषयामासतुः । अहं = सिन्धुवादः, तु, मग्नोऽपि = मज्जितोऽपि पुनः = भूयः, उन्मग्नो = उन्मज्जितो, दैवाद् = भाग्यात् भग्नप्रवहणस्य = नष्टपोतस्य, एकम्, अपर्याप्तोपवेशनावकाशम् = परिमितोपवेशनस्थानम्, फलकं = पट्टिकाम् एकेन, बाहुना = भुजेन, अवलम्ब्य = आश्रित्य, परेण = अपरेण, सन्तरन् = प्रवहन् अनुकूलपवनेन = कूलानुकूलवायुना, कुत्रापि = अज्ञातस्थाने अत्युन्नततटे = अत्युच्चकूले, द्वीपे = अन्तरीपे, क्षिप्तः = प्रक्षिप्तः कथमपि = केनापि प्रकारेण, तटम् = कूलम्, आरुह्य समस्थलीम्—समतलभुवम्, उपागमम् = आगच्छम् ।

समासः—अवसिताभ्यवहारेषु = अवसितः अभ्यवहारः यैस्तेषु, तच्छावकपितरौ = माता च पिता च पितरौ, तस्य शावकस्य पितरौ, विज्ञातैतच्छकुन्तानुभावः = विज्ञातः एतयोः शकुन्तयोः अनुभावः येन सः ।

भग्नाण्डदर्शनेन = भग्नस्य अण्डस्य दर्शनेन, वैरनिर्यातनपरौ = वैरस्य निर्यातने परौ, चञ्चुपुटविधृताभिः = चञ्चुपुटैः गृहीताभिः जलधितलं = जलधेः तलं, भग्नप्रवहणस्य = भग्नस्य प्रवहणस्य, अपर्याप्तोपवेशनावकाशम् = अपर्याप्तः उपवेशनाय अवकाशः यत्र तत्, अनुकूलपवनेन = अनुकूलेन पवनेन, अत्युन्नततटे = अत्युन्नतेतटे ।

कोषः—'अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुंक्ते' इत्यमरः ।

व्याकरणम्—आपतन्तौ = आ + पत् + शत् + औ, समुद्धरणाय = सम् + उत् + दृ + ल्युट् + ङे ।

३. प्रश्नः—व्याख्येयोऽधोलिखितोंशः ।

तत्र च नवहरितशाद्वले क्षणं विश्रम्यायनीततरणश्रमः, समन्तात् सञ्च-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रन् पल्लवभरैः शलाटुभिः पक्वैश्च विपुलैः कलैरनेकवर्णसौन्दर्यहृदयैः प्रसूनैश्च नमितान् पादपवरान् सर्वतो विलोकयन् रमणीयाराममध्यगतमिवात्मानमवेदम्। तानि च पीयूषमधुराणि फलान्यास्वाद्य पीत्वा च प्रस्रवणाम्भो गतक्लमः सम्प्राप्तां निशीथिनीमेकाक्यस्थानभयपरवशतया विघ्नित प्रगाढनिद्रासुखो ऽन्तरान्तरा किञ्चित् स्वपन् भूयो जाग्रदात्मनो भागधेयमेतद्यात्राचापलञ्च विनिन्दन् कथञ्चिदयापयम्। उदिते भगवति गभस्तिमालिनि प्रकाशितासु काष्ठासु प्राभातिकवातप्रासादितचेता इव इतस्ततो व्यचरम्।

विचरंश्च स्थूलकायं परिणतवयसं स्रोतसः एकस्य तटे समुपासीनम् पुरुषमेकमद्राक्षम्। तं चात्मानमिव हतभाग्यं प्रवहणभङ्गविपदि पतितमाकलयन्मुपसृत्य प्राणमम् तत्रावस्थितिकारणमप्यपृच्छम्। स तु किमप्यभाणमाणः फलावचिचीषयात्मानं स्कन्धयोर्निधाय स्रोतस्तरीतुम् समकेतयत्।

उत्तरम्—प्रसङ्गः—प्रवहणभङ्गानन्तरं द्वीपान्तरं प्राप्तः सिन्धुवादः हितवादं तत्रत्यदशां वर्णयति श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तपञ्चमसिन्धुयात्राप्रसङ्गे।

व्याख्या—तत्र = समस्थले, च, नवहरितशाद्वले = नूतनघासहरिते, क्षणं = पलमात्रम्, विश्रम्य = विश्रामं कृत्वा, अपनीततरणश्रमः = दूरीकृतसंतरणखेदः, समन्तात् = परितः, सञ्चरन् = चलन्, पल्लवभरैः = किसलयसमूहैः, शलाटुभिः = अपरिपक्वाग्रैः, पक्वैः = परिपक्वैः, विपुलैः = प्रचुरैः, कलैः = सुन्दरैः अनेकवर्णसौन्दर्यहृतहृदयैः = विविधरङ्गलावण्याकृष्टहृदयैः, प्रसूनैः = पुष्पैः नमितान् = अधोवलम्बितान् पादपवरान् = वृक्षान्, सर्वतः = परितः, विलोकयन् = पश्यन्, रमणीयाराममध्यगतमिव = सुन्दरोद्यानमध्यगतमिव, आत्मानम् = स्वम्, अवेदम् = अवागच्छम्। तानि = पूर्ववर्णितानि, च, पीयूषमधुराणि = अमृतस्वादूनि, फलानि, आस्वाद्य = भुक्त्वा, पीत्वा = निपीय च, प्रस्रवणाम्भो = निर्झरजलम्,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गतक्लमः = समाप्तव्यथः, सम्प्राप्तां = समागतां निशीथिनीम् = निशाम् एकाक्यवस्थानभयपरवशतया = अद्वितीयवासभीतिपराधीनतया, विघ्नितप्रगाढनिद्रासुखः = वाधितशान्तशयनसुखः अन्तरान्तरा = मध्ये मध्ये किञ्चित् = स्तोकम्, स्वपन् = शयानः, भूयः = पुनः, जागृद् = जागरणं कुर्वन्, आत्मनः = स्वस्य, भागधेयम् = भाग्यम्, एतत्यात्राचापलं = वर्तमानप्रवासचाञ्चल्यं, च, विनिन्दन् गर्हयन्, कथञ्चिदयापयम्, = अक्षपयम् । उदिते = गगनाङ्गणे दृष्टे, भगवति = ऐश्वर्यशालिनि गभतिमालिनि = सहस्ररश्मौ, प्रकाशितासु = स्पष्टमवलोक्यमानासु, काष्ठासु = दिशासु, प्राभातिकवातप्रसादितचेताः = प्रातःकालिकपवनहर्षित हृदयः, इव = यथा, इतस्ततो = यत्र तत्र व्यचरम् = अभ्रमम् ।

विचरंश्च = परिभ्रमंश्च, स्थूलकायं = विशालशरीरं, परिणतवयसं = गतावस्थं, स्रोतसः = निर्झरस्य एकस्य, तटे = कूले, समुपासीनम् = स्थितम्, पुरुषम् = जनम्, एकम् = अद्वितीयं, अद्राक्षम् = अपश्यम् । तं = दृष्टजनं, च, आत्मानमिव = स्वमिव, हतभाग्यं = भाग्यहीनम्, प्रवहणभङ्गविपदि = पोतभङ्गापदि, पतितम् = निपतितम्, आकलयन् = अवधारयन्, उपसृत्य = गत्वा, प्राणमम् = प्रणाममकरवम् तत्रावस्थितिकारणम् = तत्रावासहेतुम् अपि, अपृच्छम् । सः = दृष्टजनः, तु, किमपि = किञ्चिदपि, अभाषमाणः = अवदन्, फलावचिचीषया = फलावचयनेच्छया, आत्मानं = स्वं, स्कन्धयोः = अंशयोः निधाय = स्थायग्त्विा स्रोतस्तरीतुम् = निर्झरधारगमनाय, समकेतयत् = सङ्केतमदात् ।

समासः—नवहरितशाद्वले = नवानि हरितानि शाद्वलानि यत्र तत्र, अपनीततरणश्रमः = अपनीतः तरणस्य श्रमः येन सः, पल्लवभरैः पल्लवानां भरैः, अनेकवर्णसौन्दर्यहृतहृदयैः = अनेकेषां वर्णानां सौन्दर्येण हृतं हृदयं यैस्पैः । रमणीयाराममध्यगतम् = रमणीयस्य आरामस्य मध्ये गतं, पीयूषमधुराणि = पीयूषवत् मधुराणि, प्रस्रवणाम्भः = प्रस्रवणस्य अम्भिः, गतक्लमः = गतं क्लमं यस्य सः एकाक्यवस्थानभयपरवशतया = एकाक्यवस्थानस्य भयेन या परवशता तया, विघ्नितप्रगाढनिद्रासुखः=विघ्नितं प्रगाढ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निद्रायाः सुखं यस्य सः, एतद्यात्राचापलम् = एतस्याः यात्रायाः चापलं, प्राभातिकवातप्रासादितचेता = प्राभातिकेन वातेन प्रासादितं चेतः यस्य सः।

स्थूलकायं = स्थूलः कायः यस्य तं, परिणतवयसं = परिणतं वयः यस्य तं, प्रवहणभङ्गविपदि = प्रवहणस्य भङ्गः = तत्र या विपत्, तस्यां तत्रावस्थितिकारणम् = तत्र अवस्थितेः कारणम्, फलावचिचीषया = फलानाम् अवचिचीषा तया।

कोषः—'दिशस्तु ककुभः काष्ठाः 'आरामः स्यादुवपम्' इत्युभयत्राप्यमरः।

व्याकरणम्—प्राभातिकः = प्रभात + ठञ्। चिचीषा चि + सन्।

४. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अहन्तु तं स्थविरम् गमनाक्षमतया मत्साहाय्यार्थिनमवगत्य दयापरवशः स्कन्धयोः प्रतिष्ठाप्य तस्य स्रोतसः परं तीरमुपासदम्। अथावरुद्धनिजगतिना मयाऽवरोढुमीरितः स समुपेक्ष्य मदभिप्रायं जानुभ्यां मद्गलमवष्टभ्य दृढतरनिबद्धासनः समुपाविशत्। एवं तेनोद्बध्यमानगलो भारभुग्नः पादाभ्यामार्षभाजिनकर्कशचर्मावृताभ्यां पार्श्वयोरुदरे च प्रणुद्यमानः कैश्चित्क्षणैर्मूर्च्छितप्रायोऽभवम्।

एवमप्यविचलासनः सः मध्ये मध्ये केवलं श्वसितुं दत्तावकाशः पादबन्धनं किञ्चित्शिथिलयन् भूयो भूयो नोदयन् पशुमिव चलितुं मां बलात् प्रैरयत्। आदिनान्तमेवं प्रतुद्य सम्प्राप्तायां रात्रौ विश्रमितुकामेन मया तथैव निष्पीड्यमानगलेन सहास्वपत्। प्रभातायां च तस्यां मां पादाघातै विबोध्य भूयः परिभ्रमयन्नविश्रमं निष्पीडितगलो ऽत्यर्थमदुनोत्।

उत्तरम्—प्रसङ्गः—स्थविरकृतां कृतघ्नतां वर्णयत्यत्र सिन्धुवादः हितवादं श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तपञ्चमसिन्धुयात्रायाम्।

व्याख्या—अहं = सिन्धुवादः, तु, स्थविरं = वृद्धं, गमनाक्षमतया = चलनाक्षमतया, मत्साहाय्यार्थिनम् = मत्सहायतायाचकम्, अवगत्य = ज्ञात्वा, दयापरवशः = कृपाकलितः, स्कन्धयोः = अंशयोः प्रतिष्ठाप्य = समा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रोप्य, तस्य = पुरो वर्तमानस्य, स्रोतसः = निर्झरस्य, परं = द्वितीयं, तीरम् = तटम् उपासदम् = प्रापम् । अथ = अनन्तरमवरुद्धनिजगतिना = नियमितस्वचलनेन, मया = सिन्धुवादेन, अवरोढुमीरितः = अवतरणाय नोदितः, सः स्थविरः, समुपेक्ष्य = उपेक्षां कृत्वा मदभिप्रायं = मत्तात्पर्यं, जानुभ्याम् मद्गलं = मत्कण्ठम् अवष्टभ्य = अवरुध्य, दृढतरनिबद्धासनः = कठिनतरविन्यस्तासनः समुपाविशत् = अतिष्ठत् । एवं = पूर्वोक्तप्रकारेण, तेन = स्थविरेण, उद्वुध्यमानगलो = निगडित कण्ठः, भारभुग्नः = स्थविर-भरावनम्रः, पादाभ्याम् = चरणाभ्याम् , आर्षभाजिनकर्कशचर्मावृत्ता-भ्याम् = वृषभचर्मकठिनोपानद्वृताभ्याम् , पार्श्वयोः = प्रान्तयोः उदरे = जठरे, प्रणुद्यमानः = प्रेर्यमाणः, कैश्चित् = कतिपयैः, क्षणैः = कालैः, मूर्च्छितप्रायो = प्रायेण मूर्च्छितः, अभवम = जातम् ।

एवम् = पूर्वोक्तप्रकारम् अपि, अविचलासनः = निश्चलासनः, मध्ये, केवलं, श्वसितम् उच्छ्वसितुं, दत्तावकाशः = प्रदत्तावसरः पादबन्धनं = चरणनियमनं, किञ्चित् = स्तोकं, शिथिलयन् = शिथिलं कुर्वन, भूयो भूयः = पुनः पुनः, नोदयन् = प्रेरयन्, पशुमिवं = चपुष्पदमिव, चलितुं = गन्तुं, मां = सिन्धुवादम् , बलात् = हठात् प्रैरयत् = नोदयति स्म । आदि-नान्तं = यावद्दिनम् एवं = पूर्वोक्तप्रकारं, प्रतुद्य = प्रणुद्य, सम्प्राप्तायां = समागतायां, रात्रौ = निशीथिन्यां विश्रामितुकामेन = विश्रामेच्छुना, मया = सिन्धुवादेन, तथैव = पूर्ववर्णितवदेव, निष्पीड्यमानगलेन = निगडित-कण्ठेन, सह = साकम् , अस्वपत् = शेते स्म । प्रभातायां = प्रातःरूपेण परिणतायां च, तस्या = निशायां मां = सिधुवादम् पादाघातैः = चरणाहतैः विबोध्य = बोधयित्वा, भूयः = पुनः, परिभ्रमयन् = भ्रमयन्, अविश्रमं = विश्रामरहितं, निष्पीड़ितगलो = निगडितकण्ठः, अत्यर्थं = बहु, अदुनोत = अतूतुदत् ।

समासः—गमनाक्षमता = गमने अक्षमतया, मत्साहाय्यार्थिनं = मम साहाय्यस्य अर्थिनं, दयापरवशः = दयया परवशः, अवरुद्धनिजगतिना = अवरुद्धा निजा गति यस्य तेन, मद्गलम् = मम गलम् , दृढतरनिब-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्धासनः = दृढतरं निबद्धम् आसनं, येन सः उद्वध्यमानगलः = उद्वध्यमानः गलः = यस्य सः, भारभुग्नः = भारेण भुग्नः, आर्षभाजिनकर्कशचर्मावृताभ्यां = आर्षभम् यदजिनं तस्य कर्कशचर्मावृताभ्याम् ।

अविचलासनः = अविचलम् आसनं यस्य सः, दत्तावकाशः = दत्तः अवकाशः येन सः, पादबन्धनं = पादयोः बन्धनं विश्रमितुकामेन = विश्रमितुं कामः यस्य तेन, निष्पीड्यमानगलेन = निष्पीड्यमानः गलः यस्य तेन, पादाघातैः पादस्य पादयोर्वा आघातैः, निष्पीडितगलः = निष्पीडितः गलः येन सः ।

कोषः—'अजिनं चर्म कृत्तिः स्त्री', 'ऋषभो वृषभो वृषः' 'जठरोदरं तुन्दम् इत्यमरः ।

व्याकरणम्—श्वसितुं = श्वस् + तुमुन्, नोदयन् = नोदि + शतृ ।

५. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

एकस्मिन्नहनि भूमौ पतिताः काश्चित्तुम्बीरवलोक्य तास्वायततमामेकां गृहीत्वा, संशोध्य तत्र प्रचुरोद्भवान् द्राक्षास्तवकानवचित्य निस्पीड्य तद्रसेन तां सम्पूर्यैकत्र प्रदेशेऽवस्थाप्य कैश्चिद्दिनैरासवतां गतं तद्रसं किञ्चिद् आस्वाद्य, विस्मृतात्मदशो गायन्नृत्यश्च प्रचलन् विलोकितमदवस्थापरिवर्तनेन तेन जरता सम्प्रार्थितस्तस्मै तां द्राक्षासवसम्भृतां तुम्बीं प्रायच्छम् तन्माधुर्यहृतहृदयोऽसौ सयग्रं तमासवं पीत्वा सञ्जातोन्माद इव मया सह गायन् स्वमसकृदान्दोलयन् शिथिलीकृतमद्गलबन्धनो मयाशिथिलं तरसा क्षिप्तसतत्क्षणं विगतासुरपतत् ।

इत्थं तस्मात् स्थविरसङ्कटात् मुक्तः सानन्दोऽहं सिन्धुतीरमागत्य कांश्चित् पेयमधुरजलसज्जिघृक्षया सन्निरुद्धपोतान् जनानुपगम्य मत्तः श्रुताखिलवृत्तान्तैस्तैरुक्तः—'वहवो जना स्तत्स्थविरोद्बन्धनयातनयाऽत्र मृताः दिष्ट्यया त्वं तद्वशतां गतोऽपि विमुक्तोऽसि । सर्वे हि पोतवाहाः वणिजश्चेहागमनं परिहरन्ति' इति ।

उत्तरम्—प्रसङ्गः श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्त

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चमसिन्धुयात्राप्रसङ्गे सिन्धुवादः हितवादं वर्णयति स्थविरसङ्कटनिवृत्तिप्रकारम् ।

व्याख्या—एकस्मिन्, अहनि = दिने भूमौ = धरायां, पतिताः = निपतिता, काश्चित् = कतिपयाः तुम्बीः, अवलोक्य = दृष्ट्वा, तासु = तुम्बीषु, आयततमां = दीर्घतमाम् एकां, गृहीत्वा = समादाय, संशोध्य = स्वच्छीकृत्य तत्र = तस्मिन् प्रदेशे, प्रचुरोद् भवान्=अधिकतया उत्पन्नान् द्राक्षास्तवकान्= मृद्वीकागुच्छान्, अवचित्य = सङ्कलय्य, निष्पीड्य, तद्रसेन = द्राक्षास्वरसेन तां = तुम्बं, सम्पूर्य = पूरयित्वा, एकत्र=एकस्मिन् स्थाने, अवस्थाप्य= संस्थाप्य कश्चिद् = कतिपयैः, दिनै = दिवसै, आसवतां = वारुणीस्वरुपतां, गतं = प्राप्तं, तद्रसम् = द्राक्षास्वरसं किञ्चिद्, आस्वाद्य = पीत्वा, विस्मृतात्मदशो = विस्मृतस्वावस्थः, गायन् = गानं कुर्वन्, नृत्यंश्च = नर्तनं कुर्वन्, च, प्रचलन् = गच्छन्, विलोकितमदवस्थापरिवर्तनेन = दृष्टमद्दशापरिवर्तनेन, तेन = मम प्राणभयमुत्पाडितवता, जाता = वृद्धेन सम्प्रार्थितः = याचितः, तस्मै = मन्मारणोत्काय, तांपूर्ववर्णितां, द्राक्षासवसम्मृतां = मृद्वीकस्वरसभृतां तुम्वीं, प्रायच्छम् = अददाम् । तन्माधुर्यहृतहृदयः मदिरामधुरताकृष्टचेताः, असौ = मन्मारको वृद्धः समग्रं = सकलं तमासवं = स्वासं मधुरुपं, पीत्वा = निपीय, सञ्जातोन्माद इव = उत्पन्नोन्माद इव मया = सिन्धुवादेन, सह = साकं गायन् = गानं कुर्वन् स्वम् = आत्मानम्, असकृदान्दोलयन् = वारं वारं कम्पयन् । शिथिलीकृतमद्गलबन्धनो स्वल्पीकृतमत्कण्ठबन्धनो, मया = सिन्धुवादेन, अधिशिलं = पाषाणोपरि, तरसा = वेगेन क्षिप्तः = प्रक्षिप्तः, तत्क्षणं = सद्यः, विगतासुः = प्राणरहितः, अपतत् = पपात ।

इत्थम् = पूर्वोक्तप्रकारेण, तस्मात् = प्राप्तात्, स्थविरसङ्कटात् = वृद्धजनितापत्तिसमूहात् मुक्तः = बन्धनरहितः, सानन्दः = सहर्षः, अहं = सिन्धुवादः, सिन्धुतीरम् = सागरतटम्, आगत्य = सम्प्राप्य कांश्चित् = कतिपयान्, पेयमधुरजलसञ्जिघृक्षया = आस्वाद्यमिष्ट जलसंग्रहेच्छया सनिरुद्धपोतान् = तटावरुद्धजलयानान्, जनान् = नरान्, उपगम्य = गत्वा, मत्तः =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिन्धुवादात्श्रुताखिलवृत्तान्तै = ज्ञातसकलकथैः = तैः = पोतयात्रिमिः, उक्तः = कथितः, बहवो = अनेके जनाः = नराः तत्स्थविरोद्बन्धनयातनया = तद्वृद्धनियमनकष्टेन, अत्र = प्रदेशेऽस्मिन्, मृताः = पञ्चत्वं गता, दिष्ट्या = भाग्येन, त्वं = सिन्धुवादः, तद्वशतां = तदधीनतां गतोऽपि = प्राप्तोऽपि, विमुक्तः = बन्धनरहितः, असि = जातः। सर्वे = सकला, हि, पोतवाहा = जलयानयात्रिणः वणिजः = व्यापारिणः च, इहागमनम् = अत्र। समागमनं परिहरन्ति = परित्यजन्ति इति।

समासः—प्रचुरोद्भवान् = प्रचुरेण उद्भवान्, द्राक्षास्तवकान् = द्राक्षाया स्तवकान् विस्मृतात्मदशः = विस्मृता आत्मनो दशा येन सः विलोकितमदवस्थापरिवर्तनेन = विलोकितं मम अवस्थायां परिवर्ततं येन तेन, द्राक्षासवसम्भृतां = द्राक्षायाः आसवेन सम्भृतां तन्माधुर्यहृतहृदयः = तस्याः माधुर्येण हृतं हृदयं यस्य सः, शिथिलीकृतमद्गलबन्धनो = शिथिलीकृतः मम गलस्य बन्धनम् येन सः।

स्थविरसङ्कटात् = स्थविरस्य सङ्कटात्, सानन्दः = आनन्देन सहितः, पेयमधुरजल सञ्जिघृक्षया = पेयस्य मधुरस्य जलस्य सञ्जिघृक्षया, सन्निरुद्धपोतान् = सन्निरुद्धः पोतः यैः तान्, श्रुताखिलवृत्तान्तैः = श्रुतः अखिलः वृत्तान्तः यैः स्तैः स्थविरोद्बन्धनयातनया = स्थविरस्य उद्बन्धनस्य यातनया, पोतवाहाः = पोतानां वाहाः।

कोषः—मृद्वीका गोस्तनी द्राक्षा इत्यमरः।

व्याकरणम्—गृहीत्वा = ग्रह + क्त्वा, प्रचलन् = प्र + चल् + शतृ, निष्पीड्य = निः + पीड् + क्त्वा + ल्यप्।

६. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

एवमुक्त्वा ते मां स्वपोतमनैषुः। पोताध्यक्षेण चाकर्णितमदुदन्तेन सादरं स्वागतीकृतोऽहं ततः, प्रस्थितः समुद्रतीरस्थं किञ्चिन्महत्पत्तनं प्रस्तरमयगृहावलीसङ्कुलं सम्प्राप्नवं।

पोतस्थितेषु च मयि बद्धप्रणयः कश्चित् सार्थवाहो मां वैदेशिकवणिग्जनशिविरं नीत्वा दत्वा चैकां गोणीं तादृशगोणीधारिणः कांश्चिज्जनानुपदर्श्या-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वदत्—अनुसरैतान् । अनुकुरु चैतत्कृतिम् । नो जातु सङ्गमेषांत्यज अन्यथा विपदि पतिष्यसि इति ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रि रचितसिन्धुवादवृत्तपञ्चमसिन्धुयात्रायां सिन्धुवादः हितवादं कथयति निर्जनप्रदेशात् प्रदेशान्तरं गमनं ।

व्याख्या—एवम् = पूर्वोक्तम्, उक्त्वा = कथयित्वा, ते = वणिजः, मां = सिन्धुवादं, स्वपोतम् = निजजलयानम्, अनैषुः = नीतवन्तः । पोताध्यक्षेण = जलयानचालकेन, च, आकर्णितमदुदन्तेन = श्रुतमत्कथेन, सादरं = सप्रश्रयं, स्वागतीकृतः = अभिनन्दितः, अहं = सिन्धुवादः, ततः = निर्जनात् प्रदेशात् प्रस्थितः कृतप्रस्थानः, समुद्रतीरस्थं = सागरतटस्थं, किञ्चिन्, महत्पत्तनं = महानगरं, प्रस्तरमयगृहावलीसङ्कुलं = पाषाणरचितभवनपङ्क्तिव्याप्तम्, सम्प्राप्नवम् = अगच्छम् ।

पोतस्थितेषु = जलयानस्थेषु, च, मयि = सिन्धुवादे, सविशेषं = विशेषतः, वद्धप्रणयः = दृढस्नेहः कश्चित्, सार्थवाहो = सागरयात्री, मां = सिन्धुवादं, वैदेशिकवणिग्जनशिविरं = परराष्ट्रजव्यापारिजनावासं नीत्वा = समानीय, दत्वा = अर्पयित्वा, चैकां, महतीं = दीर्घां गोणीं = शाणीं, तादृशगोणीधारिणः = तद्वत्गोणीधरान्, कांश्चिन् = कतिपयान्, जनान् = नरान् उपदर्श्य = दर्शयित्वा अवदत् = अकथयत्—अनुसर = अनुगच्छ, एतान् = निर्दिष्टान् । अनुकुरु = अनुकरणं कुरु च, एतत्कृतिम् = एतद्रचनाम् । नो जातु = अन्यथा तु सङ्गमेषं = साहचर्यमेषां त्यज = परिहर । अन्यथा, विपदि = आपत्तौ पतिष्यसिग = मिष्यसि' इति ।

समासः—पोताध्यक्षेण = पोतस्य अध्यक्षेण, आकर्णितमदुदन्तेन = आकर्णितः मम उदन्तः येन तेन, समुद्रतीरस्थ=समुद्रस्य तीरस्थं, प्रस्तरमयगृहावलीसङ्कुलं = प्रस्तरमयाणां गृहाणाम् अवलीभिः सङ्कुलं । पोतस्थितेषु = पोते स्थितेषु वद्धप्रणयः = बद्धःप्रणयः येन सः, वैदेशिकवणिग्जनशिविरं = वैदेशिकानां वणिग्जनानां शिविरं, तादृशगोणीधारिणः = तादृशीः गोणीः धारयन्तीति तान् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'वृत्तान्तः उदन्तः स्यात्' 'पुरी नगर्यौं वा पत्तनम्' इत्युभयत्राप्यमरः ।

व्याकरणम्—उपदर्श्य = उप् + दृश् + क्त्वा + ल्यप् , नीत्वा = नी + क्त्वा ।

७. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

अथ वयमभ्रङ्कषैरतिश्लक्षणतया दुरारोहस्कन्धैः फलसम्भृतैः नारिकेलतरुभिः पूरितं काननमेकं समासीदाम । स्वाश्च गोणीस्तैं नारिकेलफलैः पूरयितुकामा बहून् प्लवङ्गमान् नानाप्रमाणानस्मदवलोकनसम्भ्रमेण चपलतया द्रुतं विद्रुत्य वृक्षाग्राणि समारुढान् व्यलोकयाम्, सहचराननुकुर्वन्नहं तत्रस्थेषु तेषु प्रस्तरखण्डान् सङ्गृह्य समक्षिपम् । ते तु कपयः किलकिलाशब्दैश्चिमैश्चेङ्गितविशेषैः स्वक्रोधमाविष्कुर्वन्तः प्रत्याजिघांसया नारिकेलफलानि अस्मान् लक्ष्यीकृत्य प्राक्षिपन् । अनया च प्रक्रियया प्रकारान्तरेण सुदुर्लभै नारिकेलफलैः स्वा गोणीः सम्पूर्य पत्तनमुपेत्य तद्विक्रयेण बहुधनमुपार्जयम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तपञ्चमसिन्धुयात्रातः गृहीतेऽस्मिन् गद्यभागे नारिकेलफलव्यापारमात्मनः वर्णयति सिन्धुवादः हितवादम् ।

व्याख्या—अथ = पश्चात्, वयम् = वणिजः, अभ्रङ्कषैः = गगनचुम्बिभिः अतिश्लक्षणतया = अतिचिक्कणतया दुरारोहस्कन्धैः = दुरारोहशाखैः, फलसम्भृतैः = फलभृतैः, नारिकेलतरुभिः = नारिकेलवृक्षैः, पूरितं = भरितैः, काननम् = वनम्, एकम्, समासीदाम = समागच्छाम् । स्वाश्च = निजाश्च, गोणीः = धान्याधारवस्त्रविशेषान्, तैं = पूर्ववर्णितैः, नारिकेलफलैः = एतन्नामकवृक्षफलैः, पूरयितुकामा = पूरणेच्छवः बहून् = प्रचुरान्, प्लवङ्गमान् = वानरान्, नानाप्रमाणान् = अनेकाकृतीन्, अस्मदवलोकनसम्भ्रमेण = अस्मद्दर्शनत्रासेन, चपलतया = चञ्चलतया, द्रुतं = शीघ्रं, विद्रुत्य = उत्प्लुत्य, वृक्षाग्राणि = तरुशिखराणि, समारुढान् = कृतारोहणान्, व्यलोकयाम् =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अपश्याम् । सहचरान् = सहागतान्, अनुकुर्वन् = अनुसरन्, अहं = सिन्धुवादः, तत्रस्थेषु = वृक्षाग्रस्थेषु, तेषु = वानरेषु प्रस्तरखण्डान् = पाषाण- कपयः = शकलान्, सङ्गृह्य = एकत्रीकृत्य, समक्षिपम् = प्राक्षिपम् । ते = वृक्षस्थाः तु, वानराः किलकिलाशब्दैः किलकिलध्वनिभिः, चित्रैः विचित्रैः, च ईङ्गित-विशेषैः = सङ्केतविशेषैः, स्वक्रोधम् = निजकोपम्, आविष्कुर्वन्तः = प्रकट-यन्तः, प्रत्याजिघांसया = प्रतिमारणेच्छया, नारिकेलफलान् = एतद्वृक्ष-विशेषफलान्, अस्मान् = प्रस्तर प्रक्षेपकान्, लक्ष्यीकृत्य = अभिलक्ष्य, प्राक्षिपन् = चिक्षिपुः । अनया = पूर्ववर्णितया, च, प्रक्रियया = प्रकारेण, प्रकारान्तरेण = उपायान्तरेण, सुदुर्लभैः = अप्राप्यैः नारिकेलफलैः, स्वाः = आत्मीयाः, गोणीः, सम्पूर्य = पूरयित्वा, पत्तनम् = नगरम्, उपेत्य = सम्प्राप्य, तद्विक्रयेण = तद्विनिमयेन, बहुधनम् = द्रव्यम् उपार्जयम् = समपादयम् ।

समासः—दुरारोहस्कन्धैः = दुरारोह्यः स्कन्धाः येषां तैः फलसम्भृतैः = फलैः सम्भृतैः, नारिकेलतरुभिः = नारिकेलानां तरुभिः, अस्मदवलोकन-सन्भ्रमेण = अस्माकम् अवलोकनेन यः सम्भ्रमः तेन, प्रस्तरखण्डान् = प्रस्तराणां खण्डान्, किलकिलाशब्दैः = किलकिल इत्याकारकैः शब्दैः, इङ्गितविशेषैः = इङ्गितानां विशेषैः, प्रकारान्तरेण = अन्यः प्रकारः = प्रकारान्तरं, तेन ।

कोषः—'गहनम् काननम् वनम्' इत्यमरः ।

व्याकरणम्—सङ्गृह्य = सम् + ग्रह + क्त्वा + ल्यप् ।

८. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

सङ्गृह्णीतबहुनारिकेलैः तै र्वणिग्जनैः सह प्रवहणेन ततः सम्प्रस्थितोऽध्वनि केषुचिद् द्वीपेषु सिन्धुतले निमज्य मौक्तिकभृता अनल्पाः शुक्तीरानीय विक्रीणानेभ्यो वणिग्भ्यस्ताः क्रीत्वा विक्रीय च महता मूल्येन संवर्धितनिजविभवः सकुशलं वासरपुरं ततश्च विदामपुरं प्रत्यावर्तिषि । आगत्य च गृहं मल्लाभस्य दशममंशं धर्मकर्मसु विनियुज्य महता विभवेन सह ससुखं समयमयापपयम् !

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवमुक्त्वा सिन्धुवादो हितवादाय विश्राणितदीनारशतोऽतिथिभिः समं गृहं प्रास्थापयत्

परस्मिंश्च दिने सम्प्राप्तेषु तेषु पूर्ववद् भुक्तवत्सु सावधानं श्रृण्वत्सु स्वां षष्ठीं सिन्धुयात्रां वर्णयितुमित्थमारभत् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्त पञ्चमीसिन्धुयात्रामुपसंहरति सिन्धुवादः हितवादम् ।

व्याख्या—सङ्गृहीतबहुनारिकेलैः = ऐकत्रीकृतप्रचुरनारिकेलैः, तैः = सहचरैः वणिग्जनैः = व्यापारिभिः, सह = साकं प्रवहणेन = जलयानेन, ततः तस्मात् प्रदेशात्, सम्प्रस्थितः = चलितः, अध्वनि = मार्गे, केषुचिद् = अज्ञातेषु, द्वीपेषु = अन्तरीपेषु, सिन्धुतले = सागरतले, निमज्य = मज्जनं कृत्वा मौक्तिकभृताः = मुक्ताभरिताः, अनल्पाः = बह्व्यः शुक्तीः, आनीय = नीत्वा, विक्रीणानेभ्यो = विक्रयरतेभ्यः = वणिग्भ्यः = व्यापारनिरतेभ्यः, ताः = शुक्तीः, क्रीत्वा = क्रयं कृत्वा, विक्रीय = विक्रयं विधाय, च महता = दीर्घेण मूल्येन = द्रव्येण, संवर्धितनिजविभवः = वर्धितस्वसम्पत्तिः, सकुशलं = सक्षेमम्, वासरपुरं=यात्राप्रारम्भनगरं, ततः = वासरपुरात्, च, विदामपुरं= निजावासस्थानं प्रत्यावर्तिषि = प्रत्यावर्तनमकरवम् । आगत्य = समागत्य च, गृहं = गेहं, मल्लाभस्य = मदीयार्जितधनस्य, दशममश = दशमांशं, धर्म कर्मसु = धार्मिककृत्येषु, विनियुज्य = व्ययं कृत्वा, महता, विभवेन = धनेन, सह = साकं, ससुखं = सानन्दं, समयं = कालम् = अक्षपयम् ।

एवम् = पूर्वोक्तप्रकारेण, उक्त्वा = कथयित्वा सिन्धुवादो = नायकः कथायाः वक्ता च, हितवादाय = कथाश्रवणनिताय, विश्राणितदीनारशतः = दत्तदीनारशतः, अतिथिभिः = अभ्यागतैः समं = साकं, गृहं = गेहं, प्रास्थापयत् = प्रेषयामास ।

परस्मिश्च = द्वितीये च दिने = दिवसे, सम्प्राप्तेषु = समागतेषु । तेषु = निमन्त्रितेषु । पूर्ववत्, भुक्तवत्सु = कृतभोजनेषु, सावधानं = ध्यानपूर्वकं श्रृण्वत्सु = श्रवणरतेषु, सः = सिन्धुवादः, स्वां = निजां षष्ठीं, सिन्धुयात्रां =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सागरगमनं वर्णयितुं = वक्तुम्, इत्थं = वक्ष्यमाणप्रकारेण, आरभत् = प्रारभत् ।

समासः = सङ्गृहीतबहुनारिकेलैः = सङ्गृहीतानि बहूनि नारिकेलानि यैस्तैः, सिन्धुतले = सिन्धोः तले मैक्तिकभृताः = मौक्तिकैः भृताः संवर्धितनिजविभवः संवर्धितः निजः विभवः येन सः, धर्मकर्मसु = धर्मस्य कर्मसु । विश्राणितदीनारशतः = विश्राणितं दीनाराणां शतं येन सः ।

कोष = 'मुक्तास्फोटः स्त्रियां शुक्तिः' इत्यमरः ।

व्याकरणम्—विनियुज्य = वि + नि + युज् + क्त्वा + ल्यप् ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।
सिन्धुवादस्य वृत्तेऽस्मिन् यात्रावै पञ्चमी गता ॥५॥

षष्ठी सिन्धुयात्रा

१. प्रश्नः—व्याख्येयोऽधोलिखितो गद्यभागः ।

वर्षमात्रं सुखोपभोगे प्रयाप्य भूयोऽपि दुर्दैवेन प्रेरितः साश्रुलोचनै र्वान्धवै र्निषिध्यमानोऽपि षष्ठीं यात्रामुद्दिश्य गृहान्निरगाम् । प्रवहणाधिरुढान् कञ्चनकालं सुखेन प्रचलतोऽस्मानेकदाऽकस्मात् पोताध्यक्षः सम्भ्रान्तः क्षिप्तशिरस्त्राणः उल्लुञ्चितश्मश्रुः सन्ताडितशीर्षः आर्तनादै र्दिशः पूरयन्नस्माभिस्तत्कारणं पृष्टो दीर्घं निःश्वस्यावोचत्—हन्त ! हताः स्मः । (सम्पू० सं० वि० वि० ८४)

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मण शास्त्रिरचितात् सिन्धुवादवृत्तात् षष्ठसिन्धुयात्राऽऽमुखात् गृहीतोऽयमंशः । सिन्धुवादो हितवादं षष्ठीं यात्रां वर्णयति ।

व्याख्या—वर्षमात्रं = द्वादशमासमात्रं, सुखोपभोगे = विषयानन्दे, प्रयाप्य = व्यतिपात्य, भूयोऽपि = पुनरपि, दुर्दैवेन = दुर्भाग्येन, प्रेरितः साश्रुलोचनैः = साम्बुनेत्रैः, बान्धवै = दायाद्वैः = निषिध्यमान=प्रतिणिध्यमानोऽपि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षष्ठीं यात्रां = प्रवासम् उद्दिश्य = अभिलक्ष्य, गृहात् = गेहात्, निरगाम् निरगच्छम् । प्रवहणाधिरूढान् = पोतारूढान्, कञ्चन = स्तोकं, कालं = समयं सुखेन = शर्मणा, प्रचलतो = गच्छतोऽस्मान् = यात्रिणः, एकदा = एकस्मिन् समये, अकस्मात् = सहसा, पोताध्यक्षः = यान चालकः, सम्भ्रान्तः = विक्षिप्तः, क्षिप्तशिरस्त्राणः = प्रक्षिप्तमस्तक रक्षकः उल्लुञ्चितस्मश्रु, = उत्पाटित स्मश्रुकः सन्ताडितशीर्षः = ताडितमस्तकः, आर्तनादैः = दुःखस्वरैः, दिशः = आशाः पूरयन् = आप्नुवन्, अस्माभिः = वणिजैः तत्कारणं = शिरस्ताडादिकारणम्, पृष्टः = जिज्ञासितः, दीर्घं = उच्चैः, निःश्वस्य = निःश्वासमादाय, अवोचत् = अकथयत्, हन्त = कष्टम्, हता = मारिताः स्मः ।

समास—सुखोपभोगे = सुखस्य उपभोगे, साश्रुलोचनैः = अश्रुभिः सहितानिलोचनानि येषां तैः, प्रवहणाधिरुढान् = प्रवहणम् अधिरुढान्, पोताध्यक्षः = पोतस्य अध्यक्षः, क्षिप्तशिरस्त्राणः = क्षिप्तं शिरस्त्राणं येन सः उल्लुञ्चितस्मश्रुः = उल्लुञ्चितं स्मश्रु यस्य सः, । सन्ताडितशीर्षः = सन्ताडितं शीर्षं यस्य सः, आर्तनादैः आर्तैः नादैः ।

कोष—शर्म सात सुखानि च 'कालोऽनेहा समयः । इत्यमरः ।

व्याकरणम् = षष्ठी = षट् + युक् + ङीप् ।

२. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

तीव्रेण रयेणोह्यमाना वयमचिरान्नक्ष्यामः । केवलं परमेश्वरानुग्रह एव अस्मांस्त्रातु प्रभवतिः इति । अथ वातबलेन त्रुटितासु पोतवसनरज्जुषु अवशतां गतम् अस्मत्प्रवहणमेकस्मिन् शिलासङ्घाते निपत्य खण्डशोऽभवत् । एवमपि भक्ष्यपदार्थान् कानिचित् बहुमूल्यानि पण्यवस्तूनि च ससम्भ्रममुद्धृत्य तीरभुवमवतीर्णा अतिनिर्जनतया तस्य प्रदेशस्य जीवितनिराशाबाष्पाकुललोचना वयं भृशमाक्रन्दामगिरेरेकस्य पादमूले स्थिताञ्च नानाभग्नप्रवहणावशेषान् नरास्थिसङ्घातान् उच्चावचान् पाण्यवस्तु राशींश्चामितो विकीर्णानपश्याम । सरितश्चैकां सिन्धुप्रभवां द्वीपं तं परिवृत्य काचिद्विशालमुरव्यां कन्दरायां विलीनामभिनवमौक्तिक माणिक्यहीरक-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मयं महीध्रं नयन हारिणीं तरुसन्दोहसुषमामदृष्टपूर्वां निरीक्ष्य विस्मयं प्रप्तुम ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिविरचितसिन्धुवादवृत्त-षष्ठ सिन्धुयात्रायां प्रवहणभङ्गविपत्ति वर्णयति सिन्धुवादः हितवादम् ।

व्याख्या—तीव्रेण = वेगवत्तरेण, सिन्धुरयेण = सागरवेगेन, ऊह्य-माना = नीयमाना, वयम् = वणिजः, अचिरात् = शीघ्रं, नक्ष्यामः = नष्टा भविष्यामः । केवलं = मात्रं परमेश्वरानुगुहः = ईश्वरकृपालवः एव, अस्मान् = पोतस्थान्, त्रातुं = रक्षितु, प्रभवति = सक्षमोऽस्ति इति । अथ = पश्चात्, वात वलेन = वायुवेगेन त्रुटितासु = खण्डितासु, पोत, वसनर-ज्जुषु = प्रवहण वसनरज्जुषु, अवशताम् = पराधीनतां, गतं=प्राप्तम्, अस्मत्प्र-वहणम् = अस्माकं पोतं, एकस्मिन् = अज्ञाते, शिला सङ्घाते = प्रस्तरसमूहे, निपत्य = पतित्वा, खण्डशः = चूर्णितः अभवत् = भवति स्म । एवम्=ईदृगव-स्थायाम् अपि, भक्ष्यपदार्थान् = खाद्यसामग्रीः, कानिचित् = कतिपयानि, बहुमूल्यानि = महर्घाणि, पण्यवस्तूनि = विक्रेयवस्तूनि, च ससम्भमम् = सत्वरम् उद्घृत्य = नीत्वा, तीरभुवं = तटभूमिम्, अवतीर्णा = समागताः, अतिनिर्जनतया = बहुविजनतया, तस्य = वर्तमानस्य, प्रदेशस्य = स्थानस्य, जीवितनिराशावाष्पाकुललोचना = प्राणविपत्तिवाष्पाकुलनयनाः, वयं = यात्रिणः, भृशम् = बहु, आक्रन्दाम = आक्रोशाम, गिरे = पर्वतस्य एकस्य = अज्ञातस्य, पादमूले = समीपे, स्थिताश्च = वर्तमानाश्च, नानाभग्नप्रवहणाव शेषान् = बहुनष्टपोतावशेषान्, नरास्थिसङ्घातान् = मानवास्थिसमूहान्, उच्चावचपण्यवस्तुराशीन् = नैकभेदपण्यपदार्थसमूहान्, च, अभितः = सर्वतः विकीर्णान् = प्रकीर्णान् अपश्याम = अवालोकयाम । सरितं = नदीम्, चैनां सिन्धुप्रभवां = सागरोद्भवां द्वीपम् = अन्तरीपं, तं = पुरःस्थितं परिवृत्य = आवेष्ट्य क्वचित् = कुत्रचित्, विशालमुख्यां = विस्तृतवदनायां कन्दरायां = गुहायां विलीनां = व्याप्ताम् अभिनवमौक्तिकमाणिक्यहीरकमणिमयं = नूतन-मुक्ताफलमाणिक्यहीरकमणि प्रचुराम् नयनहारिणी = नेत्राकर्षिकाम्, तरु-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्दोहसुषमां = वृक्षनिकरसौन्दर्यम्, अदृष्टपूर्वां = अनालोकित पूर्वां, निरीक्ष्य = दृष्ट्वा, विस्मयम् = आश्चर्यं, प्राप्नुम = समागच्छाम ।

समासः—सिन्धु रयेण = सिन्धोः रयेण, परमेश्वरानुग्रहः = परमेश्वरस्य अनुग्रहः, वातवलेन = वातस्य वलेन, पोतवसनरज्जुषु = पोतानां वसनरज्जुषु, अस्मत् प्रवहगम् = अस्माकं प्रवहगम्, शिलसङ्घाते = शिलानां सङ्घाते, भक्ष्यपदार्थान् = भक्ष्यान् पदार्थान्, पण्यवस्तूनि = पण्याय वस्तूनि, तीरभुवम् = तीरस्य भुवम् जीवितनिराशा, = जीवितेन निराशाः, वाष्पाकुललोचनाः = वाष्पेन आकुले लोचने येषां ते, नानाभग्नप्रवहणावशेषान् = नानाभग्नानां प्रवहणानाम् अवशेषान्, नरास्थिसङ्घातान् = नराणाम् अस्थीनि तेषां सङ्घातान्, उच्चावचपण्यवस्तुराशीन् = उच्चावचानां पण्यवस्तूनां राशीन्, सिन्धुप्रभवाम् = सिन्धोः प्रभवाम्, अभिनवमौक्तिकमाणिक्यहीरकमणिमयं मौक्तिकानि माणिक्यानि हीरकानि मणयश्चेति अभिनवा ये मौक्तिकमाणिक्यहीरकमणयः तन्मयं = अभिनवमौलिकमाणिक्यहीरकमणिमयं, नयनहारिणीं = नयनयो हारिणीं, तरुसन्दोहसुषमां = तरुणां सन्दोहस्य सुषमां ।

कोषः—'महीध्रे शिखारिक्ष्माभृत्' उच्चावचं नेकभेदम् इत्युभयत्राप्यमरः ।

व्याकरणम् = मणिमयम् = इत्यत्र मयट् प्रत्ययः ।

<u>३. प्रश्नः</u>—अधोलिखितस्य व्याख्या कार्या ।

तत्र च द्वीपे भग्नहृदयेषु, निश्चितनिधनेषु परस्परं समं विभाजितावशेषाशनजातेषु कञ्चित्कालमुषित्वा निरवशेषभक्ष्यतया एकैकशो नामशेषतां गतेषु निखिलेषु मत्सहचरेष्वत्यल्पावशेषांशेन आत्मनोप्यचिराद् भाविनीं तामेव गतिमुत्प्रेक्षमाण एतद्यात्रा क्लेशाङ्गीकरणेन मुहुरनुतप्यमानोऽहं दैवेन किञ्चिदाहितधैर्योऽवधानेन तां सिन्धूद्भवां कन्दरायां विलीनां तटिनीं परिवीक्ष्य कन्दरान्ते क्वचिन्निर्गच्छन्तीं तां सम्भावयन् फलक एकस्मिन् सङ्गृहीतमाणिक्यस्फटिकमाणिविसरमात्मानं दृढं वद्ध्वा परमेश्वरं ध्यायन् स्त्रोतस्विनीप्रवाहानुरोधेनावहम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कांश्चित् दिवसान् तिमिरावृत्तायां कन्दरायां क्वचित् सङ्कुचित- प्रदेश उपरितनशिलास्वाहन्यमानशीर्षोऽतिमितं भोज्यं समये समयेऽश्नन् क्वचित् स्वपन् क्वचिज्जागृत् सन्ततमवहम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्तषष्ठसिन्धुयात्राप्रसङ्गे पोतभङ्गे सिन्धुवादः कथं ततार नदीमिति कथयति ।

व्याख्या—तत्र = विजने, द्वीपे = अन्तरीपे, भग्नहृदयेषु = त्रुटितसाहसेषु परस्परं, समं = साकं विभाजितावशेषाशनजातेषु = विभक्ताशिष्टभोजनसमूहेषु कञ्चित् = स्तोकं, कालं = समयम्, उषित्वा = वासंकृत्वा निस्वशेषभक्ष्यतया = समाप्तभोजनत्वात् एकैकशः = क्रमशः नामशेषतां = स्मृतिशेषतां गतेषु = प्राप्तेषु निखिलेषु = सकलेषु, मत्सहचरेषु = मत्सहयात्रिषु अत्यल्पावशेषाशनः = स्वल्पावशिष्ट भोजनः, आत्मनः = स्वस्य, अपि, अचिरात् = शीघ्र भाविनीम् = आगामिनी तामेव = पूर्ववर्णितामेव, गतिं = दशाम् उत्प्रेक्षमाणः = सम्भाव्यमानसः एतद्यात्रा क्लेशाङ्गीकरणेन = एतत्प्रवासकष्टस्वीकरणेन, मुहुः = भूयः, अनुतप्यमानः = परितप्यमानः, अहं = सिन्धुवादः, दैवेन = भाग्येन, किञ्चित् = स्वल्पम्, आहितधैर्यो = धृतसाहसः, अवधानेन = सावधानेन, तां = पूर्वकथितां, सिन्धूद्भवां = सागरजां, कन्दरायां = गुहायां निलीनां=विलीनां, तटिनीं=कूलङ्कषां, परिवीक्ष्य=विलोक्य, कन्दरान्ते = गुहावसाने, क्वचित्=कुत्रचित् निर्गच्छन्तीं = निः सरन्तीं तां = नदीम्, सम्भावयन् = आकलयन्, फलके = काष्ठपट्टिकायाम्, एकस्मिन् सङ्गृहीतमाणिक्यस्फटिकमणिविसरम् = सङ्कलितमाणिक्यस्फाटिकमणिसमूहम्, आत्मानं=स्वं, दृढं, बध्वा=आवद्ध्य, परमेश्वरं=भगवन्तं, ध्यायन्= मनसा स्मरन्, स्रोतस्विनीप्रवाहानुरोधेन = नदीवेगानुसारेण अवहम् । कांश्चित् = कतिपयान्, दिवसान् = वासरान्, तिमिरावृतायांम् = अन्धकाराच्छादितायां, कन्दरायां = गुहायां क्वचित् = कुत्रचित्, सङ्कुचितप्रवेशे = सङ्कीर्णगमने, उपरितनशिलासु=मस्तकोपरिस्थपाषाणेषु, आहन्यमानशीर्षो=ताडयमानमस्तकः, अतिमितं=स्वल्पतमं भोज्यं=भक्ष्यं, समये समये=

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काले काले, अश्नन्=खादन्, क्वचित्, स्वपन्=शयानः, क्वचित्, जाग्रत् = जागरणं कुर्वन् सन्ततम्=सदा, अवहम् = जलधारायामगच्छम् ।

समासः—भग्नहृदयेषु = भग्नानि हृदयानि येषां तेषु, निश्चितनिधनेषु=निश्चितं निधनं येषां तेषु, विभाजितावशेषाशनजातेषु=विभाजितो अवशेषः अशनजातः येषां तेषु, निरवशेषभक्ष्यतया=निरवशेषं भक्ष्यं, तस्य भाव, तत्ता, तया, नामशेषतां=नाम एव शेषां यस्य सः नामशेषः, तस्य भावः, तां, मत्सहचरेषु=मम सहचरेषु, अत्यल्पावशेषाशनः = अत्यल्पः अवशेषः अशनं यस्य सः, एतद्यात्राक्लेशाङ्गीकरणेन = एतस्याः यात्रायाः क्लेशानाम् अङ्गीकरणेन, आहितधैर्यः = आहितं धैर्यं येन सः, सिन्धूद्भवां = सिन्धोः उद्भवां, सङ्गृहीतमाणिक्यस्फटिकमणिविसरम् = सङ्गृहीतः माणिक्यानां स्फटिकमणीनां विसरो येन तं, स्रोतस्विनीप्रवाहसानुरोधेन स्रोतस्विन्याः प्रवाहस्य अनुरोधेन, तिमिरावृत्तायां = तिमिरैः आवृतायां, सङ्कुचित् प्रदेशे=सङ्कुचिते प्रदेशे, उपरितनशिलासु=उपरितनासु शिलासु आहन्यमानशीर्षः आहन्यमानं शीर्षं यस्य सः ।

कोषः—उत्तमाङ्गं शिरं शीर्षम्, 'रत्नं' मणि र्द्वयोः इत्युभयत्राप्यमरः ।

व्याकरणम्—उत्प्रेक्षमाणः = उत् + प्र + ईक्ष + शानच् ।

४. प्रश्नः—अधोलितस्य व्याख्या कार्या ।

एकदा चैवम् वहन् सुप्तप्रवुद्ध आत्मानमेकत्र समस्थले एकस्याः स्रवन्त्यास्तरोपकण्ठे संयतमदीयाश्रयफलके कालवर्णैः कैश्चित् पुरुषैः परिवृतमद्राक्षम् उत्थाय चताननमम् । तैश्च किञ्चिदुक्तोऽविदिततद्भावस्तूष्णीं किञ्चित्कालं स्थितः स्वभाषायां विपत्समुत्तारणाय परमेश्वरं प्राशंसम् ।

तेषु च कृष्ण पुरुषेषु विज्ञातमदीयभाष एको मत्प्रार्थनां श्रुत्वा समुपेत्यैवमवोचत—'माऽस्मानिह निरीक्ष्य विस्मितोऽभूः । वयं किल गिरेः प्रवहन्त्यास्तटिन्या उदकं कुल्यभिर्विभज्य क्षेत्राणि स्वकीयानि संसेक्तुमनसा इहागच्छाम । जलस्रोतसासार्धं प्रवहत् त्वदाधारं फलकं विलोक्य विधृत्य बद्ध्वा च तीरप्रदेशे सुप्तस्य तव प्रबोधकालं प्रतीक्षमाणा आस्म । दिष्ट्या त्वं महतः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सङ्कटान्मुक्तः । साम्प्रतं स्ववृत्तान्तकथनेनानुगृहाणास्मान्' इति । अहं च भुक्ततद्वितीर्णकिञ्चिद्भोजनः, स्वं वृत्तान्तमकथयम् ।

उत्तरम्—प्रसङ्गः—सिन्धुवादः हितवादमात्मनः समस्थलीगमनं वर्णयति श्री मं० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तषष्ठसिन्धुयात्रामध्ये ।

व्याख्या—एकदा = एकस्मिन् समये, च, एवम् = उक्तप्रकारेण, वहन् = जलधारया सह गच्छन् सुप्तप्रबुद्धः = शयनोत्थितः, आत्मानं = स्वमेकत्र = एकस्मिन् स्थाने, एकस्याः स्रवन्त्याः = नद्यः, तटोपकण्ठे = कूलसमीपे, संयतमदीया श्रयफलके = सम्बद्धमदाश्रयकाष्ठपट्टिकायां, कालवर्णैः = कृष्णवर्णैः कैश्चित्, पुरुषैः = जनैः, परिवृतम् = सम्वृतम्, अद्राक्षम् = अपश्यम् । उत्थाय = उत्थानं कृत्वा, च, तान् = पुरुषान्, अनमम् = प्रणाममकरवम् । तैः = पुरुषैः च, किञ्चिदुक्तो = लपितः अविदिततद्भावः = अज्ञाततदभिप्रायः तूष्णीं = जोषं, स्थितः = वर्तमानः, किञ्चित्, कालं = समयं, स्वभाषायां = निजभाषायां, विपत्समुत्तारणाय = आपत्तिपारकारणाय परमेश्वरं = भगवन्तं प्राशंसम् = अभ्यनन्दम् ।

तेषु = द्रश्यमानेषु, कृष्णपुरुषेषु = असितजनेषु, विज्ञातमदीयभाषः = विदितमद्भाषः, एकः, मत्प्रार्थनां = मत्कातरोक्ति, श्रुत्वा = श्रोत्राभ्यां, निपीय, समुपेत्य = समागत्य, एवं = वक्ष्यमाणप्रकारेण, अवोचत् = अकथयत्—मा = नो, अस्मान् = तटस्थान् जनान्, इह = तटे, निरीक्ष्य = विलोक्य, विस्मृतो भूः = चकितो भूः । वयं = तटस्था, किल, गिरेः = पर्वतात् प्रवहन्त्याः = निर्गच्छंत्त्याः, तटिन्याः = नद्याः, उदकं = जलं कुल्याभिः = वारिप्रणालिकाभिः, विभज्य = भागं कृत्वा, क्षेत्राणि = कृषिभूभागभूतानि, स्वकःयानि = निजानि, संसेक्तुमनसा = सिञ्चनधिया, इह = तटम्, आगच्छाम = उपातिष्ठाम् । जलस्रोतसा = वारिप्रवाहेण, सार्धं = साकं, प्रवहत् = समापतत् त्वदाधारं=भवदाश्रयभूतं, फलकं = काष्ठपट्टिकारूपम्, विलोक्य = दृष्ट्वा, विधृत्य, बद्ध्वा = संयम्य, च, तीरप्रदेशे = तटप्रदेशे, सुप्तस्य = शयितस्य, तव = भवतः, प्रबोधकालं = जागरणकालं, प्रतीक्षमाणाः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आस्म = अतिष्ठामः, दिष्ट्या = भाग्येन, त्वं = भवान्, महतः = दुःसंहात्, सङ्कटात्, मुक्तः = बहिरागतः। साम्प्रतम् = अधुना, स्ववृत्तान्तकथनेन = निजकथालपनेन, अनुगृहाण = अनुग्रहविषयतां नय, अस्मान् = प्रतीक्षारतान् इति। अहं = सिन्धुवादः, च, भुक्ततद्वितीर्णकिञ्चिद्भोजनः = आस्वादित-तद्दत्तकिञ्चिदशनः, स्वं = निजं वृत्तान्तम् अकथयम् = न्यवेदयम्।

समासः—सुप्तप्रबुद्धः = पूर्वं सुप्तः पश्चात् प्रबुद्धः, समस्थले = समे स्थले, संयतमदीयाश्रयफलके = संयतं मदीयम् आश्रयफलकं यत्र तत्र, अविदित-तद्भावः = न विदितः तेषां भावः येन सः, स्वभाषायां = स्वस्यां भाषायाम्, विपत्समुत्तारणाय = विपत्तेः समुत्तारणाय, विज्ञातमदीयभाषः = विज्ञाता मदीया भाषा येन सः, संसेक्तुमनसः = संसेक्तुं मनांसि येषां ते, जलस्रोतसा = जलस्य स्रोतसा, तीरस्य प्रदेशे = तीरप्रदेशे प्रवोधकालं = प्रबोधस्य कालं, स्ववृत्तान्तकथनेन = स्वस्य वृत्तान्तस्य कथनेन, भुक्ततद्वितीर्ण-किञ्चिद्भोजनः = भुक्तं तद्वितीर्णं किञ्चिद्भोजनं येन सः।

कोषः—'कुल्या वारिप्रणालिका' इति धरणिः।

व्याकरणम्—प्रवहत् = प्र + वह् + शतृ। मुक्तः = मुच् + क्त।

५. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

तेऽपि तदाकर्णनेनातिविस्मिता मदीयं साहसं सादरमभिष्टुत्य मां तत्रत्यं नृपतिमुपगन्तुं तं चात्मचित्रवृत्तान्तवर्णनेन विनोदयितुं भृशमन्वरुन्धन्। अङ्गीकृततत्प्रार्थनोऽहं सपदि समानीतं तुरङ्गममध्यारोपितः पार्श्वस्थितैः कैश्चित् प्रदर्श्यमानमार्गं इतरैश्च कैश्चित् स्कन्धाधिरोपितास्मत्सरत्न-निचयफलकैः अनुस्रियमाणोऽगच्छम्।

उत्तरम्—प्रसङ्गः—तत्रत्यनृपतिगृहानयनमात्मनः सिन्धुवादः वर्णयत्यत्र षष्ठसिन्धुयात्राणां श्री म० म० लक्ष्मणशास्त्रिरचितायां सिन्धवाद-त्त[illegible] यायाम्।

व्याख्या—ते = कृष्णपुरुषा, अपि, तदाकर्णनेन = मत्कथाश्रवणेन, अति-विस्मिता = बहुचकिता, मदीयं—सिन्धुवादस्य, साहसं समभिनन्द्य, मां =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिन्धुवादं, तत्रत्यं = तद्देशस्थं, नृपतिम् = राजानम्, उपगन्तु=चलितु, तं = नृपति, च, आत्मचित्रवृत्तान्तवर्णनेन स्वविस्मयावहकथाख्यानेन, विनोदयितु = मनोरञ्जनं कर्तुं, भृशम् = वहु, अन्वरुन्धन् = प्रार्थयामासुः। अङ्गीकृततत्प्रार्थनः = स्वीकृततदनुरोधः, अहं = सिन्धुवादः, सपदि = शीघ्रं, समानीतम् = आनीतम्, तुरङ्गमम् = घोटकम्,अध्यारोपितः = अध्यारोहितः, पार्श्वस्थितैः = समीपस्थैः, कैश्चित् = जनै, प्रदर्श्यमानमार्गः = निर्दिश्यमानमार्गः, इतरैश्च, स्कन्धारोपितास्मत्सरत्ननिचयफलकैः = अंशावलम्बितसिन्धुवादसरत्नसमूहकाष्ठपट्टिकैः, अनुस्त्रियमाणो = अनुगम्यमानः, अगच्छम् = अचलम् ।

समासः—आत्मचित्रवृत्तान्तवर्णनेन = आत्मनः चित्रस्य वृत्तान्तस्य वर्णनेन, अङ्गीकृततत्प्रार्थनः = अङ्गीकृता तेषां प्रार्थना येन सः, पार्श्वस्थितैः = पार्श्वे स्थितैः, प्रदर्श्यमानमार्गः = प्रदर्श्यमानः मार्गः यस्य सः, स्कन्धाधिरोपितास्मत्सरत्ननिचयफलकैः = स्कन्धेषु अधिरोपितानि अस्माकम् सरत्ननिचयानि फलकानि यैः तैः ।

कोषः—'तुरङ्गाश्वतरंगमाः' इत्यमरः ।

व्याकरणम्—विनोदयितु = वि + नुद् + णिच् + तुमुन् ।

६. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः ।

तैश्च राजसदनं नीतः सिंहासनारुढं महाराजं वीक्ष्य जानुभ्यामवनौ निपत्य सविनयादरं दण्डप्रणाममकरवम् । स मां सप्रणयमुत्थाप्य पार्श्वे उपवेश्य मदभिधानं वसतिस्थानं तत्रागमनप्रकारमनेकसिन्धुयात्रावर्णनानि च मत्तः समाकर्ण्य प्रहृष्टो मद्यात्रावर्णनानि सौवर्णवर्णेषु विलेख्य स्वकीये पुस्तकालये सुरक्षितानि सङ्ग्रहीतुमियेष । मया सहानीतानि तानि माणिक्यादीनि स्वरत्नकोशेऽपि सुदुर्लभान्यानर्घाणि वीक्ष्य भृशं परितुतोष ।

तं तथा प्रहृष्टं निरीक्ष्य मया सविनयेन समुपह्रियमाणं तं रत्ननिचयमस्वीकृत्य सोऽवदत्—"आर्य ! सोऽयं रत्ननिचयस्त्वत्साहसपरितुष्टेन विधिना तुभ्यं प्रसादीकृतस्त्वयैवोपभोगयोग्यो नेतरेण । मया किलैषोऽभिन-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वोपहारैः परिवर्धनीयो न तनुतां नेयः" इति। अहं तस्यौदार्यं प्रशंसस्तस्योत्तरोत्तरमभिवर्धमानामभिवृद्धिं सर्वतोभाविनीं समीहे।

उत्तरम्—प्रसङ्गः—स्वकृतं तत्रत्यनृपतिदर्शनं वर्णयति सिन्धुवादःहितवादमत्र श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तं षष्ठसिन्धुयात्रायाम्।

व्याख्या—तैः = कृष्णपुरुषैश्च राजसदनं = नृपगृहं नीतः = प्रापितः, सिंहासनारूढं = राज्यासनगतं महाराजं = सम्राजं, वीक्ष्य = दृष्ट्वा, जानुभ्याम् उरुपर्वभ्याम्, अवनौ = धरायाम्, निपत्य = पतित्वा, सविनयादरं = सप्रश्रयादरं दण्डप्रणामम् = साष्टाङ्गनमनम् अकरवम्। सः = राजा, मां = सिन्धुवादं, सप्रणयम् सस्नेहम्, उत्थाप्य, पार्श्वे = समीपे, उपवेश्य = स्थापयित्वा, मदभिधानं = मन्नाम, वसतिस्थानं = निवासस्थानं तत्र = नृपराज्ये, आगमनप्रकारम् = आगमविधाम् अनेकसिन्धुयात्रावर्णनानि = बहुसागरप्रवासकथानकानि, च, मत्तः = सिन्धुवादात् समाकर्ण्य = श्रुत्वा, प्रहृष्टो = प्रसन्नः, मदयात्रावर्णनानि = मत्प्रवासकथाचयम् सौवर्णवर्णेषु = स्वर्णाक्षरेषु, विलेख्य = लेखयित्वा; स्वकीये निजे, पुस्तकालये = ग्रन्थालये, सुरक्षितानि = सुगुप्तानि, संङ्गृहीतुम् = सङ्कलयितुम्, इयेष = इच्छति स्म। मया = सिन्धुवादेन, सह = साकम् आनीतानि = नीतानि, तानि = पूर्ववर्णितानि, माणिक्यादीनि=हीरकादीनि, स्वरत्नकोशे = निजरत्नभाण्डारे सुदुर्लभानि = अप्राप्याणि, अनर्घाणि = बहुमूल्यानि, वीक्ष्य = दृष्ट्वा, भृशं = प्रचुरं, तुतोष = तोषमनुबभूव।

तं = नृपं, तथा = विशिष्टप्रकारं प्रहृष्टं = प्रसन्नं, निरीक्ष्य = विलोक्य, मया = सिन्धुवादेन, सविनयेन = सप्रश्रयेण समुपह्रियमाणम् = उपायनीक्रियमाणम्, तं=पुरःस्थं रत्ननिचयं, = रत्नसमूहम्, अस्वीकृत्य = अगृहीत्वा, सः = राजा, अवदत् = अकथयत् आर्य! भद्र, सोऽयं = भवतार्प्यमाणः रत्ननिचयः = रत्नराशिः त्वत्साहसपरितुष्टेनः भवद्धैर्य = संतुष्टेन, विधिना = भाग्येन, ब्रह्मणा वा तुभ्यं = भवते, प्रसादीकृतः = दत्तः, त्वयैव = भवता एव, उपभोगयोग्यः = भोग्यः नेतरेण = नान्येन। मया = नृपेण,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किल = वाक्यालङ्कारे एषो = दृश्यमानः, अभिनवोपहारैः = नूतनोपायनैः, परिवर्धनीयः = सम्बर्धनीयः, न = नहि, तनुतां = कृशतां, नेयः = प्राप्यः इति । अहं = सिन्धुवादः तस्य = राज्ञः, औदार्यम् = उदाराशयतां, प्रशंसन् = समभिनन्दयन्, तस्य = नृपस्य, उत्तरोत्तरं = दिवानिशम्, अभिवर्धमानाम् = सम्बर्धमानाम्, अभिवृद्धि = समुन्नतिं, सर्वतोभाविनीं = सर्वाङ्गीणाम्, समीहे = अभिकामये ।

समासः—राजसदनं = राज्ञः सदनं, सिंहासनारूढं = सिंहासने आरुढं, सविनयादरं = विनयश्च आदरश्च, ताभ्यां सहितं, वसतिस्थानं = वसतेः स्थानम्, आगमनप्रकारम् = आगमनस्य प्रकारम्, अनेक सिन्धुयात्रा-वर्णनानि = अनेकानि सिन्धोः यात्राणां वर्णनानि, स्वरत्नकोशे = स्वीये रत्नकोशे, ।

सविनयेन = विनयेन सह, तेन, रत्ननिचयम् = रत्नानां निचयम्, त्वत्साहसपरितुष्टेन त्वत्साहसैः परितुष्टेन, उपभोगयोग्यः = उपभोगाय योग्यः, अभिनवोपहारैः अभिनवैः उपहारैः ।

कोपः—'रत्न मणिर्द्वयोरश्म जातौ मुक्तादिकेऽपि च' इत्यमरः ।

व्याकरणम्—नेयः = नी + यत्, प्रहृष्टं = प्र + हृष् + क्त + अम् ।

७. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

अथ तेन मदर्थं प्रकल्पिते सपरिकरे सहपरिजने गृहे वसन् प्रत्यहमुपसेवितराजद्वारो नगरनिरीक्षणादिभिः समयं कञ्चिद् व्यत्यापयम् ।

स द्वीपः किल विषुवरेखावस्थानेन समानदिननिशायामोज्वलोपत्यकायाः नयनहारिण्या मध्यमध्युषितया समृद्धया राजधान्या समलङ्कृतः पद्मरागादिमहार्घमणि मौक्तिकबहुलो धातुवद्रुणत् कारिचित्रवर्ण प्रस्तररत्नसम्भृतो वनश्रीसमाकृष्टनयनयुगो मां भृशं व्यनोदयत् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवाद वृत्तपञ्चमसिन्धुयात्रातः गृहीतोयं गद्यखण्डः सिन्धुवादोऽत्र वर्णयति तद्द्वीपं हितवादम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याख्या—अथ = पश्चात्, तेन = राज्ञा, मदर्थं = सिन्धुवादार्थं, प्रकल्पिते = निर्मिते, सपरिकरे = परिवारयुते, सहपरिजने = सेवकसंयुते, गृहे = निकेतने वसन् = निवसन्, प्रत्यहम् = प्रतिदिनम्, उपसेवितराजद्वारैः = सेवितनृपद्वारः, नगरनिरीक्षणादिभिः = पुरावलोकनादिभिः, समयं= कालं, कञ्चित् = स्तोकं व्यत्यापयम् = अयापयम् ।

सः = पूर्ववर्णितः, द्वीपः = अन्तरीपः, किल = वाक्यालङ्कारे, विषुवरेखावस्थानेन = भूमध्यरेखासमीपस्थित्या, समानदिननिशायामः=समदिवसरात्रिप्रहरः, अचलोपत्यकायाः = पर्वतोपत्यकायाः, नयनहारिण्या = नेत्राकर्षिकाया, मध्यम् = मध्यभागम् अध्युषितया = स्थितया, समृद्धया = एश्वर्यबहुलया, राजधान्या, समलङ्कृतः = सुशोभितः, पद्मरागादिमहार्घमणिमौक्तिकबहुलो = लोहितकादिबहुमूल्यमणिमुक्ताप्रचुरो, धातुवठ्ठणत्कारि= चित्रवर्णप्रस्तररत्नसम्भृतो = लोहादिधातुसदृशठणत्कारविचित्ररङ्गप्रस्तररत्नखचितो, वनश्रीसमाकृष्टनयनयुगो = जङ्गललक्ष्मीसमाकृष्टनेत्रयुगलो, मां = सिन्धुवादं, भृशं = बहु, व्यनोदयत् = अनुरञ्जयति स्म ।

समासः—उपसेवितराजद्वारः = राज्ञः द्वारम्, राजद्वारम् उपसेवितम् राजद्वारम् येन सः, नगरनिरीक्षणादिभिः = नगरस्य निरीक्षणादिभिः, । विषुवरेखावस्थानेन = विषुवरेखायाम् अवस्थानेन, समानदिननिशायामः = समानाः दिनस्य निशायाः च यामा यत्र सः, अचलोपत्यकायाः = अचलस्य उपत्यकायाः, पद्मरागादिमहार्घमणिमौक्तिकबहुलः = पद्मरागादिभिः महार्घैः मणिमौक्तिकैः बहुलः, धातुवठ्ठणत्कारिचित्रवर्णप्रस्तररत्नसम्भृतः = धातुवत् ठणत्कारीणि चित्रवर्णानि यानि प्रस्तररत्नानि तैः सम्भवः, वनश्रीसमाकृष्टनयनयुगः = वनस्य श्रिया समाकृष्टं नयनयोः = युगं येन सः ।

कोषः—'लोहितकः पद्मरागः' इत्यमरः ।

व्याकरणम्—वसन = वस् + शतृ ।

८. **प्रश्नः**—अधोलिखितस्य व्याख्या कार्या ।

अथैकदा सम्प्रार्थितेन भूपेनानुमतगृहगमनाय महान्तमर्थराशिं ततोऽधिगत्य प्रस्थिताय, मे विदामपुराधीश्वराय श्री हारीतमहाराजाय पत्रमेकं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महार्घाजिनरत्नविलिखितमतिसुन्दरकुरुविन्दचषकं मौक्तिकोत्तमैः पूरितं सर्वरोगप्रशमनसमर्थं सर्पविशेषनिर्मोकमतिपृथून्करिदन्तान् कर्पूरराशिमनर्घरत्नभूषिताङ्गीमतिसुन्दरीं दासीं चैकां प्राभृतीकर्तुं समर्प्य महता स्नेहेन व्यसृजत् ।

आगत्य च विदामपुरं पत्रेण सह समुपहारराशिं हारीतनृपतये समर्प्य तस्य द्वीपभूपतेः समृद्धिमौदार्यं न्यायशीलतां चोपवर्ण्य नितान्तं प्रसन्नान्तरात्तस्मादधिगतबहुद्रविणभरः, स्वं गृहं प्रायाम् ।

एवमुक्त्वा सिन्धुवादो विरराम हितवादोऽपि पूर्ववच्छतं दीनारान् सम्प्राप्य सन्तुष्टः सर्वरतिथिभिः सह गृहं ययौ ।

परेद्युश्च सम्प्राप्तेषु तेषु स एवं स्वां सप्तमीमन्तिमां च यात्रां समवर्णयत् ।

उत्तरम्—प्रसङ्गः—गृहपरावर्तनं वर्णयत्यत्र सिन्धुवादः हितवादम् श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तषष्ठयात्रायामुपसंहारे ।

व्याख्या—अथ=पश्चात् । एकदा = एक वारं । सम्प्रार्थितेन निवेदितेन, भूपेन = राज्ञा, अनुमतगृहगमनाय=स्वीकृतस्वदेशागमाय, महान्तं = विपुलम् अर्थराशिम् = धनसमूहम्, ततो = नृपात्, अधिगत्य = अवाप्य, प्रस्थिताय = चलिताय, मे = मह्यम् विदामपुराधीश्वराय = मन्नगरनृपाय, श्रीहारीतमहाराजाय = एतन्नामकनृपाय, पत्रमेकं, महर्माजिनरत्नविलिखितम् = बहुमूल्यमृगचर्मरत्नोट्टङ्कितम् अतिसुन्दरकुरुविन्दचषकं = रमणीयतरपद्मरागपानपात्रं, मौक्तिकोत्तमैः = श्रेष्ठमौक्तिकैः, पूरितं = भरितं, सर्वरोगप्रशमनसमर्थं = सकलरुक्शान्तिकारक्षमं सर्वविशेषनिर्मोकं = भुजङ्गविशेषकञ्चुकम् अतिपृथून = बहुपृथुलान् करिदन्तान् = गजदशनान कर्पूरराशिम्= घनसारसमूहम् अनर्घरत्नभूषिताङ्गं = बहुमूल्यरत्नालङ्कृतगात्राम्, अतिसुन्दरीं = बहुलावण्यमयीं दासीं = चेटीं, चैकां प्राभृतीकर्तुम् = उपायनीकर्तुं, समर्प्य = अर्पयित्वा महता=विशिष्टेन स्नेहेन = प्रेम्णा, व्यसृजत्=त्यक्तवान् ।

आगत्य = समागत्य, च विदामपुरं = स्वनगरं, पत्रेण, सह = साकं, तमुपहारराशिम् = उपायनीकृतधनानि हारीतनृपतये = एतन्नामकराजाय,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समर्प्य = दत्वा, तस्य = सिन्धुवादसंरक्षकस्य द्वीपभूपतेः = अन्तरीपनृपतेः समृद्धिं = सम्पत्तिम्, औदार्यम् = उदारतां, न्यायशीलतां, च, उपवर्ण्य = कथयित्वा, नितान्तं = बहु, प्रसन्नान्तरात्, हर्षितहृदयात् तस्मात् = हारीतामित्रनृपात्, अधिगतबहुद्रविणभरः प्राप्तप्रचुरधननिवहः, स्वं = निजं गृहं = गेहं प्रायाम् = अगच्छम् ।

एवम् = पूर्वोक्तम्, उक्त्वा = निगद्य, सिन्धुवादो = कथावक्ता, विरराम= शान्तोवभूव । हितवादोऽपि = कथाश्रवणनिरतोऽपि भारवहनवृत्तिः, पूर्ववत्= प्रथमवत् शतं, दीनारान्, सम्प्राप्य = लब्ध्वासन्तुष्टः, सर्वैः = सकलैः, अतिथिभिः = अभ्यागतैः, सह = साकं, गृहं = निकेतनम्, ययौ = जगाम !

परेद्युश्च = द्वितीये दिने च, सम्प्राप्तेषु = समागतेषु, तेषु = श्रवणनिरतेषु । सः = सिन्धुवादः, एवं, स्वां = निजां सप्तमीमन्तिमां, च, यात्रां = प्रवासं, समवर्णयत् = अकथयत् ।

समासः—अनुमतगृहगमनाय = अनुमतम् गृहस्य गमनं यस्य तस्मै, विदामपुराधीश्वराय = विदामपुरस्य अधीश्वराय, महर्घाजिनरत्नविलिखितम् = महर्घे अजिने, रत्नैः विलिखितम् सर्वरोगप्रशमन समर्थं = सर्वेशां रोगाणां प्रशमनाय समर्थम्, अतिसुन्दर कुरुविन्दचषकम्, अतिसुन्दरम् कुरुविन्दचषकम् सर्पविशेष निर्मोकम = सर्पविशेषस्य निर्मोकं, करिदन्तान् = करीणां दन्तान् अनर्घरत्नभूषिताङ्गीम् = अनर्घैः रत्नैः भूषितानि अङ्गानि यस्याः सा, तां । द्वीपभूपते = द्वीपस्य भूपतेः, प्रसन्नान्तरात् = प्रसन्नमन्तरं यस्य तस्मात्, अधिगतबहुद्रविणभरः = अधिगतः बहुः द्रविणभरः येनसः ।

कोषः—चषकोऽस्त्री पानपात्रम् । सभौ कञ्चुकनिर्मोकौ; प्राभृतं तु प्रदेशनम् उपायनम्' इति सर्वत्रामरः ।

व्याकरणम्—समर्प्य = सम् + अर्प + क्त्वा + ल्यप् । सप्तमी = सप्त + उट् + डीप् । परेद्युः = परशब्दात् एद्युस् प्रत्ययः । विरराम = वि + रम् + लिट् ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।
सिन्धुवादस्य वृत्तेऽस्मिन् षष्ठीयात्रा वरागमत् ॥६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तमी सिन्धुयात्रा

१. प्रश्नः—व्याख्येयोऽधोलिखितो गद्यभागः ।

गृहं प्रतिनिवृत्तः परिणतावस्थतामात्मनो विचार्य विश्रमितुकामो' नेतः परं सिन्धुयात्रांप्रयास्यामीति निधार्य सुखेन गृह एव वस्तु निरचिनवम् ।

एकस्मिश्च दिने सुहृद्भिः सह सानन्दंस्थितोऽहं सहसा समागतेन राजाधिकारिणा' देवो हारीतमहाराजस्त्वां दिदृक्षते, त्वरितं समागम्यताम् इत्युक्तः सपदि गत्वा सविनयं कृतप्रणामो महाराजहरीतेनोक्तः—आर्य सिन्धुवादः कस्मिंश्चिदावश्यके कर्मणि त्वां नियोजयितु मिच्छामि त्वयां किल इतः प्रस्थाय द्वीपाधिपतिं प्रेषितोपहारं तं प्रत्युपहारा मयैतः प्रेष्यमाणाः सम्प्रापणीया इति ।

उत्तरम्—प्रसङ्गः—हारीत नृपतिसन्देशश्रवणमत्र वर्णयति सिन्धुवादः हितवादं श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादः वृत्तसप्तमसिन्धु-यात्रायाम् ।

व्याख्या—गृहं = गेहं, प्रतिनिवृत्तः = प्रत्यागतः, परिणतावस्थताम् = वार्द्धक्यम्, आत्मनः स्वस्य, विचार्य = बिचारं कृत्वा, विश्रमितुकामो = विश्रम्मेच्छुः नेतः, परम् = अग्रे, सिन्धुयात्रां = सागरप्रवासं प्रयास्यामि = गमिष्यामि, इति, निर्धार्य = निश्चित्य, सुखेन = आनन्देन, गृहे = निकेतने, एव, वस्तुं = निवासं कर्तुं, निरचिनवम् = निर्धारितवान् ।

एकस्मिंश्च, दिने = दिवसे, सुहृद्भिः = मित्रैः, सह = साकं, सानन्दं = सहर्षं स्थितो = वर्तमानोऽहं = सिन्धुवादः, सहसा = अकस्मात्, समागतेन = सम्प्राप्तेन, राजाधिकारिणा = नृपाधिकारिणा, 'देवो = महाराजो, हारीत-महाराजः = एतन्नामा नृपः, त्वां = सिन्धुवादं, दिदृक्षते = द्रष्टुमिच्छति, त्वरितं = शीघ्रं, समागम्यताम् = आव्रज्यताम्', इत्युक्तः, सपदि = झटिति, गत्वा = चलित्वा, सविनयं = सप्रश्रयं, कृतप्रणामो = विहितप्रणतिः, महा-राजहारीतेनोक्तः = कथितः—'आर्य = भद्र, सिन्धुवाद ! कस्मिंश्चित् = अज्ञाते, कर्मणि – कार्ये, आवश्यके, त्वां = भवन्तं नियोजयितुं = लगयितुम्,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इच्छामि = वाञ्छामि। त्वया = भवता, किल, इतः = विदामपुरात्, प्रस्थाय = प्रस्थानं कृत्वा द्वीपाधिपतिम् = अन्तरीपनृपतिं, प्रेषितोपहारं = दत्तोपायनं, तं = नृपं, प्रत्युपायनानि, = मया = हारीतेन, इतः = विदामपुरात्, प्रेष्यमाणाः = संप्रेष्यमाणाः, सम्प्रापणीया = प्रेषणीया इति।

समासः—परिणतावस्थताम् = परिणता अवस्था यस्य सः परिणतावस्थः तस्य भावः तत्ताम् विश्रमितुकामो = विश्रमितुं कामो यस्य सः, राजाधिकारिणा = राज्ञः अधिकारिणा, द्वीपाधिपतिं = द्वीपस्य अधिपतिं प्रेषितोपहारं = प्रेषितः उपहारः, येन सः तं।

कोषः—'शर्म सात सुखानि च' इत्यमरः।

व्याकरम्—स्थितः = स्था + क्त।

प्रस्थायं = प्र + स्था + क्त्वा + ल्यप्।

२. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अहं त्वशनिपातेनेव तेन तद्वचसाऽभिहितस्तमवदम्—देव! कः पुनःपुनः देवादेशं विलङ्घयितुमीष्टे? किन्तुनानायात्राक्लेशपरिश्रान्तः परिणतवया नो जातु समुद्रयात्रां भूयो गन्तुं कृतसङ्कल्पोऽस्मि। 'इतः परं देवः प्रमाणम्'। इत्युक्त्वा तमनेकात्मयात्रावृत्तान्तान् श्रावयम्। आकर्ण्यं च मद्वचः सोऽब्रवीत् 'नूनं क्लेशबहुलाः समुद्रयात्राः। किन्तु मदर्थमेतत्कार्यं कृत्वा प्रत्यागम्यताम्, न भूयो भवन्तं क्लेशयितास्मि' इति। एवं साग्रहमनुरुन्धतस्तरस्याज्ञां 'यथाऽऽज्ञापयति देव' इति मूर्ध्नाऽऽदाय सन्तुष्टात् तस्माल्लब्धयात्रौपयिकदीनारसहस्रो भूयो यात्रार्थं सन्नद्धोऽभवम्।

उत्तरम्—प्रसङ्गः—सप्तमयात्राकारणम् वर्णयत्यत्र सिन्धुवादः हितवादं श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तसप्तम्यात्रायां।

व्याख्या—अहं = सिन्धुवादः, तु, अशनिपातेन = व्रजपातेन, इव = यथा तेन....आदेशेन, तद्वचसा = हारीतवाक्येन, अभिहितः = उक्तः, तम् = हारीतम्, अवदम् = अब्रवम्—देव = महाराज! कः = प्रजाजनः, पुनः देवादेशं = श्रीमतामाज्ञां, विलङ्घयितुम् = लङ्घनं कर्तुं, इष्टे....सक्षमो-

 CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ऽस्ति ? न कोपीति भावः। किन्तु = परन्तु, नानायात्राक्लेशपरिश्रान्तः = बहुयात्रादुःखपीडितः, परिणतवया = गतावस्थः, नो = नहि, जातु = कदाचित्, समुद्रयात्रां = सागरप्रवासं, भूयः = पुनः गन्तुं = व्रजितुं, कृतसङ्कल्पः = विहितप्रतिज्ञः अस्मि। इतः = श्रवणात् परं = पश्चात्, देवः = स्वामी, प्रमाणम् = आदेशदाने, निरसने च क्षमः। इत्युक्त्वा = इत्यभिधाय, तम् = हारीतम् अनेकात्मयात्रावृत्तान्तान् = बहुस्वप्रवासकथानकान्, अश्रावयम् = श्रवणविषयतामनयम्। आकर्ण्य = श्रुत्वा च मद्वचः = मदीयां वाणीम्, सः = नृपः, अब्रवीत् = अकथयत्—'नूनं = निश्चयेन, क्लेशबहुलाः = पीडाप्रचुराः, समुद्रयात्राः = सागरप्रवासाः। किन्तु = परन्तु, मदर्थम् = नृपार्थम्, एतत्कार्यं = समुद्रयात्रारूपम् कृत्वा = विधाय, प्रत्यागम्यताम् = प्रत्यावर्त्यताम्। न = नहि, भूयः = पुनः, भवन्तम् = श्रीमन्तं क्लेशयिता = पीडयिता, अस्मि, इति। एवं = पूर्वोक्तप्रकारेण, साग्रहम् = सानुरोधम्, अनुरुन्धतः = प्रार्थयतः, तस्य = नृपस्य, आज्ञाम् = आदेशम्, यथा = यादृशम्, आज्ञापयति = आदिशति, देवः = स्वामी, इति, मूर्ध्ना = शिरसा, आदाय = स्वीकृत्य, सन्तुष्टात् = हर्षितात्, तस्मात् = नृपात्, लब्धयात्रौपयिकदीनारसहस्रः = प्राप्तयात्रोपायनदीनारदशशतः, भूयः = पुनः, यत्रार्थं = प्रवासाय, सन्नद्धो = बद्धपरिकरः, अभवम् = जातम्।

समासः—अशनिपातेन = अशनेः पातेन, तद्वचसा = तस्य वचसा, देवादेशं = देवस्यआदेशं, नानायात्राक्लेशपरिश्रान्तः = नानायात्राणां क्लेशैः परिश्रान्तः, परिणतवया = परिणतं वयः यस्य सः, समुद्रयात्रां = समुद्रस्य यात्रां, कृतसङ्कल्पः = कृतः सङ्कल्पः येन सः, अनेकात्मयात्रावृत्तान्तान् = अनेके आत्मनो यात्रायाः ये वृत्तान्ताः तान्। लब्धयात्रौपयिकदीनारसहस्रः = लब्धं यात्रायाः औपयिकं दीनाराणां सहस्रं येन सः।

कोषः—'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः।

व्याकरणम्—आदाय = आ + दा + क्त्वा + ल्यप्।

३. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अथ गृहीत्वा तानि प्रदेयोपहारवस्तूनि राज्ञा च स्वहस्तलिखितं पत्रं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वासरपुरमेत्य प्रवहणरूढोऽभवम् । निष्प्रत्यूहं च तं द्वीपमुपगम्य प्रधानाधिकारिणो दृष्ट्वा निवेदितस्वागमनोद्देश्यो यथा सम्भवं त्वरितं नृपसन्दर्शनं कारयितुं न्यवेदयम् । तैश्च निवेदितागमनो राजानं समासाद्य तत्क्षणं मां प्रत्यभिज्ञाय प्रदर्शितप्रमदातिशयाय तस्मै तानि महार्घाणि हारीतनृपतिप्रेषितान्युपायनानि पत्रं चोपाहरम् । स च तानि सौहार्दरमणीयानि सन्नचेताः सादरमङ्गीचकार ।

ततोऽहं तामामन्त्र्याविलम्बितं विदामपुरमधिगन्तुकामस्ततो, भूयः समासादितभूरिविभवस्ततः प्रातिष्ठे । द्वित्राणि दिनानि स्व मार्गमाक्रामतामस्माकं पोतं सहसादासविक्रयव्यवसायाः केचिद्वणिजोऽवरुद्ध्य अस्मान् वन्दिनोऽकार्षुः । अस्मन्नेपथ्यं चावतार्य दासोचितवसनैरस्मानाच्छाद्य काञ्चिद् दूरवर्तिनंद्वीपं नीत्वा दासीभूतान् व्यक्रीणत ।

उत्तरम्—प्रसङ्गः—हारीतस्य प्रियं नृपं दृष्ट्वा उपायनानि समर्प्य सिन्धुवादः परावर्तमानः कथं कैश्चित् पुरुषैः विक्रिणीतः इति कथयति सिन्धुवादः हितवादम् श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तसप्तमयात्रायाम् ।

व्याख्या—अथ = पश्चात्, गृहीत्वा = आदाय, तानि = पुरःस्थानि, प्रदेयोपहारवस्तूनि = प्रेष्यपदार्थनिचयान्, राज्ञा = हारीतेन च स्वहस्तलिखितं = निजकरोट्टङ्कितम्, पत्रं वासरपुरम् = समुद्रयात्रास्थानम्, एत्य = गत्वा, प्रवहणरूढः = पोतारुढः अभवम् । निष्प्रत्यूहं = निर्विघ्नं, च, तं = गन्तुमिष्टं, द्वीपम् = अन्तरीपम्, उपगम्य = गत्वा, प्रधानाधिकारिणो, दृष्ट्वा = विलोक्य, निवेदित स्वागमनोद्देश्यो = प्रार्थितनिजागमन प्रयोजनः यथासम्भवं = यथाशक्यं, त्वरितं = शीघ्रं, नृपसन्दर्शनं = भूपदर्शनं, कारयितुं, न्यवेदयम् = सम्प्रार्थयम् । तैश्च = अधिकारिभिश्च, निवेदिता गमनो = ज्ञातागमः, राजानं = द्वीपनृपं, समासाद्य = दृष्ट्वा, तत्क्षणं = सद्यः, मां = सिन्धुवादं, प्रत्यभिज्ञाय = परिचित्य, प्रदर्शितप्रमदातिशयाम = दर्शितहर्षातिरेकाय, तस्मै = द्वीपभूपतये, तानि = स्वानीतानि, महार्घाणि = बहु-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मूल्यानि हारीतनृपतिप्रेषितानि = सिन्धुवाददेशस्थभूपदत्तानि, उपायनानि = उपहाराणि, पत्रं, च, उपाहरम् = अददाम् । स = द्वीपपतिः च, तानि = सिन्धुवाद दत्तानि सौहार्दृरमणीयानि = प्रेमसुन्दराणि, प्रसन्नचेताः = हृष्टात्मा, सादरम् = सविनयम्, अङ्गींचकार = स्वीकृतवान् ।

ततः = द्वीपात्, अहं = सिन्धुवादः, तम् = द्वीपभूपम्, आमन्त्र्य = पृष्ट्वा, अविलम्बितं, विदामपुरम् = स्वनगरम्, अधिगन्तुकामः = परावर्तनेच्छुः, ततो = द्वीपनृपात्, भूयः = पुनः समासादितभूरिविभवः = प्राप्तबहुधनः, ततः = द्वीपात्, प्रातिष्ठे = प्रस्थानमकरवम् । द्वित्राणि, दिनानि = दिवसान् स्वं = निजं, मार्गं = पन्थानम्, आक्रामतां = चलताम्, अस्माकं = प्रस्थितानां पोतं = प्रवहणम्, सहसा = अकस्मात्, दासविक्रयव्यवसायाः = दासविक्रयव्यापाररताः, केचित् वणिजः = व्यापारिणः, अवरुद्ध्य, अस्मान् = सिन्धुवाद प्रमुखान्, वन्दिनः, अकार्षुः = कृतवन्तः । अस्मन्नेपथ्यं = वेषं च, अवतार्यं = अपवार्यं दासोचितवसनैः = दासयोग्यवस्त्रैः, अस्मान् = व्यापारिणः, आच्छाद्य, क्वचिद्, दूरवर्तिनं दूरस्थं, द्वीपम् = अन्तरीयं नीत्वा, दासीभूतान् = पराधीनान्, व्यक्रीणत् = विक्रीतवन्तः ।

समासः—प्रदेयोपहारवस्तूनि = प्रदेयानि उपहारवस्तूनि, स्वहस्तलिखितं = स्वेन हस्तेन लिखितं, प्रवहणरुढः = प्रवहणे रुढः, निष्प्रत्यूह = प्रत्यूहैः विघ्नैः रहितं निवेदितस्वागमनोद्देश्यः = निवेदितम् स्वस्य आगमनस्य उद्देश्यम् येन सः, नृपसन्दर्शनं = नृपस्य सन्दर्शनं, निवेदितागमनो = निवेदितम् आगमनं यस्य सः, प्रदर्शितप्रमदातिशयाय = प्रदर्शित प्रमदातिशयो येन, सः तस्मै, हारीत नृपतिप्रेषितानि, सौहार्दृरमणीयानि = सौहार्दृण रमणीयानि, प्रसन्नचेताः = प्रसन्नं चेतो यस्य सः ।

समासादितभूरिविभवः = समासादितम् भूरिविभवं येन सः, दासविक्रयव्यवसायाः = दासानां विक्रय एव व्यवसायः येषां ते, दासोचितवसनैः = दासाय उचितैः वसनैः ।

कोषः—मुत्प्रीतिः प्रमदोहर्षः विघ्नोऽन्तरायप्रत्यूहः इत्यमरः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याकरणम्—गृहीत्वा = ग्रह + क्त्वा, एत्य + आ + इण् + क्त्वा + ल्यप्।

४. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

अहं त्वेकेनाढ्येन वणिजा क्रीत्वा गृहं नीतो दत्तभोजनाच्छादनमात्रो वसन्नेकदा तेन पृष्टः—अपि कच्चिद् व्यवसायं वेत्सि ? इति। वृत्या वणिजं दासव्यवसायिभिः सर्वस्वहरणपूर्वकं मां विक्रीतं श्रुत्वा स भूयोऽपृच्छत्—'कच्चिद्धनुर्बाणप्रयोगं शिक्षितवानसि ?' इति बाल्ये कृततदभ्यासं मन्मुखाद्-विदित्वा दत्तधनुर्बाण आत्मनः पृष्ठभागे हस्तिपृष्ठे मां समुपवेश्य कियद् दूरे स्थितं गहनमेकमनयत्। तत्र च मामवतार्योत्तुङ्गं वनस्पतिमेकं प्रदर्श्या-वोचत्—'आरोहैतं पादपं।' अत्र च स्थितोऽधः समापततो गजान् जहि। वनमिदं तैरभितो व्याप्तम्, समाघातेन पतितमात्रे गजे मामागत्य निवेदय इति। अथ स किञ्चिदशनजातं मह्यं वितीर्य नगरम् यासीत्। अहं निखिलां रात्रिं वृक्षारुढोऽतिष्ठम्।

उत्तरम्—प्रसङ्गः—गजहननाय नियुक्तोऽहं स्वामिनेति सिन्धुवादः हितवादं सूचयति श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तसप्तम-यात्रायाम्।

व्याख्या—अहं = सिन्धुवादः, एकेन, आढ्येन = धनिकेन, वणिजा = व्यापारिणा, क्रीत्वा, गृहं = गेहं, नीतो, दत्तभोजनाच्छादनमात्रो = समर्पिता-शनवसनमात्रो, वसन् = निवसन्, एकदा, तेन = मत्स्वामिना, पृष्टः, अपि, कच्चिद्, व्यवसायं = व्यापारं, वेत्सि = जानासि ? इति। वृत्या = जीविकया वणिजं = व्यापारिणं, दासव्यवसायिभिः, सर्वस्यहरणपूर्वकं = सर्वधनग्रहण-पूर्वकं, मां = सिन्धुवादं, विक्रीतं, श्रुत्वा = ज्ञात्वा, सः = स्वामी, भूयः = पुनः, अपृच्छत् = पृष्टवान्, कच्चित्, धनुर्बाणप्रयोगं = शराशनशरसञ्चालन-विधानं, शिक्षितवानसि = जानासि ? इति। बाल्ये, कृततदभ्यासं = विहित पुनः पुनः प्रवर्तनं, मन्मुखाद् = सिन्धुवादलपनात्, विदित्वा = ज्ञात्वा, दत्त-धनुर्बाणः = अर्पितशरासनशरः, आत्मनः = स्वस्य, पृष्ठभागे, हस्तिपृष्ठे =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गजपृष्ठे, मां = सिन्धुवादम्, समुपवेश्य, कियद्दूरे, स्थितं = वर्तमानम्, गहनमेकं = कान्तारमेकमनयत् । तत्र = जङ्गले, च, माम = सिन्धुवादम्, अवतार्य, उत्तुङ्गम् = उन्मतं, वनस्पतिं = वृक्षम्, एकं, प्रदर्श्य = दर्शयित्वा, अवोचत् = अवदत्—आरोह एतं = सम्मुखस्थं, पादपं = वृक्षं । अत्र = पादपे, च, स्थितः = वर्तमानः, अधः = नीचैः समापततो = समागच्छतो, गजान् = करिणः, जहि = मारय । वनमिदं = काननमिदं तैः गजैः, अभितः = सर्वत्रः व्याप्तम् = आकीर्णम् । समाघातेन = ताडितेन, पतितमात्रे, गजे = हस्तिनि, माम = स्वामिनम्, आगत्य, निवेदय = ब्रूहि, इति । अथ = पश्चात् सः = स्वामी, किञ्चिद्, अशनजातं = भोजनं, मह्यंसिन्धुवादाय वितीर्य = दत्वा, नगरम्, अयासीत् = अगच्छत् । अहं = सिन्धुवादः, निखिलां = सकलां, रात्रिं = निशां वृक्षारूढो अतिष्ठम् ।

समासः—दत्तभोजनाच्छादनमात्रं = केवलं दत्तं भोजनम् आच्छादनं यस्मै सः, दासव्यवसायिभिः = दासानां व्यवसायिभिः, सर्वस्वहरणपूर्वकं = सर्वस्य स्वस्य हरणं पूर्वकं यस्य तं, धनुर्वाणप्रयोगं = धनुषः वाणस्य च प्रयोगं कृतैतदभ्यासं = कृतस्य एतस्य अभ्यासं, दत्तधनुर्वाणः = दत्तं धनुः वाणः च येन सः, पृष्ठभागे=पृष्ठे भागे, हस्तिपृष्ठे = हस्तिनः पृष्ठे, किञ्चदशनजातं = किञ्चिद् अशनानां जातम्, वृक्षारुढः = वृक्षारुढः ।

५. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

अथ प्रभाते उदितमात्रे भगवति सवितरि बृहद्दन्तावेलययूथं पुरः प्रादुरभूत् । सपदि च मया मुक्तैः सायकैरेकस्मिन्निपतिते, परेषुच भयेन विद्रुतेषु वृक्षादवरुह्य तदिदं वृत्तं निशामयितुं स्वामिनमभ्युपागच्छम् । प्रशस्यमानश्च तेन सहैव काननं गत्वा गर्तमेकं खनित्वा तत्करिशवं तद्दन्तान् जिघृक्षतस्ततपूतीभावं प्रतीक्षमाणस्य, स्वामिन आदेशानुसारं न्यखनम् ।

एवं मासद्वयं वनं गत्वा प्रत्यहं नवं नवं वृक्षमारुढो दन्तिनो निघ्नन्नयापयम् । एकस्मिन् पुनर्दिवसे यथाभ्यस्तं स्वं पन्थानमगत्वा परश्शतान् दन्तिनो वृंहितैः सकलमेव तद्वनम् पूरयतः पदाघातेनावनिमवनमयतो मदारुढं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शाखिनं सर्वतः परिवृत्य मदभिमुखमुन्नामितैः शुण्डादण्डैर् मामाक्रष्टुं प्रयतमानान्निरीक्ष्य साध्वसाक्रान्तस्य मम हस्ताभ्यां सशरं धनुरधोऽपतत् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्तसप्तमसिन्धुयात्रायां सिन्धुवादः स्वशरैः हस्तिहननं वर्णयति हिवादमत्र ।

व्याख्या—अथ = रात्रिगमनानन्तरं, प्रभाते=प्रातः उदितमात्रे = गगनाङ्गणावतरिते एव, भगवति=ऐश्वर्यशालिनि, सवितरि = सूर्ये, बृहद्दन्तावलययूथं=दीर्घगजसमूहं, पुरः=सम्मुखं, प्रादुरभूत = आविरासीत्=दृष्टिपथमाजगाम इत्यर्थः, । सपदि=शीघ्रं, च, मया=सिन्धुवादेन, मुक्तैः = त्यक्तैः, सायकैः=शरैः एकस्मिन्, निपतिते = धरापृष्ठे लुण्ठिते, परेषु = शेषेयु च, भयेन=भीत्या, विद्रुतेषु = पलायितेषु, वृक्षात् = तरुशिखरात्, अवरुह्य= अवतीर्यं, तदिदं = समुपस्थितम्, वृत्तं = वृत्तान्तं, निशामयितु = कथयितुं स्वामिनम् = मत्क्रेतारम् अभ्युपागच्छम् = अचलम् । प्रशस्यमानः=अभिनन्द्यमानश्च, तेन = स्वामिना, सहैव = साकमेव, काननं=वनं, गत्वा= व्रजित्वा, गर्तमेकं, खनित्वा = निर्माय, तत्करिशवं = तद्गजशवं तद्दन्तान्= तद्दशनान्, जिघृक्षतः = ग्रहीतुमिच्छतः, तत्पूतीभावम् = दुर्गन्धतां, प्रतीक्षमाणस्य = प्रतीक्षारतस्य, स्वामिन = क्रेतुः आदेशानुसारं निदेशानुसारं, न्यखनम् = खनितवान् ।

एवं = पूर्वोक्तप्रकारेण, मासद्वयं = पक्षचतुष्टयं, वनं = विपिनं, गत्वा, प्रत्यहं = प्रतिदिनं, नवं नवं = नूतनं नूतनं वृक्षम् = तरुम्, आरुढो, दन्तिनो = हस्तिनः, निघ्नन् = मारयन्, अयापयम् = व्यत्यापयम् । एकस्मिन्, पुनः, दिवसे = दिने, यथाभ्यस्तं = पूर्वज्ञातं, स्वं = निजं, पन्थानम् = मार्गम् अगत्वा = अनाश्रित्य, परश्शतान् = शताधिकसंख्यकान् दन्तिनः = हस्तिनः, वृहितैः = करिणार्जितैः, सकलमेव = सम्पूर्णमेव, तद्, वनं = विपिनं पूरयतः = व्याप्नुवतः, पादाघातेन = चरणघातेन, अवनिम् = धराम्, अवनमपतो मदारुढं = मदुपविष्टं, शाखिनम् = वृक्षम्, सर्वतः = परितः, परिवृत्य = वेष्टयित्वा, मदभिमुखं = ममं सम्मुखम्, उन्नामितैः = उत्थापितैः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुण्डादण्डैः = करदण्डैः, माम् = सिन्धुवादम्, आक्रष्टुम् = अधः आनेतुम्, प्रयतमानान् = प्रयत्नव्यापृतान्, निरीक्ष्य = दृष्ट्वा, साध्वसाक्रान्तस्य = भयभीतस्यः, मम = सिन्धुवादस्य हस्ताभ्यां = कराभ्यां, सशरं = सवाणम् धनुः = शराशनम्, अधः = नीचैः, अपतत् = पतित स्म ।

समासः—बृहद्दन्तावलयूथं = बृहद्दन्तावलानां यूथं, तत्करिशवं = तस्य करिणः शवं, मासद्वयं = मासानां द्वयं, प्रत्यहम् = अहः अहः = प्रत्यहः तं, शुण्डादण्डैः शुण्डा एव दण्डाः तैः, साध्वसाक्रान्तस्य = साध्वसेन आक्रान्तस्य ।

कोषः—'दन्ती दन्तावलो हस्तिः', 'पूतिभावस्तु दुर्गन्धिः' इत्युभयत्राप्यमरः । 'वृंहितं करिगजितम्' इत्यपि ।

व्याकरणम्—परिवृत्य = परि + वृत् + क्त्वा + ल्यप् ।

६. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

अथ तेषु वहिष्ठः करीन्द्रः करेण मदधिरुढवृक्षमावेष्ट्य प्रसभं चालयन् समूलमुन्मूल्य भूभावपातयत् । तेन च सार्धं निपतितं मां शुण्डया गृहीत्वा स्कन्धयोरवस्थाप्य मृतप्रायं स्वयूथैरनुसृतः कञ्चन विजनप्रदेशं नीत्वाऽधः क्षिप्त्वा क्वचिदयासीत् ।

सर्वमेतत् स्वप्नविलसितमिव विचिन्तयन्नहं कञ्चित्कालं प्रतीक्ष्य वीतगजशङ्कः एकत्र गिरिप्रदेशे करिदन्तास्थिराशिसङ्कुले स्थितमात्मानमपश्यम् । तं च प्रदेशं तेषां श्मशानस्थानं दन्तलिप्सया भूयो गजहननान्मां निवारयितुमिथ तैः प्रदर्शितं विलोक्य शनैस्ततः प्रतिनिवृत्त एकेनाह्ना एकया च निशया मत्स्वामिनोऽन्तिकम् प्रत्यागमम् ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्तसप्तसिन्धुमयात्रायां गजसङ्कटमात्मानं वर्णयति सिन्धुवादः हितवादमत्र ।

व्याख्या—अथ = अनन्तरं, तेषु = अवलोकितेषु वहिष्ठः = अतिशयेन बहुलः = पुष्टः इत्याशयः करीन्द्रः = गजेन्द्रः, करेण = शुण्डादण्डेन, मदधिरूढवृक्षम् = सिन्धुवादो पविष्ट तरुम्, आवेष्ट्य=वेष्टयित्वा, प्रसभं=हठात्, चाल-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यन् = धुन्वन्समूलमुन्मूल्य = आमूलादुत्पाट्य भूभावपातयंत् = धरायांन्यपातयत् । तेन = वृक्षेण, च सार्धं = साकं, निपतितं = पतितं, मां = सिन्धुवादम्, शुण्ड्या = करेण, गृहीत्वा = आदाय स्कन्धयो, अवस्थाप्य = उपवेश्य, मृतप्रायं = प्रायेण मृतं स्वयूथैः = निजसमूहैः, अनुसृतः = अनुगतः, कञ्चन, विजनप्रदेशं = निर्जनस्थानं, नीत्वा, अधः = नीचैः क्षित्वा = प्रक्षिप्य क्वचिद्, अयासीत् = अगच्छत् ।

सर्वं = सकलम्, एतत् = मम उपरि घटितं, स्वप्नविलसितमिव=स्वप्नघटितमिव, विचिन्तयन् = भावयन्, अहं = सिन्धुवादः कञ्चित् = स्तोकं, कालं = समयं, प्रतीक्ष्य, बीतगजशङ्कः = समाप्तकरिभयः, एकत्र, गिरिप्रदेशे = प्रर्वतभागे, कारिदन्तास्थिराशिसङ्कुले = गजदशहास्थिसमूहव्यापृते, स्थितम् = वर्तमानम्, आत्मानम् = स्वम्, अपश्यम् = व्यलोकयम् । तं च, प्रदेशं = स्थानं, तेषां = गजानां श्मशानस्थानं, दन्तलिप्सया = दशनेच्छुया भूयः पुनः गजहननान्मां = करिवधान्मां निवारयितुमिव = रोद्धुमिव, तैः = गजैः प्रदर्शितं, विलोक्य = दृष्ट्वा, शनैः = मन्दम्, ततः = तस्मात् प्रदेशात् प्रतिनिवृत्तः=प्रत्यागतः, एकेन, अह्ना = दिवसेन, एकया च, निशया = रजन्या मत्स्वामिनो, अन्तिकं = समीपम्, प्रत्यागमम् ।

समासः—स्वयूथैः = स्वस्य यूथैः, विजनप्रदेशं = विजनं, प्रदेशं, । स्वप्नविलसितम् = स्वप्ने विलसितम्, बीतगजशङ्कः = बीता गजस्य शङ्का यस्य सः गिरिप्रदेशे = गिरीणां प्रदेशे, करिदन्तास्थिराशिसङ्कुले = करीणां दन्तानाम् अस्थ्नां राशिभिः सङ्कुले । दन्तलिप्सया = दन्तानां लिप्सया, गजहननात् = गजानां हननात् ।

कोषः—'घसो दिनाह्नी' त्यमरः ।

व्याकरणम्—क्षित्वा = क्षिप् + क्त्वा । अनुसृतः = अनु + सृ + क्त ।

७. प्रश्नः—व्याख्येयोऽधोलिखितोंऽशः ।

स तु मद्दर्शनेनोद्विग्नो मदन्वेषणेच्छया तत्काननं गत्वा दृष्टसमुन्मूलितमदाश्रयपादपो मां करियूथामिषतां गतमुपरतं मन्यमानः सहसा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकुशलं प्रत्यागतं विलोक्यानन्दनिर्भरोऽभवत् । श्रुताखिलवृत्तश्च मया सह हस्तिनमारुह्य तं प्रदेशं गत्वा संगृहीतप्रचुरकरिदन्तराशि नंगरं प्रत्याजगाम ।

अथासौ मामब्रवीत्—भद्र ! जीवन संशये आत्मानं निपात्य मह्यमेतममितविभवप्रदं दन्तावलदन्तनिधिभाविष्कुर्वता त्वया वहूपकृतोऽस्मि । बहवः किलैतत्कर्मणि मया नियोजिता दासा एषां वन्यद्विपानांमामिषत्वमगमन् । दिष्ट्या सुरक्षितजीवितः प्रत्यागतोऽसि । तदहं त्वां दास्याद विमोचयामि । गृहणैतत्पारितोषिकमिति ।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रि रचिते सिन्धुवादवृत्ते सप्तमसिन्धुयात्रा प्रसङ्गे सिन्धुवादोक्तोऽयमंशः व्याख्यानाय दत्तः । अत्र दास्याद् विमोचनं वदति सिन्धुवादः हितवादम् ।

व्याख्या—सः = मम स्वामी, तु मद्दर्शनेन = सिन्धुवादानवलोकनेन, उद्विग्नः = व्याकुलः मदन्वेषणेच्छया = सिन्धुवादान्वेषणाभिलाषेण, तत्काननं = गजबहुलवनं, गत्वा, दृष्टसमुन्मूलितमदाश्रयपादपो = विलोकितोत्पाटित सिन्धुवादाश्रयतरूः, मां = सिन्धुवादं, करियूथामिषतां = गज समूहामिषतां गतम् = प्राप्तम् उपरतं = मृतं, मन्यमानः = स्वीकुर्वाणः सहसा = अकस्मात् सकुशलं = कुशलिनं, प्रत्यागतं = सम्प्राप्तं, विलोक्य = दृष्ट्वा, आनन्दनिर्भरो = हर्षाप्लुतः, अभवत् । श्रुताखिलवृत्तश्य = ज्ञातसकलकथश्च, मया = सिन्धुवादेन, सह = साकं, हस्तिनं = गजम् आरुह्य, तं = गजश्मशानं प्रदेशं = स्थानं, गत्वा, सङ्गृहीत प्रचुरकरिदन्तराशिः = सङ्कलित पर्याप्त गजदशनभरः । नगरं = स्ववासभूमिम्, प्रत्याजगाम ।

अथासो = पश्चात्स्वामी, माम् = सिन्धुवादम् अब्रवीत् = अकथयत् भद्र = आर्यः जीवनसंशये = प्राणसङ्कटे, आत्मानं = स्वं, निपात्य = प्रक्षिप्य मह्यम्, एतं = पुरस्थम् अमितविभवप्रदम् = वहुधनदं, दन्तावलदन्तनिधिम् करिदन्तनिधिम्, आविष्कुर्वता = ददता, त्वया = भवता, वहु = प्रभूतम्, उपकृतोऽस्मि, । वहवः = अनेके, किल = निश्चयेन, एतत्कर्मणि = करिदश-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नानयनरूपे, मया, नियोजिता = व्यापारिताः दासाः, एषां = गजानां, वन्यद्विपानां = कानन गजानाम्, आमिषत्वम् = खाद्यताम्, अगमन् । दिष्ट्या = भाग्येन, सुरक्षितजीवितः = सप्राणः, प्रत्यागतोऽसि = समायातोऽसि । तद् अहं, त्वां = सिन्धुवादं, दास्याद् = दासकर्मणः, विमोचयामि । गृहाण = स्वीकुरूष्व, एतत् = पुरो वर्तमान, पारितोषिकम् = उपहारम् इति

समासः—मद्दर्शनेन = मम अदर्शनेन, मदन्वेषणेच्छया = मम अन्वेषणस्य इच्छया, दृष्टसमुन्मूलितमदाश्रयपादपः = दृष्टः समुन्मूलितः मदाश्रयस्य पादपः येन सः करियूथामिषतां = करीणां यूथः तस्य आमिषतां, आनन्दनिर्भरः = आनन्देन निर्भरः, श्रुताखिल वृत्तः = श्रुतम् अखिलं वृत्तं येन सः, सङ्गृहीतप्रचुरकरिदन्तनिकरराशिः = सङ्गृहीतः प्रचुरः करिदन्तनिकराणां राशिः येन सः ।

जीवनसंशये = जीवनस्य संशये अमितविभवप्रदम् = अभितान् विभवान् प्रददाति तं; दन्तावलदन्तनिधिम् = दन्तावलानां दन्तानां निधिम्, वन्याद्विपानां = वन्यानां द्विपानां, सुरक्षित जीवितं = सुरक्षितः जीवितः = यस्ल सः ।

कोषः—'दन्तीदन्तावलां हस्ती' त्यमरः ।

व्याकरणन्—उद्विग्नः = उत् + विज + क्त ।

८. प्रश्नः—कार्या व्याख्याऽधोलिखितस्य ।

तस्यैतां कृपां कृतज्ञतयाऽङ्गीकृत्य स्वदेशं प्रत्यावर्तितुं कृताम्यर्थनं मां नन्वचिरात् करिदन्तसंजिघृक्षया समागतेषु पीतेषु त्वां विस्रक्ष्यामीत्यवोचत् । कञ्चित् कालं तेन प्ररुढप्रणयातिशयेन सह वसन् पोतागमं प्रतीक्षमाणः सानन्दमत्यवाहयम् ।

अथागतेषु पोतेष्वेकं तेन विसृष्ट भूरिद्विरददशनराशि लंब्धापरिमित पारितोषिकः समारुह्य ततः प्रस्थितोऽभवम् । मार्गे आपतितेषु केषुचिद् द्वीपेषु बहुना मूल्येन तं करिदन्तनिचयं विक्रीय कृतबहुधनसंग्रहः सुखपूर्वकं विदामपुरं पुनः समासदम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरम्—प्रसङ्गः—सिन्धुवादः हितवादं सप्तम सिन्धुयात्रोपसंहारम् कथयति श्री म० म० लक्ष्मण शास्त्रिरचितसिन्धुवादवृत्तसप्तमसिन्धुयात्रा-यामत्र ।

व्याख्या—तस्य = स्वामिनः, एतां, कृपां = दयां कृतज्ञतया, अङ्गी-कृत्य = स्वीकृत्य, स्वदेशं = निजदेशं प्रत्यावर्तितुं = प्रत्यागन्तुं, कृताभ्यर्थनं = विहितप्रार्थनं, मां = सिन्धुवादम् ननु, अचिरात् = शीघ्रं, करिदन्तसं-जिघृक्षया = गजदशनग्रहणेच्छया समागतेषु = सम्प्राप्तेषु, पोतेषु = प्रवहणेषु त्वां = भवन्तं विस्रक्ष्यामि = गमनानुमतिं दास्यामि, इत्यवोचत् = अकथयत् कञ्चिम् = स्तोकं, कालं समयं तेन, प्ररुढप्रणयातिशयेन = वृद्धप्रेमातिरेकेन, सह = साकं, वसन् = वासं कुर्वन्, पोतागमं = प्रवहणागमनं, प्रतीक्षमाणः = अवेक्षमापः सानन्दम् = सहर्षम् अत्यवाहयम् = व्यत्ययातयम् ।

अथ = पश्चात्, मागतेषु = समागतेषु, पोतेषु = प्रवहणेषु, एकं, तेन = स्वामिना, विसृष्टभूरिद्विरददशनराशिः = दत्तप्रचुरगजदन्तनिकरः, लब्धा-परिमित पारितोषिकः = प्राप्तवहूपहारः, समारुह्य = आरोहणं कृत्वा, ततः = तस्मात् प्रदेशात्, प्रस्थितोऽभवम् = अचलम् । मार्गे = पथि, आपतितेषु, केषुचिद्, द्वीपेषु = अन्तरीपेषु बहुना = प्रभूतेन, मूल्येन, तं = स्वामिदत्तं, करिदन्तनिचयं = गजदशनसमूहं, विक्रीय = विक्रयं कृत्वा, कृतबहुधनसंग्रहः उपार्जितप्रचुरधनः, सुखपूर्वकं = सुखेन विदामपुरं = स्ववासभुवम् पुनः = भूयः समासदम् = समागच्छम् ।

समासः—कृताभ्यर्थनं = कृता अभ्यर्थना यस्यतं । करिदन्तसंजिघृक्षया= करिणां दन्तानां संजिघृक्षया, प्ररूढप्रणयातिशयेन = प्ररुढः प्रणयस्य अतिशयः येन तेन, पोतागमं = पोतस्य आगमं, सानन्दम् = आनन्देन सह ।

विसृष्टभूरिद्विरददशनराशिः = विसृष्टः भूरिः द्विरददशनानां राशिः यस्मै सः, लब्धापरिमितपारितोषिकः = लब्धअपरिमितः पारितोषिकः येन सः, करिदन्तनिचयं = करिणां दन्तानां निचयं, कृतबहुधनसंग्रहः = कृतः बहुधनानां संग्रहः येन सः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोषः—'कुञ्जरोवारणः करी' इत्यमरः।

व्याकरणं—संजिघृक्षा = सम् + गृह् + सन्।

९. प्रश्नः—अधोलिखितस्य व्याख्या कार्या।

महाराजहारीतनृपतिं च सद्य उपेत्यात्मवृत्तान्तमभावयम्। मत्प्रत्यागमनविलम्बेन भृशमुद्विग्नोऽसौ नितरामुपरुढप्रहर्षः करिवृत्तश्रवणेनोद्वेलकुतुहलाश्चर्यो मदीयाः सप्तसिन्धुयात्राः सुवर्णाक्षरेषु समालेख्य स्वरत्नकोशे निधातुमधिकारिवर्गं समादिश्य बहुभिः प्रसादातिशयैर्मां सम्भाव्य महतादरेण व्यसृजत्।

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचितसिन्धुवादवृत्तस्य सप्तमसिन्धुयात्रामुपसंहरन् सिन्धुवादः हितवादं कथयत्यत्र।

व्याख्या—महाराजहारीतनृपतिं एतन्नामक स्वदेशनृपं, च, सद्यः = शीघ्रम्, उपेत्य = गत्वा, आत्मवृत्तम् = स्वप्रवासकथाम्, अश्रावयम् = श्रुतिविषयतामनयम्। मत्प्रत्यागमनविलम्बेन = सिन्धुवादपरावर्तनविलम्बेन, भृशं = बहु, उद्विग्नो = व्याकुलोऽसौ = हारीतनृपः, नितराम् = अत्यन्तम्, उपरुढप्रहर्षः = वृद्धहर्षः, करिवृत्तश्रवणेन = गजकथाऽऽकर्णनेन, उद्वेलकुतूहलाश्चर्यो = अतिवेणौत्सुक्यविस्मयः मदीयाः = सिन्धुवादीयाः, सप्तसिन्धुयात्राः = सप्तसागरप्रवासयात्राः, सुवर्णाक्षरेषु = हेमाक्षरेषु समालेख्य = लेखयित्वा स्वरत्नकोशे = निजरत्नसमूहे निधातुम् = स्थापयितुम् अधिकारिवर्गम् = शासकवर्गं, समादिश्य = आदेशं दत्वा बहुभिः = प्रचुरैः प्रसादातिशयैः कृपातिरेकैः मां = सिन्धुवादम् सम्भाव्य = सत्कृत्य, महताऽऽदरेण = बहुमानपूर्वकम्, व्यसृजत् = गृहगमनानुमतिं दत्तवान्।

समासः—महाराजहारीतनृपतिं = महाराजश्चासौ हारीतनृपतिश्च तम् आत्मवृत्तम् = आत्मनो वृत्तम्, मत्प्रयागमनविलम्वेन = मम प्रत्यागमने विलम्बेन, उपरुढप्रहर्षः = उपरुढः प्रहर्षः यस्य सः, करिवृत्तश्रवणेन = करिणः वृत्तस्य श्रवणेन, उद्वेलकुतूहलाश्चर्यो = उद्वेलाम् कुतूहलम् आश्चर्यं च यस्य सः, सप्तसिन्धुयात्राः = सप्तसंख्यकाः सिन्धूनां यात्राः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुवर्णाक्षरेषु = सुवर्णस्य अक्षरेषु, स्वरत्नकोशे = स्वस्य रत्नस्य कोशे, प्रसादातिशयैः प्रसादानामतिशयैः ।

कोषः—'मुत्प्रीतिः प्रमदो हर्ष' इत्यमरः ।

व्याकरणम्—उद्विग्नः = उत् + विज् + क्त ।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।
सिन्धुवादस्य वृत्तेऽस्मिन् गतायात्रा हि सप्तमी ॥७॥

उपसंहारः

१. प्रश्नः—अधोलिखितस्य व्याख्या कार्या ।

इत्येवं सिन्धुवादः सप्तसिन्धुयात्रावर्णनमुपसंहृत्य हितवादमुद्दिश्यावदत्-भद्र ! हितवाद । कच्चित्त्वया कश्चित् सोढमुदधिक्लेशो जनः श्रुतपूर्वः ? अपि भवानियतो महतः क्लेशाननुभवतो सम्प्रति शान्ति सुखोपभोगमन्याय्यं मनुते ? इति ।

अथवा

स तु 'आर्य सिन्धुवाद ! तथाविधान् यात्रापरिक्लेशाननुभूय समुपार्जितविभवो भवान् सम्प्रति विश्रामसुखोपभोगं सर्वथा कर्तुमर्हति । अहं पुनरात्मनो दीनावस्थया खेदितस्तथाऽनुचितं प्रालपम् । क्षमस्व उपभुङ्क्ष्व, चिरञ्च स्वपरिश्रमोपचितां श्रियम् इत्यवदत् ।

सिन्धुवादस्तस्मै प्रत्यहमिव दीनारशतमविसृज्य तमात्मनो दौवारिक-पदे न्ययोजयत् ।

उत्तरम्—प्रसङ्गः = अत्रश्री म० म० लक्ष्मणशास्त्रिरचिते सिन्धु-वादवृत्ते उपसंहारे कथानायकः सिन्धुवादः कथाश्रोतारम् हितवादं पृच्छति—सोढदुःखस्य सुखोपभोगोऽनुचितोऽस्ति वोचित इति ।

व्याख्या—इत्येवं = पूर्वोक्तप्रकारम्, सिन्धुवादः = कथावक्ता, सप्तसिन्धु-यात्रावर्णनम् = सप्तसागर प्रवासकथानिचयम्, उपसंहृत्य = समाप्य,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हितवादं = भारवहनशीलं कथाकारणम्, उद्दिश्य = सम्बोध्य अवदत् = अकथयत्—भद्र = आर्य, हितवाद, = सम्मानितभारवहनवृत्तिजन, कच्चित्, त्वया = भवता, सोढमदधिक—क्लेशः—अनुभूतसिन्धुवादाधिकपीडः, जनः = प्राणी श्रु तपूर्वः = आकर्णितपूर्वः ? नाकर्णित इत्युत्प्रेक्ष्य कथयति। अपि = प्रश्ने, भवान् = हितवाद, इयतो, महतः = प्रचुरसंख्यकान् क्लेशान् = कष्टान्, अनुभवतो = अनुभव विषयतां नयतः, सम्प्रति = अधुना, शान्ति-सुखोपभोगम् = शान्तिशर्मोपभोगम्, अन्याय्यम् = अनुचितं, मनुते = स्वीकरोति ? इति। स्पष्टतया विचार्य कथय इति भावः।

समासः—सप्तसिन्धुयात्रावर्णनम् = सप्तानां सिन्धुयात्राणां वर्णनम्, सोढमदधिकक्लेशः = सोढाः मदधिकाः क्लेशा येन सः, शान्ति सुखोपभोगं = शान्तेः सुखस्य च उपभोगं।

कोषः—'शर्म सात सुखानि च' इत्यमरः।

व्याकरम—उपसंहृत्य = उप + सं + हृ ÷ क्त्वा + स्यम्।

अथवा

उत्तरम्—प्रसङ्गः—श्री म० म० लक्ष्मणशास्त्रिरचित सिन्धुवादवृत्ते समुपसंहारे हितवादः श्रोताकारणं च कथाप्रवाहस्य उपक्रमवर्णनायां कथितस्य—'विधे ! कीदृशी सेयं तव वैषम्य प्रवणता—किन्नामहासुकृतमनेन समनुष्ठितम्'—इति रुपस्य वाक्यस्या नौचित्यं ज्ञानलवदुर्विदग्धत्वं चात्मनः स्वीकरोत्यत्र हितवादसमक्षम्।

व्याख्या—सः = हितवादः, तु, आर्यभद्र, सिन्धुवाद = षड्दिनेभ्यः दीनारशतदानरत, तथाविधान् = पूर्ववर्णितान् यात्रापरिक्लेशान् = प्रवासयात्रा-दुःखान्, अनुभूय = उपभुज्य, समुपार्जितविभवः = अर्जितबहुधन, भवान् = सिन्धुवादः सम्प्रति = अधुना विश्रामसुखोपभोगं = विश्रान्ति सातोपभोगं सर्वथा = सर्वकारेण, कर्तुम् = अनुभवितुम, अर्हति = योग्योऽस्ति। अहं = हितवादः, पुनः, आत्मन, = स्वस्य दीनावस्थया = दारिद्र्यावस्थया, खेदितः, तथा = पूर्वोक्तं, अनुचितम् + औचित्यरहितं प्राणयम् = अवदम्। क्षमस्व =

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुरु क्षमाम् उपभुङ्क्ष्व = उपभुज्यताम्, चिरं = बहुकालपर्यन्तम्, स्वपरिश्रमौपचितां = निजश्रमार्जितां, श्रियम् = लक्ष्मीम्, इत्यवदत् = इत्थं स्वानुचितोक्तिं स्वीचकार इति भावः ।

सिन्धुवादः = कथानायकः, तस्मै = हितवादाय, दीनारशतम्, अतिसृज्य = दत्वा, तं = हितवादम् आत्मनो = निजस्य दौवारिकपदे = द्वास्थपदे, न्ययोजयत् = नियुक्तमकरोत् ।

समासः—यात्रापरिक्लेशान् = यात्रासु परिक्लेशान्, समुपार्जितविभवः = समुपार्जितः विभवः येन सः, विश्रामसुखोपभोगं = विश्रामस्य सुखस्य उपभोगं, दीनावस्थया = दीनया अवस्थया, स्वपरिश्रमोपचितां = स्वेन परिश्रमेण उपचितां ।

कोषः—'शर्म सात सुखानि चं इत्यमरः ।

व्याकरणम्—अनुभूय = अनु + भू + क्त्वा + ल्यप् ।

२. प्रश्नः—अनुवादकर्तुः निवेदनम्—

एतत् सहस्ररजनी चरिताम्भोधिमन्थनात् ।
लब्धमत्यद्भुतं सिन्धुवादवृत्तं कथामृतम् ॥
आन्ध्रेण कविना नाम्ना श्रीमल्लक्ष्मणशास्त्रिणा ।
अर्थतः संस्कृते गद्येऽनूद्य सस्नेहमर्प्यते ॥
दोषान् मनुष्य सुलभान् समुपेक्ष्य क्वचित् सतः ।
आस्वादयन्तु रसिका एतद्रसममत्सराः ॥

उत्तरम्—प्रसङ्गः—अनुवादकर्तुः निवेदनमिदम् कथासमाप्तौ—

व्याख्या—एतत् = सिन्धुवादवृत्तम्, सहस्ररजनीचरिताम्भोधिमन्थनात् = सहस्ररजनी चरित नामकारबीभाषोपनिबद्धकथाग्रन्थपठनात्, लब्धं = प्राप्तम्, अत्यद्भुतं = विस्मय पेशलं, सिन्धुवादवृत्तकथामृतम् = सिन्धुवादवृत्तनामककथामृतम्, आन्ध्रेण = आन्ध्रप्रदेशीयेन, कविना = अनुवादकर्त्रा, नाम्ना = संज्ञया श्रीमल्लक्ष्मणशास्त्रिणा = एतन्नामकेन, अर्थतः, संस्कृते = देवभाषायाम्, गद्येऽनूद्यसस्नेहं = प्रेमपूर्वकम् अर्प्यते = दीयते, पाठ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काय इति शेषः। दोषान् मनुष्यसुलभान्, समुपेक्ष्य, क्वचित्सतः अमत्सराः = मात्सर्यरहिताः, रसिकाः एतद्रसम् = सिन्धुवादवृत्तरसम्, आस्वादयन्तु = आस्वादविषयतामानयन्तु।

कोषः—'मत्सरोऽन्यशुभद्वेषे' इत्यमरः।

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते।
सिन्धुवादस्य वृत्तेऽस्मिन् याति ग्रन्थो हि पूर्णताम्॥

१. प्रश्नः—सिन्धुवादवृत्तकारस्य संक्षिप्तः परिचयो देयः।

अथवा

म० म० लक्ष्मणशास्त्रिणो जीवनकथा लेख्या।

उत्तरम्—कर्नाटकदेशीयस्य अनुबङ्गलोरनगरम् यसरगट्टाग्रामोत्पन्नस्य कृष्णयजुर्वेदीयस्य सार्धैकशतवर्षपूर्वं वाराणसीमागत्य काशिराजेनेश्वरीनारायणसिंहेन स्वसभापण्डितपदेन सम्मानितस्य श्रीनृसिंह शास्त्रिणस्तनयः श्री लक्ष्मणशास्त्री १९३७ विक्रमाब्देऽवततार पृथिव्याम्। अयम् कृतयज्ञोपवीतो गुरुमुखादधीतकृष्णयजुर्वेदः १९०५ विक्रमाब्दे प्राप्तसाहित्याचार्यपदवीकः साहित्यानुरागादधीतांग्रेजीफ्रेञ्चजर्मनादिभाषाविशेषः टर्नरनामकपाश्चात्यविद्वान्सं पाठितप्राकृतः काशीस्थक्वींसकालेजे संस्कृतप्रधानाध्यापकपदमलङ्कुर्वाणो जीवनमत्यवाहयत्। सेवया प्रसन्नाः शासका महामहोपाध्यायत्वेन महापुरुषममुं सभाजितवन्तः।

अस्याग्रजावपि लोकविश्रुतावास्ताम् म० म० गङ्गाधरशास्त्री सी० आई० ई० म० म० श्रीराम शास्त्री च। सिद्धसरस्वतीकः प्रसिद्धिपराङ्मुखो विनोदप्रियस्वभावः शिष्यमित्रसहायकः कविरयम् सप्ततिसंख्यकान् वसन्तान् सुखं दृष्ट्वा २००६ विक्रमाब्दे चैत्रशुक्लप्रतिपत्तथौ शिवसायुज्यमवाप। पत्रपत्रिकासु दृष्टा रचना अस्य लेखधुरन्धरस्य यथा सूक्तिसुधायां 'शरद्वर्णनम्' शिशिरदशकं सुदर्शनचरित मभिनवबृहत्कथा च। अयोध्यासंस्कृतकार्यालयात् प्रकाशितम्—सुप्तप्रबुद्धम् अमरभारतीपत्रिकायां पाश्चात्यकविशेक्सपीयर नाटकानामनुवादाः प्रकाशिताः—हेमन्तकुमारः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(हैमलेट् नाटकस्य) वेतस्वतीसार्थवाहः (मर्चेन्ट आफ वेनिस नाटकस्य) भीमप्रभञ्जनः (दि टेम्पेस्ट नाटकस्य)। अन्याः रचनाः सन्ति—कालिदास-दशकम् रामचन्द्रनक्षत्रमाला, काशिकादण्डकम् रामाश्वघाटी प्रसूनप्रशंसनम्, निदाघः उपशल्यशंसनम् मर्त्येषु भेदः कियान् आशाविंशतिः जगदीशयात्रा प्रभृतयोऽप्रकाशिताः। आङ्ग्लभाषायामपि सन्ति रचना यथा—तर्कभाषा छन्दोग्योपनिषत् प्रभृतयः। समस्यापूर्तयः पद्यबन्धाश्चः बहुशः।

२. प्रश्नः—सिन्धुवादवृत्तस्य काऽपि एकायात्रा समीक्ष्यताम्।

अथवा

सिन्धुवादवृत्तस्य परिचयो देयः।

अथवा

कस्य अपि यात्रायाः कथा स्वशब्देषु लेख्या।

उत्तरम्—सिन्धुवादवृत्तम् म० म० लक्ष्मणशास्त्रिणो रचना अस्ति। अत्र सिन्धुवादस्य सप्तसिन्धुयात्राणां मनोहरं सरलं सरसं वर्णमस्ति। व्यावहारिकसंस्कृतप्रयोगपरम्परा विलसति अत्र।

कथासारः—अस्ति विदामपुरो नाम देशः। तस्य देशस्य शासकोऽस्ति हारीतः। तस्यैव समकालिकोऽस्ति सिन्धुवादः। स च वणिग्वृत्तिः। बहुधनोऽयम्। प्रचरति ग्रीष्मे तपति सूर्ये एकदाऽऽयति हितवादी नाम भारवाहकः शिरसि धारयन् भारं। दृष्ट्वाहर्म्यछायायां क्षणं विरमति विश्रामकरणाय। प्रसङ्गेन गृहसेवकेभ्यः गृहपति परिचयमवाप्नोति। खिन्नान्तरङ्गः तत्-समृद्ध्याऽऽत्मीयां दुरवस्थां तुलयति। गते तस्मिन् कर्णपरम्परया कथनमिद-मापततिस्म कर्णयोः गृहपतिमहोदयस्य। सोऽकिञ्चन—तामनुमीय सेवकान् सम्प्रेष्य हितवादमाह्वयति। प्रतिदिवसं तं स्वसमृद्धिकथां श्रावयति। हितवादिने दीनारशतं ददाति तोषणाय।

अभ्यागतैः समं भोजयित्वा तं भारवाहकं हितवादनामानं सभाजयति। कथाभोजनान्ते च विदायं दत्वा ससुखं निवसति। इत्थं हितवादो भवति माध्यमः पौरुषप्रचारस्य। सिन्धुवादश्च पामरजनानांहृदये स्वसमृद्धिविषये

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वर्तमानामनुचितां धारणाम् प्रसारयति प्रकाशयत्यौचित्यमपि। समस्तेऽस्मिन् भूवलये प्रत्येको धनवान् बलवान् बुद्धिमान् एवमेव निर्धनम् मूर्खं निर्बलम् बोधयितुमुपक्रमते।

तत्र-प्रथम सिन्धुयात्राकथा—1

प्रथमां यात्रां सिन्धुवादः कथयति सभ्यजनसंसदि यौवनेऽहंव्यसनी। पैतृकधनस्योत्तमांशमक्षपयम्। दैव योगादुदियाय चिन्ता भविष्यविषयिणी। खिन्नचेताः व्यवसायकरणाथागच्छम् वासरपुरम्। त्रिलोक्य तत्र समुद्रयात्रिवर्गं तेनैवसहाचलम्। मार्गे समुद्रजलमध्येऽवलोकितो द्वीप एकः। भोजनादि करणाय तत्रागच्छम्। निवृत्तभोजनेषु चास्मासु स द्वीपः प्रचचाल। वस्तुतः स महाग्राह असीत् क्षणेन सः समुद्रे न्यमज्जत्। विधिप्रेषितमधिरुह्य काष्ठफलकं प्रवहन्ननिशमपरं द्वीपं प्रायम्। सौभाग्यात् तत्रावलोकिता महाराजमिहिरस्य अश्वपालाः। तैः सह परिचयो जातः। साकमेभिर् मिहिरराजधानीमगच्छम्। राज्ञा सम्मानितोऽहं तत्रावसम् किञ्चित्काल विधिविधानात् स एव पोतः समाजगाम यम् त्यक्त्वाऽहमत्रागतः। प्रत्यभिज्ञाय पोतं पण्यराशीन् पोताऽध्यक्षं च स्वपरिचयं तस्मै दत्वा स्ववस्तूनि गृहीत्वा उपायनभूतं किञ्चिद् मिहिरमहीपालाय अददाम्। तदनुज्ञामवाप्य लक्षाधिकदीनार दीर्घोऽहं वासरपुरं यथा स्वभवनायाचलम्।

समीक्षणम्—भाग्यवादितात्र संयोजिता श्रमे। सिन्धुवादोऽत्र नायकः। रसोऽद्भुतः। शैली वैदर्भी। नूतनो विन्यासः शब्दानां। श्रवणतत्परा च सभा कुतूहलिनी। स्वपौरुषप्रचारो लक्ष्यः। नायकेऽस्ति उत्साहः। समुद्रमज्जनेऽपि स न त्यजति धैर्यं। विपदि धैर्यं धारयन् सः महात्मनां स्वभावमनुकरोति। परिस्थितिसमायो जनस्याद्भुतं कौशलं वरीवर्ति नायके। ग्राहावतरणे भ्रमालङ्कारः स्फुटः। नायकस्य धीरतां वीरतां प्रत्युत्पन्नमतित्वं चावलोक्य पाठकः प्रभावितो भवति।

अथ द्वितीयसिन्धुयात्रा कथा—2

प्रथमयात्रायां प्राप्तेन धनेनासन्तुष्टः सिन्धुवादो द्वितीयां सिन्धुयात्रामारचयति। पुनः सार्थवाहैः साकमधिरुह्य पोतं गृहान्निरगच्छति। स

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वर्णयति सभासमक्षम् अस्यां यात्रायां द्वीपाद् द्वीपं परिभ्रमन् द्वीपं निर्मानुषमेकमगच्छम् । तत्र कदाचित् विश्रामनिरतेषु सहचरेषु मां निद्रा परवशमकरोत् । सुप्तोत्थितश्चापश्यमेकं प्रवहणम् व्रजन्तम् । ततो निष्क्रमणाय उपायमचिन्तयम् । सुचिरं विचारपरम्परामग्नश्चात्मनो रक्षणार्थमृते शकुन्तमन्यत् माध्यमं नापश्यम् । यदाऽसौ हस्तशतप्रमाणं स्वीयमण्डं समुपाविशत् तदा शनैश् शनैस्तत्र गत्वा स्वाशिरस्थवसनेनात्मानं तन्नखपञ्जरे संयुक्तमकरवम् । तथैव कथञ्चित् क्षपा क्षपिता । प्रातः काले सः पक्षी उत्पपात । वहोः कालानन्तरमुपत्यकाया मेकस्यामवतरति स्म । शीघ्रं स्वीयं बन्धनमकर्तयम् । तत्रासन् महाजगराः । महाशकुन्ताश्च तान् खादयन्ति स्म यो माम् अत्रानयत् सः पक्षी सद्योऽजगरमेकमादाय चञ्चुभ्याम् पुनरुत्पततिस्म अज्ञात प्रदेशाय ।

अहं तु तत्रैवासम् । परितः गगन चुम्बिशिखराणि यत्रारोहणमासीत् दुष्करं । किन्तु हीरकखण्डान्यपि तत्रैव दृष्टानि अजगरकीर्णानि । इमे बहुविशाला आसन् ह्यजगराः । तन्मुखेषु गजनिगलन क्षमता आसीत् । का कथा तत्र पामराणं जनानां मद्विधानां । इमे गरुडभयात् दिवसे गुप्ता रात्रौ च स्वच्छाचाराः । सर्वत्र भ्रमति पश्यति एव मयि गतोस्तमर्कः । जीवनाशाऽपि गता । तावदेव दृष्टा एका दरी । कुतश्चित् एकां शिलामानीय तत् छिद्रं पिहितं किन्तु सर्पभीः दोलयतिस्म न केवलंमनः अपि तु सकलं शरीरम् । सहानीतं भोज्यम् भुक्त्वा जाग्रदेव निशामनयम् । फूत्कृतिरजगराणां हृदयं विदारयतिस्म । यमः समुस्थित एव लक्ष्यते स्म । येन कदाचिद् भयेन कदाचित् लोभेन कदाचित् चिन्तया कदाचिदाक्रोशेन कदाचिद्घृणया दन्दह्यमानः कथमपि निशामनयम् ।

उदिते सूर्ये प्राणाः सुस्थिराः अभवन् । निर्गत्य ततः, इतस्ततः भ्रमन् पाषाणमेकमाश्रयन् रात्रिजागरणदस्वपम् । मांसखण्डपातध्वनिमा प्रवृद्धः विस्मितोऽपि नाविकैः पूर्ववर्णितां हीरकोपाख्यान मनुस्मृत्य प्रकृतिस्थोऽभवम् संगृहीत हीरकनिचयः मांसखण्डैरात्मानमाच्छाद्य निश्चेष्टोऽभवम् गृध्रपातं प्रतीक्षमाणः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालो बलीयान् । आगतेषु गृध्रेषु एकः स्थूलः मां शिखरमनयत् । वणिजां कोलाहलेन व्यपगते गृध्रे तदवस्थं मां दृष्ट्वा ते विस्मिता आसन् । मत्कथां श्रुत्वा ते मां स्वशिविरमनयन् कृतस्वागतः हीरकोपहारैस्तान् परितोष्य पोतावतारभुवमागत्य प्रवहणमधिरुह्य रोहणं गत्वा तत्र सुलभवस्तुजातं हीरकखण्डैरादाय वासरपुरमगच्छम् ततश्चागच्छम् विदामपुरं ।

समीक्षणम्—कथायामत्रास्ति बाहुल्यमस्वाभाविकवर्णनानाम् । सर्वं भाग्यादेव भवतीति स्वीकृतिरेवात्र निर्वाहविधिः । प्रथम यात्रातो लब्धशिक्षोऽयम् पुनः तादृशमेव कार्यं करोति इति विस्मायावहः । प्रथमयात्रायां महाग्राह कल्पनाऽऽसीदुचिता । अनुभवाऽभावात् । प्रथमप्रवासात् तत्रत्यम् परिस्थितिकाठिन्यमनुमानगोचरम् अत्र तु निम्नालिखिता विरसताः कष्टक्लिष्टाः पोतावतार स्थलं निर्जने प्रदेशे न भवति । जलफलमूलसमीपं जनानां भवति वासः । मानवः तत्रैव स्वगृहं रचयति यत्र सारल्येन मिलति जलं, गृहनिर्माणार्थं काष्ठं, फलयुक्ताः तरवः, गमनागमनसाधनं च । अत्र सर्वमस्ति मानवजीवनसाधकं वस्तु किन्तु मानवाभावोऽपि वर्ण्यते ।

प्रवहणं नायाति तटं । प्रधानजलमार्गस्थात् प्रवहणात् तटं नीयते जनः लघुतरीमाध्यमेन । अत्र जनाः प्रवहणात् तटमायान्तीति वर्ण्यते परम्पराविरुद्धं । असीत् तत्राऽपि नौव्यवस्था चेत् कथं निर्जनत्वं ?

प्रथमयात्रायां सहचरा नष्टा । अत्र ते कथं परित्यज्य गता ? किं ते अपरिचिता आसन् । घटिकार्धमात्रमपि सहावस्थानं परिचयं जनयति तस्मिन्नेव प्रवहणे साकमागता साकमेव व्यापारनिरता द्वीपात् द्वीपं गता अपरिचिता इवात्र वर्णिता हन्त ! विशिष्टाः ते ।

किं व्यापारवस्तुजातं झोलिकानयनयोग्यमासीत् ? यत्ते स्वयमेवागत्य पोतमारुरुहुः । न चेन् केन यानेन द्वीपात् द्वीपं जग्मुः, कमददुः स्वीयं वस्तु, केन च किं स्वीचक्रुः, कथमत्राऽऽजग्मुः पोताऽऽरोहणाय इति सर्वं संशयास्पदं

गृध्रस्य मानवेन मांसेन हीरकेन च सहोत्पतनवर्णनमत्यन्तकल्पनापेशलम् । चञ्चुमाध्यमेन सः कमङ्गं गृहीत्वा गामिष्यति ? मांसखण्डानि कथं शरीरे संसक्तानि । किमसौ निर्वस्त्रो भूत्वा सर्वं हीरकमांसादिकमवध्नात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विसङ्गतिचयस्यास्य समाधानार्थमेक एवास्ति उपायः अद्भुतरस-स्वीकारः। तल्लक्षणं यथा—

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः।
स्तम्भः स्वेदोऽथ रोमाञ्च गद्गदस्वरसम्भ्रमाः॥
तत्र नेत्रविकासाद्या अनुभावा प्रकीर्तिताः।
वितर्कावेगसम्भ्रान्ति हर्षाद्या व्यभिचारिणः॥

सम्पूर्णोऽयं लोकातिगमोऽत्र भूषणं भविष्यति। लोकयात्रानुसारिणि वृत्ते न तत्फललाभः।

तृतीयसिन्धुयात्राकथा—3

सुखमवसत् सिन्धुवादः। विस्मृत्य समुद्रप्रवासकष्टं यौवनोचितया चोत्सुकतया प्रेरितः पुनश्चचाल। विदामपुरात् वासरपुरं ततश्च पोतमारुह्यानेकान् द्वीपान् बभ्राम। एकस्मिन् दिवसेऽतुदत् प्रभञ्जनः? पोतचालको व्याकुलो भूत्वा हिंस्रजनावृतं द्वीपमनयत् पोतमसूसुचत् पोतस्थान् यद् देशोऽयं नरभक्षकै र्वन्यमानुषैरावृत्तश्च। वयम् चिन्तिता परवशाश्च। नासीत् तत्र सहायकोऽस्माकम् विना विधिं। तटमागच्छत्येव पोते वन्यमानुषाः पर्यवेष्टयन् पोतं। पोतरज्जुसाहाय्येनागत्याभ्यन्तरं सर्वान् हठात् कूलमवतारयन्। वन्यमनुषाणां सङ्केतेन पथि फलमूलानिभक्षयन्तोऽपि वयं महत्प्रासादमेकमगच्छाम। बलात्प्रवेशिताश्चाभ्यन्तरं दृष्ट्वा तत्रत्यं दृश्यं निष्प्राणाइव वयं सञ्जाताः। विलोक्यास्थिपर्वतं मरणं ध्रुवमिति निश्चित्य निश्चेतना अभवाम। अनन्तरमेवाजगाम तीक्ष्णनखः पुरुषः। सर्वान् परीक्ष्य मेषशावकवत् स्थूलतमं पोतचालकं मारयित्वा वह्निज्वालजालं दर्शयित्वा चखाद सः। घर्घरध्वनिना सुख सुप्तः प्रभातेऽगच्छत् क्वचित्।

पुनः सायं समागत्य तथैव एकं भुक्त्वाऽस्वपत्। सिन्धुवादश्च स्वसहचरैः साकमभिमन्त्र्य काष्ठफलकनिचयंनिर्माय गोपनीये स्थाने संस्थाप्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तान् फलकान् रात्रौ सुप्ते नरभक्षके तन्नेत्रयोः शूलेन सम्पीड्य तमन्धतामनयत्। ततमवाप्य ते प्रभातप्रतीक्षारता एव आसन् यावदाजगाम सः नरभक्षकः द्वाभ्यां सहचराभ्यामनुगतः। तान् दृष्ट्वा काष्ठफलकमारुह्य वाणिजः पलायनं चक्रुः। किन्तु पाषाणखण्डैराहत्य ते तान् अमज्जयन्। केवलमवशिष्टः सिन्धुवादः सह सहचराभ्याम्।

चित्रा दैवगतिः। प्रवहन्तःते मृद्वीकबहुलं द्वीपमाजग्मुः। तत्र सिन्धुवादवर्जं द्वौ वाहसोदरशायिनौ जातौ। सिन्धुवादश्च विधिवशादवशिष्टः पोतमायान्तमारुह्याजगाम स्वभवनमवाप च स्वधनं पोतचालकरक्षितम्।

समीक्षा—'शिरसि मुण्डिते ग्रावापातः' इति पारम्परिकं कथनं सिन्धुवादविषये चरितार्थं। यदा एव स सिन्धुयात्रां करोति तदा एव दुर्घटनाग्रस्तो भवति। किन्तु बुद्धिः सहचरी तस्य। सः न याति व्याकुलत्वम्। विषमावस्थास्वपि न त्यजति साहसमुद्योगं च। मानवजीवनेऽस्ति आवश्यकता ईदृग्विधस्यैव धैर्यस्यसाहसस्य चोद्योगस्य।

एका विसङ्गतिरत्र दुनोति पाठकम्। यदा वन्यमानुषाः सर्वान् तटे समानीतवन्तः पोताध्यक्षश्च सर्वप्रथममेव मारितस्तु केन पोतो नीतः प्रभञ्जनोत्तरं? नरभक्षकेन मारणकालेऽपि पोताध्यक्षपदस्यैव प्रयोगः। पण्यवस्तुसम्प्रदानसमयेऽपि पोताध्यक्षपदस्यैव प्रयोगः। कः भक्षितः, कश्च पोतमारोहयति सिन्धुवादं? यं पोतं सिन्धुवादः त्यजति नरभक्षकद्वीपतटे तमेवाश्रयति सहचरहीनः प्राप्नोति च स्ववस्तुनिचयं। भिन्नपोतप्रकल्पने पूर्वस्थापितपण्यवस्तुप्राप्तिरसम्भवा। स एव पोतः स एव पोताध्यक्षः इति स्वीकारे वदतोव्याघातप्रसङ्गः। यथोपरिदर्शितः। पोताध्यक्षः पोतचालकश्च भिन्नावितिस्वीकृतिरेवास्ति मार्गः। तथात्वे पोताध्यक्षः किं वक्ति पोतस्वामिनं? एतादृशी परम्परा नास्ति। पोतचालकश्च कथं त्यक्तः वन्यमानुषैः? यदा ते तटागमनात् प्रागेव पोतं विविशुः तदा चालकः कुत्र अगोपायत् आत्मानं? यदा सर्वे वाणिजः हिंसकद्वीपे एव आसन्। कानादाय सः जगामग्रम् चालकः?

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनुवादकर्ता मूललेखकमनुकरोतीति सुव्यक्तमेव। अथ च भवन्ति पोताः द्विभूमिकाः त्रिभूमिकाः चतुर्भूमिका वेति कल्पनीयं। तत्र एकभूमिकास्थिता जना एव दृष्टा अवतारिताश्च वन्यमानुषैः। अथवा एकभूमिकास्थजनावतारणलीनेषुवन्यमानुषेषु अवशिष्टभूमिकास्थजनैरात्मरक्षणोयायाः विहिता इति प्रकल्पनमुचितम्। तानेवापरभूमिकास्थजनानादायासावगच्छत स्वेष्टमिति विभावनीयम्। पोताध्यक्षस्य स्वामीत्वेन स्वीकारेऽपि न काचित् हानिः। गच्छन्ति हि स्वाभिनोऽपि सागरविहारायेति वाच्यम्। एकस्यैव शब्दस्य प्रयोगः भिन्नव्यक्तिस्वीकरणोत्तरः। वैरस्यमेव कल्पते विस्मयाय।

चतुर्थ सिन्धुयात्रा कथा—४

धनप्राप्तीच्छया सिन्धुवादः चतुर्थीं सिन्धुयात्रां करोतिस्म। प्रस्थितस्यास्य पोतः प्रभञ्जनग्रस्तः सन् मज्जतिस्म। कथानायकश्च कतिपयैः सहफलकमेकमारुह्य तटमागच्छतिस्म। फलान्युपभुज्य शोकग्रस्तः सन् सह सहचरैः अस्वपत् तटे एव। प्रातः दूरतः जनान् दृष्ट्वा तान् गन्तुमियेष साहाय्याय। तावदेव खड्गधारिभिः निगडिता वणिजः भिन्नभिन्नगृहेषु नीता। कथानायकश्च पञ्चसहचरै सहनीतः एकस्मिन् प्रकोष्ठे। तत्र तै मूलम् दत्तं कस्यचिन् तरोः भक्षणार्थं। बुभुक्षितैः पौनः पुन्येन प्रेरितैश्च वणिग्जनैः भुक्तं तन्मूलम् कथानायकवर्जैः। भुक्त्वा तन्मूलम् तेषां मतिरव्यवस्थिता जाता। तदनन्तरं नारिकेलतैलपक्वमोदनं भोजयित्वा पीवरतां नीत्वा च चत्वारो वाणिजः नरभक्षकैर् भक्षिता। कथानायकस्तु तेषां कृत्यमनुमीय प्रतिदिनं स्वल्पतरं खादन् कृशतामगच्छत्। भ्रमणैन भविष्यत्ययं स्थूल इति विचार्य ते वृद्धैकसंरक्षणेऽममुं भ्रमणायाज्ञापितवन्तः। एकस्मिन् दिवसे समाहूयमानोऽपि दूरतरं गच्छन् सिन्धुवादः पलायितोऽभवत्। रात्रिन्दिवं चलन् सः दिनेऽष्टभे समुद्रकूलमवाप। तत्र मरिचसंचयलीनजनैः सह पोतमारुह्य तेषां वासभुवं जगाम। तैरयमुपस्थापितः नृपसभक्षम्। श्रुत्वा वृत्तं दयया पालितोऽवसत् कतिपयदिनानि।

कदाचित् तत्रत्यान् पर्याणादिरहितं घोटकमारुढान् दृष्ट्वा कारणमवगम्य लौहकारं चर्मकारं च गत्वा घोटकालङ्कारान् निर्माप्य राज्ञे न्यवेदयत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदलङ्कारालङ्कृतघोटकमारुह्य राजाऽददातुपायनान्यस्मै। धनिकैरपि तथा कृतम्। प्रसन्नः नृपः विवाहप्रस्तावमकरोत्। कथानायकः तत्प्रस्तावम् स्वीचकार। कदाचित् स्वमित्रम् मृतया पत्न्या सह महागर्ते निक्षिप्तमालोक्य राजानं पृष्ट्वा चाऽजानात् परम्परामस्य द्वीपस्य। वैदेशिकैरप्यनुलङ्घनीयोऽयं नियम इति ज्ञात्वा भृशं तुतोद।

कालेन मृताऽस्यपत्नीकथानायकस्य। राजा धनिकाः जनता चामुमपि पत्न्या सहैव महागर्ते न्यक्षिपन्। जीवितजनकन्दनवहुले शवनिचयमध्ये कृपया भगवतः कथञ्चिज्जीवन् सः जलौकससङ्केतनावाक्शिरश्चलन् सिन्धुतटमाजगाम। पलायनमार्गमवगम्य पुनः गत्वा गुहां शवभूषणान्येकत्रीकृत्य पुनराजगाम तटं भाग्यवशादागच्छन्तं पोतमारुह्य चायात् स्वदेशं।

समीक्षा—

बीभत्सरस पेशला कथाऽत्र विलसति। जुगुप्सास्थायिभात्रः नीलवर्णो महाकालदैवतः दुर्गन्धालम्बन मरणादिव्यभिचारिभावः बीभत्सरसोऽत्र पाठक हृदये प्रतीयते। बीभत्सरसलक्षणं यथा साहित्यदर्पणे—

जुगुप्सास्थायिंभावस्तु बीभत्सः कथ्यते रसः।
नीलवर्णो महाकालदैवतोयमुदाहृतः॥
दुर्गन्धमांसरुधिरमेदांस्यालम्वनं मतम्।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्॥
निष्ठीवनास्यवलन नेत्रसङ्कोचनादयः।
अनुभावास्तत्रमतास्तथां स्यु व्यभिचारिणः॥
मोहोपस्मार आवेगो व्याधिश्च मरणादयः॥

शववस्त्रभूषणादिकर्षणं तस्मिन् गर्ते भोजनजलपानादिकरणं, जीवितानां हननं तदंशग्रहणम् अवाक्शिरश्चलनं सर्वं बीभत्सरससाधकम् भूषणमेव, न च दूषणं। स्वीयाः प्राणाः कियन्तः प्रिया भवन्ति इत्यत्र द्रष्टुं शक्यते भाग्यं यस्य स जीवति इत्याभणकमत्र चरितार्थतां याति। तरति शोकमात्मविदिति नियमः प्राणरक्षणेऽपि संगच्छते। वणिक्वर्गः धनाय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सततं यतते। भवेन्मदिरा मांसं कुणपः देशःविदेशो वा, ते स्वधियाऽर्जयन्ति। मनुष्यः सुखाशया दुःखमपि क्रीणाति। यो विवाहप्रस्तावः समभिनन्दितः हर्षेण सिन्धुवादेन सः चाज्ञातरुपेण मृत्यु प्रस्ताव एवेत्याभाति। इत्थमेव सर्वोजनः सुखाशया सर्वं करोति कर्म किन्तु विधिविधानात् तदेव कल्पतेदुःखाय। इति सांसारिकी मानसिकताप्यत्र प्रदर्शिता कविना।

पञ्चमीसिन्धुयात्राकथा—5

गृहवासादुद्विग्नः सिन्धुवादः पञ्चमसिन्धुयात्रामकरोत् स्वीये पोते। निर्जने द्वीपे गते पोतेऽवतारिताः वणिजः सिन्धुवादवारिता अपि विशालमेकमण्डं दृष्ट्वा ततो निर्गच्छन्तं शावकं भुक्त्वाऽऽयान्तौ तत्पितरौ विलोक्य पुनः पोतमारुरुहुः। तौ पक्षिणौ च शिलाभिः प्रहरन्तौ पोतं तदधिरुढजनान् च सिन्धुतलं प्रेषयामासतुः। दैवात् फलकमेकमारुह्य सिन्धुवादः समतलभुवमाजगाम। उद्यानवन्मनोहरेऽपि स्थाने एकाकित्वेन भीतः एकस्मिन् तीरे निर्झरस्य वृद्धमेकमपश्यत्। तं गत्वा विपदग्रस्तोऽयमिति मत्वा तत्सङ्केतेन स्कन्धयोरारोप्य निर्झरपारमनयत् सिन्धुवादः। तत्र तेन वृद्धेन कण्ठग्रहं पीठितः एकां तुम्बीं दृष्ट्वा तां तत्रभवेन द्राक्षारसेन पूरयित्वाऽऽसवतामानीय तस्मै वृद्धाय पातुमदात् सिन्धुवादः। पानोत्तरं मदोन्मत्तं तं शिलायां क्षिप्त्वा अमारयत्। वृद्धसंकटान्मुक्तः पोतमारुढः सः पत्तनमेकमाजगाम। तत्र सहचराननुसरन् नारिकेलफल प्राप्तये वृक्षस्थान् वानरान् शिलाभिः जघान। वानरैश्च नारिकेलफलै र्मारितः तान् नारिकेलफलाम् सङ्गृह्य विक्रयेण धनानि समुपार्जयत्। ततः कुत्रचित् मौक्तिकशुक्तीनां क्रयेण विक्रयेण चोपार्जितधनः सकुशलं वासरपुरं ततश्च विदामपुरमाजगाम। अर्जितधनस्य दशांशं धार्मिककार्ये विनियुज्य ससुखमवसत्।

समीक्षा—

यात्राचतुष्टये समुपार्जितधनः सिन्धुवादः कथानायकः पञ्चमीं यात्रां स्वीये पोते प्रारभति। मानवे विस्मयावहवस्तुदर्शनोत्तरं कौतूहलं जागर्ति एव। विजनतटगतात् पोतात् बहिरागता वणिजः विशालमेकमण्डं खादन्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्र वणिजां भक्ष्याभक्ष्यविचाराभाव एव न दर्शितः अपितु विस्मयावहस्यादृष्टपूर्वस्य विशालस्याण्डस्य भक्षणे कियती तृप्तिः कीदृक्स्वादु कियान् लाभः कियती हानिरित्यपि दर्शयितुमिच्छति कविः। रसनां तर्पयितुं जीवनमर्पयति सर्वो लोकः इति विवक्षुः लेखकः समायोजयति कथामिमाम्। वने वसन्तः स्थविरसदृशाः जना वैदेशिकमनोवृत्यनुसाररचिता न च भारतीयपरम्परायुक्ताः। भारतीयैः रचिते साहित्ये वनमस्ति प्रसिद्धं सरलतायै साधुतायै न च दुर्जनतायै। विपिने वसन्ति महर्षयः येषां परोपकारिण मपि दुनोति। दुर्जनानां स्वभावः भवत्येव विचित्रं। शठे शाठ्यमाचरति सिन्धुवादः तं मारयित्वा। अवर्णितायां स्थविरकृतघ्नतायां सिन्धुवादस्य परोपकारभावना आसवनिर्माणकौशलं वुद्धिमता तितिक्षा शौर्यं पाठकाक्षिपथं नाश्रयेत्। मानवीयै गुणैः युक्तास्ति चरित्रं सिन्धुवादस्य इति दर्शयति लेखकः।

षष्ठसिन्धुयात्रा कथा— 6

पञ्चमसिन्धुयात्रासमाप्त्यनन्तरमुवास सिन्धुवादः वर्षमेकम्। पुनश्च प्रवासाय चचाल। बहुदूरे गते प्रवहणे वात्याचक्रमुदियाय। शिलासमूहं नीत्वा च प्रवहणम् खण्डयाञ्चकार। पोतारूढा जनाः पण्यवस्तूनि समादाय द्वीपमेकमवातरन्। भोजनाऽभावात् मृतेषु सर्वेषु जीविताबशेषः कथानायकः सिन्धुवादः फलकाश्रयेण वहन् कृष्णपुरुष परिवृत्तमात्मानमपश्यत्। तैश्च राजसदनं प्रापितः। असौ द्वीपाधिपतिरपि तत्कथां श्रुत्वा प्रसन्नमनाः सिन्धुवादमरक्षत्। किञ्चित्कालमुषित्वा तत्र सिन्धुवादः गृहगमनायानुमतिमियेष। प्राप्तानुमतिश्च स्वस्मै स्व नृपाय च प्राप्तोपहारश्चचाल ततः स्वदेशाय। स्वदेशमागत्य नृपोपहारं नृपाय समर्प्य सः स्वभवनमाजगाम।

समीक्षा—प्रत्युत्पन्नमतित्वेन ईश्वरेच्छया च सिन्धुवादः विषमपरिस्थितिष्वपि जीवति। अस्यां यात्रायां सः पोतभङ्गमेव पश्यति न च प्राप्तपुरुषैः मारणशङ्काम्। सागरात् प्रवहन्त्यो नद्यः समतलभुवभागत्य कृषिसिञ्चनोपयोगितां धारयन्तीति प्रतीतिरद्यापि दृष्टिपथमारोहति। अत्रत्यो राजा स-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्मानं विसर्जयति। सिन्धुवाददेशनृपतये चोपहारमपि ददाति। अनेन तस्य मैत्रीभावं दर्शयति कविः। अनुवादकारकस्य काठिन्यमत्र स्फुटमेव। सः मूललेखकमनुकरोति। मूललेखकश्च वणिग्वृत्तिः यतो हि सः न वर्णयति प्रकृतिसुषमां राजधानिं राज्ञः शासन व्यवस्थां वा। केवलं तमेवांशमाश्रयति येन शीघ्रं कथापूरयेत्।

सप्तमसिन्धुयात्रा कथा—

यात्राक्लेशभीतः सिन्धुवादः हारीतमहीपाज्ञया सप्तमीं यात्रामारचयति उपहारसम्प्रदानाय। पोतमारुह्य निर्विघ्नं द्वीपाधिपं दृष्ट्वा हारीतमहीपति दत्तं रत्नादिकं पत्रं च तद्द्वीपनृपायदत्वा तस्मात् पारितोषिकमादाय गृहाय चलति। मार्गे दासव्यवसायिनः वणिजः सर्वस्वहरणपूर्वकं सर्वान् पोतस्थान् कञ्चिद् द्वीपं नयन्ति। तत्र सिन्धुवादम् विक्रीणन्ति। एकश्च धनी जनः क्रीणाति। सिन्धुवादः तत्गृहं गत्वा सेवारसप्रसन्नेन स्वामिना जङ्गलं नीयते। तत्र गजान् मारयितुं स्थाप्यते। बहून गजान् हत्वा सः एकस्मिन् दिने गजेनेकेन मारितप्रायो जीवति कथञ्चित्। स्वामिनं गत्वा वृत्तं निवेदयति। श्रुतकथः स्वामी हृष्टः गृहगमनानुमतिं ददाति सिन्धुवादाय। स्वदेशमागत्य हारीतनृपं दृष्ट्वा सर्वां कथां श्रावयित्वा गृहमायाति। हारीतश्च कथां स्वर्णाक्षरेषु लेखयित्वां स्वकोषागारे स्थापयति।

समीक्षा—कथायामस्यां नायकः पूर्ववत् दृढोत्साहः दर्शितः, गजेन तदाश्रितवृक्षोत्पाटने कृतेऽपि सः जीवनाशां न त्यजति। विधेरानुकूल्यमेवास्तिकारणमत्रापि। अन्यथा गजमारणोत्तरं मानवस्य जीवनधारणमसम्भवम्। हन्तृ गजोऽपि परिचिनोति तरुं, स्वजातिहन्तारं। विस्मयबहुलता एवात्र कारणम् पाठकाकर्षणे। प्रकृतिरत्रापि पूर्ववदुपेक्षिता। नायकः निरवकाश भीतः। अत एव तदावश्यकता एव नानुभूता कविना।

उपसंहार कथा—

स्वयात्राविवरणं श्रावयित्वा सिन्धुवादः हितवादं पृच्छति—किं तव पृच्छितं? हितवादः [illegible] करोति। सुखोपभोगाय

CC-0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुभाशिषा च योजयति । दीनारशतं दत्वा द्वारपालपदे तं स्थापयति सिन्धुवादः ।

समीक्षा—हन्त ! श्रेष्ठिजनानां व्यवहारः । स्वीयं वृत्तं श्रावयितुं प्रचारयितुं, ते कियद्धनं क्षिपन्ति ? स्वकथनस्य सत्यतां प्रमाणयितुं ते स्वपार्श्वे स्थापयन्ति उत्कोचपूजितान् ये हितवादवत् सर्वमामामिति कथयन्ति । इमे धनिकाः सामान्यान् राजमान्यान् राज्ञश्च पूजयित्वा स्वीयामेव वापीं ख्यापयन्ति ।

३. (क) सिन्धुवादवृत्त कृतः कथा शैली—

सिन्धुवादवृत्तकृतः कथाशैली स्वीया नास्ति । मूललेखकस्य कथाशैली 'अरेवियन नाइट्स' इत्याख्यपुस्तकलेखकेन अनुकृता । लक्ष्मणशस्त्रिणा च शैलीद्वयोपयोगः कृतः । यथोक्तं तेनैव ग्रन्थान्ते—

'अर्थतः संस्कृतेऽनूद्य' इत्यादि अत्र संस्कृतेऽनुवाद एव कृतः न च शैली वर्णनक्रमः कथा परम्परा वा स्वीकृता संस्कृतभाषायाऽ ।

(ख) मूललेखकस्य न्यूनता—

१. हितवादः भारमादाय सिन्धुवादगृहमायाति इति वर्णितक्रमवर्णनायां । किन्तु भारः कस्य आसीत् किमभूत् तद्भारस्य ? सिन्धुवादरक्षकैः गृहीतं वा भारस्वामी स्वयमेव तमादाय स्वेष्टं जगाम इति न वर्णितं । हितवादः तं भारं यथोचितस्थानमनयत् इत्यपि न वर्णितः । द्वित्ररुप्यकाणां कार्यसम्पादकः दीनारशतं प्राप्य न ननर्त इति महदाश्चर्यम् ।

२. 'कथा षट्मुखी कार्या' इति परम्परा चलति संस्कृतसाहित्ये, अत्र तदनुसरणं न कृतं । एका एव [redacted]वाद-मुखात् ततः परं हितवादः । इत[redacted]ति न लिखितं । उपोद्धातस्य कः वक्ता क[redacted] वक्ता श्रोता चाधोलिखितानां—

इत्थमुपक्रामत	—		पृष्ठ [redacted]	१२
सानन्दो	—	अमन्यत	,,	२९
एवं सिन्धुवादः	—	विससर्ज	,,	४२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्मानं विसर्जयति । सिन्धुवाददेशनृपतये चोपहारमपि ददाति । अनेन तस्य मैत्रीभावं दर्शयति कविः । अनुवादकारकस्य काठिन्यमत्र स्फुटमेव । सः मूललेखकमनुकरोति । मूललेखकश्च वणिग्वृत्तिः यतो हि सः न वर्णयति प्रकृतिसुषमां राजधानिं राज्ञः शासन व्यवस्थां वा । केवलं तमेवांशमाश्रयति येन शीघ्रं कथापूरयेत् ।

सप्तमसिन्धुयात्रा कथा—

यात्राक्लेशभीतः सिन्धुवादः हारीतमहीपाज्ञया सप्तमीं यात्रामारचयति उपहारसम्प्रदानाय । पोतमारुह्य निर्विघ्नं द्वीपाधिपं दृष्ट्वा हारीतमहीपति दत्तं रत्नादिकं पत्रं च तद्द्वीपनृपायदत्वा तस्मात् पारितोषिकमादाय गृहाय चलति । मार्गे दासव्यवसायिनः वणिजः सर्वस्वहरणपूर्वकं सर्वान् पोतस्थान् कञ्चिद् द्वीपं नयन्ति । तत्र सिन्धुवादम् विक्रीणन्ति । एकश्च धनी जनः क्रीणाति । सिन्धुवादः तत्गृहं गत्वा सेवारसप्रसन्नेन स्वामिना जङ्गलं नीयते । तत्र गजान् मारयितुं स्थाप्यते । बहून गजान् हत्वा सः एकस्मिन् दिने गजेनेकेन मारितप्रायो जीवति कथञ्चित् । स्वामिनं गत्वा वृत्तं निवेदयति । श्रुतकथः स्वामी हृष्टः गृहगमनानुमतिं ददाति सिन्धुवादाय । स्वदेशमागत्य हारीतनृपं दृष्ट्वा सर्वां कथां श्रावयित्वा गृहमायाति । हारीतश्च कथां स्वर्णाक्षरेषु लेखयित्वां स्वकोषागारे स्थापयति ।

समीक्षा—कथायामस्यां नायकः पूर्ववत् दृढोत्साहः दर्शितः, गजेन तदाश्रितवृक्षोत्पाटने कृतेऽपि सः जीवनाशां न त्यजति । विधेरानुकूल्यमेवास्तिकारणमत्रापिः । अन्यथा गजमारणोत्तरं मानवस्य जोवनधारणमसम्भवम् । हन्तृ गजोऽपि परिचिनोति तरुं, स्वजातिहन्तारं । विस्मयबहुलता एवात्र कारणम् पाठकाकर्षणे । प्रकृतिरत्रापि पूर्ववदुपेक्षिता । नायकः निरवकाश भीतः । अत एव तदावश्यकता एव नानुभूता कविना ।

उपसंहार कथा—

स्वयात्राविवरणं श्रावयित्वां सिन्धुवादः हितवादं पृच्छति—किं तव कथनमुचितं ? हितवादः स्वकथनस्यानौचित्यं स्वीकरोति । सुखोपभोगाय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुभाशिषा च योजयति । दीनारशतं दत्वा द्वारपालपदे तं स्थापयति सिन्धुवादः ।

समीक्षा—हन्त ! श्रेष्ठिजनानां व्यवहारः । स्वीयं वृत्तं श्रावयितुं प्रचारयितुं, ते कियद्धनं क्षिपन्ति ? स्वकथनस्य सत्यतां प्रमाणयितुं ते स्वपार्श्वे स्थापयन्ति उत्कोचपूजितान् ये हितवादवत् सर्वमामामिति कथयन्ति । इमे धनिकाः सामान्यान् राजमान्यान् राज्ञश्च पूजयित्वा स्वीयामेव वार्पी ख्यापयन्ति ।

३. (क) सिन्धुवादवृत्त कृतः कथा शैली—

सिन्धुवादवृत्तकृतः कथाशैली स्वीया नास्ति । मूललेखकस्य कथाशैली 'अरेवियन नाइट्स' इत्याख्यपुस्तकलेखकेन अनुकृता । लक्ष्मणशास्त्रिणा च शैलीद्वयोपयोगः कृतः । यथोक्तं तेनैव ग्रन्थान्ते—

'अर्थतः संस्कृतेऽनूद्य' इत्यादि अत्र संस्कृतेऽनुवाद एव कृतः न च शैली वर्णनक्रमः कथा परम्परा वा स्वीकृता संस्कृतभाषायाऽ ।

(ख) मूललेखकस्य न्यूनता—

१. हितवादः भारमादाय सिन्धुवादगृहमायाति इति वर्णितक्रमवर्णनायां । किन्तु भारः कस्य आसीत् किमभूत् तद्भारस्य ? सिन्धुवादरक्षकैः गृहीतं वा भारस्वामी स्वयमेव तमादाय स्वेष्टं जगाम इति न वर्णितं । हितवादः तं भारं यथोचितस्थानमनयत् इत्यपि न वर्णितः । द्वित्ररुप्यकाणां कार्यसम्पादकः दीनारशतं प्राप्य न ननर्त इति महदाश्चर्यम् ।

२. 'कथा षट्मुखी कार्या' इति परम्परा चलति संस्कृतसाहित्ये, अत्र तदनुसरणं न कृतं । एका एव [redacted]वाद-मुखात् ततः परं हितवादः । इत[redacted]ति न लिखितं । उपोद्धातस्य कः वक्ता क[redacted] वक्ता श्रोता चाधोलिखितानां—

[redacted]

इत्थमुपक्रामत	—		पृष्ठ [redacted]	१२
सानन्दो	—	अमन्यत	,,	२९
एवं सिन्धुवादः	—	विससर्ज	,,	४२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रभृतयः पाश्चात्य लेखकानां सरणि विलक्षणेति विभाव्य शान्तिराराश्रयणीया ।

३. प्रकृतिवर्णनाभावः—

प्रकृतिः समुपेक्षिता लेखकेन ! नदीपवर्तसागरवन प्रान्तरादयो वहुशः आगता न च सम्यक् चित्रिताः । मन्ये लेखकोऽपि सिन्धुवाद इव वणिगेव ।

४. चरित्रचित्रणस्य न्यूनता—

यानि चरित्राणि समुपस्थापितान्यत्र तानि सिन्धुवादं विहाय स्वल्पानि, अपूर्णानि । राजप्रासादानां वनवृक्षाणां हितवादस्य स्फोटने कथासौन्दर्यमभविष्यदधिकम् ।

५. सम्वादाभावः—

एकस्य कथनेऽरुचिः विलसति । सर्वे मौनाः । हितवादः आदौ अन्ते एव च लपति । मध्ये तस्य रसना छिन्ना ! किं सर्वे काष्ठमूर्तयः आसन् ।

सर्वमेवाद्भुतरसप्रसङ्गे भूषणाय एव इति वक्तुं शक्यते ।

❀ इतिशम् ❀

वेदव्यासेन शुक्लेन सम्पाद्य सुप्रकाशिते ।
सिन्धुवादस्य वृत्तेऽस्मिन् खभागोऽयं प्रयाति वै ॥

ॐ

[redacted]
LIBRARY
[redacted]
4048
84100

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust Funding by MoE-IKS

हमारे प्रमुख प्रकाशन

(शीघ्र प्रकाशित)

१. संस्कृत साहित्यस्येतिहासः—डा० नागेन्द्र पाण्डेयः
२. सिन्धुवादवृत्तम् रहस्यम्—पं० वेदव्यास शुक्लः १५ = ००
३. दशरुपकरहस्यम्—पं० वेदव्यास शुक्लः १२ = ५०
४. ध्वन्यालोकदीपिका—पं० वेदव्यास शुक्लः
५. रसगंगाधरदीपिका—पं० वेदव्यास शुक्लः
६. सहित्यदर्पणदीपिका—आ० राजकिशोर त्रिपाठी १२ = ५०
७. काव्यमीमांसा—पं० नर्वदेश्वर त्रिपाठी
८. ऊर्मिलीय-महाकाव्यम्—(पं० वेदव्यास शुक्लः) ४ = ००
९. न्यायसिद्धान्तमुक्तावली शब्दखण्डम—डा० बदरीनारायण पाण्डेय
१०. दशकुमारचरितम्—(पूर्व पीठिका) पं० पारसनाथ द्विवेदी
११. काव्यालङ्कारसूत्राणि—पं० पारसनाथ द्विवेदी ५ = ००
१२. मेघदूतम्—(पूर्वमेघः)
१३. गणकतरङ्गिणी—महामहोपाध्याय सुधाकर द्विवेदी
१४. शिवराजविजयरहस्यम्—(प्रथम) पं० वेदव्यास शुक्लः
१५. भारतीय कुण्डली विज्ञानम्—डा० नागेन्द्र पाण्डेयः
१६. तन्त्रसारः अभिनवगुप्तकृत—पं० हेमेन्द्रनाथ चक्रवर्ती
१७. व्याकरणशास्त्रस्येतिहासः—पं० बाँकेलाल मिश्रः
१८. कौमारम्—(प० वेदव्यास शुक्लः) ९ = ००
१९. बृहदवकहड़ाचक्रम्-निर्मला-संस्कृत टीका सहित—चन्द्रमा पाण्डेय
२०. लघुसिद्धान्तकौमुदी—बालमनोरमा टीका सहित—
सं०—सूर्य नारायण शुक्लः, हिन्दी—रामगोविन्द शुक्लः
२१. सौप्रभम्—(पं० वेदव्यास शुक्लः)
२२. यौतुकम् (नाटक)—पं० शिवजी उपाध्यायः

प्राप्ति स्थान

संस्कृत साहित्य संस्थान

सी० २७/१७० ए, जगतगंज, वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi